Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीहरिः

## भजनसङ्ग्रहम्

जय सद्गुरुनाथ महराज् की जय
जय सकलसाधुसङ्ग की जय
जानकीकान्तस्मरणं जय जय राम राम
गोपिकाजीवनस्मरणं गोविन्द गोविन्द
जय पुण्डरीकवरद हरिविठ्ठल
श्रीभक्तकोलाहललाल की जय
जय श्रीराधाराणी की जय
जय श्रीबृन्दावनधाम की जय
जय श्रीहरिनाम की जय
जय भागवतधर्म की जय

नामावलि

हरिनारयण हरिनारयण

---

ध्यानश्लोकाः

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

श्रीकान्तो मातुलो यस्य जननी सर्वमङ्गळा ।
जनकः शङ्करो देवस्तं वन्दे कुञ्जराननम्॥

नमो नमः सद्गुरुभ्यः सद्गुरुभ्यो नमो नमः ।
नमो नमः सद्गुरुभ्यः सद्गुरुभ्यो नमो नमः॥

ज्ञानवैराग्यसंपूर्णान् हरिभक्तिपरायणान् ।
पूर्वाचार्यानहं वन्दे संप्रदायप्रवर्तकान् ॥

भगवन्नामसाम्राज्यलक्ष्मीसर्वस्वविग्रहम् ।
श्रीमद्बोधेन्द्रयोगीन्द्रदेशिकेन्द्रमुपास्महे॥

नामसाम्राज्यरूपाणां बोधेन्द्रश्रीधरात्मनाम्।
प्रणामं ये प्रकुर्वन्ति तेषामपि नमो नमः॥

ईशे तस्य च नामनि प्रविमलं ज्ञानं तयोरूर्जितं
प्रेम प्रेम च तत्परेषु विरतिश्चान्यत्र सर्वत्र च ।
ईशेक्षा करुणा च यस्य नियतावृत्तिः श्रितस्यापि यं
तं वन्दे नररूपमन्धकरिपुं श्रीवेङ्कटेशं गुरुम्॥

यस्याङ्गं कनकाभकामसदृशं फालं पुण्ड्राङ्कितं
वाणी रघुनाथनामसुधयाप्यार्द्राऽसकृद्धारया।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चेतस्यम्बुजलोचनो यदुपतिः खेलत्यलं राधया
तं वै वेङ्कटरामदेशिकवरं सर्वात्मनाहं भजे ॥
भगवन्नामबोधेन्द्रश्रीधरार्यात्मविग्रहम् ।
श्रीमद्वेङ्कटरामाख्यं देशिकेन्द्रमुपास्महे॥
नन्दसूनुं राधिकाञ्च भावयन्तं सदा हृदि।
वन्देहं गुरुदेवं तं कृष्णप्रेमरसप्रदम्॥
कलिकालोचितं धर्मं नामसङ्कीर्तनात्मकम्।
निर्णेतुमवतीर्णं तं प्रेमिकं सद्गुरुं भजे॥
हरे रामेति कृष्णेति नामसङ्कीर्तनं सदा ।
लोकक्षेमायकुर्वन्तं प्रेमिकं सद्गुरुं भजे॥
प्रह्लादनारदपराशरपुण्डरीक-व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ।
रुक्माङ्गतार्जुनवसिष्ठविभीषणादीन् पुण्यानिमान् परमभागवतान् स्मरामि॥
वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥
हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा॥
विसृज्य लज्जां योऽधीते मन्नामानि निरन्तरम् ।
कुलकोटिसमायुक्तो लभते मामकं पदम्॥
कालक्षेपो न कर्तव्यः क्षीणमायुः क्षणे क्षणे।
यमस्य करुणा नास्ति कर्तव्यं हरिकीर्तनम्॥
विष्णोर्गानञ्च नृत्तञ्च नटनञ्च विशेषतः।
ब्रह्मन् ब्राह्मणजातीनां कर्तव्यं नित्यकर्मवत्॥
कलौ कल्मषचित्तानां पापद्रव्योपजीविनाम्।
विधिक्रियाविहीनानां गतिर्गोविन्दकीर्तनम्॥
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत्॥
ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम्॥

नाहं वसामि वैकुण्ठे न योगिहृदये रवौ ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद॥

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः।
इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा॥

नामसङ्कीर्तनं यस्य सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्तं नमामि हरिं परम्॥

स्मृते सकलकल्याणभाजनं यत्र जायते।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम्॥

नामकीर्तनमात्रेण सुप्रसन्नं कृपानिधिम्।
भक्तकोलाहलं वन्दे भक्ताभीष्टफलप्रदम् ॥

राधिकाकुचकस्तूरीकुङ्कुमाङ्कितवक्षसम् ।
शृङ्गाररसमूर्तिं तं भक्तकोलाहलं भजे॥

---

विजयपञ्चकम्

नाट - आदि

जय नन्दवरकुमार जय नवनीतचोर
जय गोपिकाजार जय गोपवीर ॥ज॥
जय गोपिकालोल जय गोपालबाल
जय गोपपरिपाल जय नीलबाल ॥ज॥
जय राधिकारमण जय रञ्जितभुवन
जय गोपनन्दन जय कोटिमदन ॥ज॥
जय गोकुलाधीश जय गोपवरवेष
जय प्रेमिकपोष जय कुब्जाभूष ॥ज॥

---

आरभि – त्रिपुट

स्वागतं स्वागतं व्रजेन्द्रनन्दन
स्वागतं राधिकावल्लभ ।
स्वागतं काळिन्दीतीरसञ्चार
स्वागतं गोकुलनायक ॥
स्वागतं स्वागतं कृष्ण ॥
भक्तरक्षक भक्तवत्सल
भक्ततापनिवारक ।
भक्तमण्डलनर्तनप्रिय
भक्तमानसरञ्जन ॥स्वा॥
श्यामसुन्दर कोमळाधर
श्रीधर मुरळीधर ।
प्रेमिकार्चितपादपङ्कज
पाहि भक्तकोलाहल ॥स्वा॥

---

मध्यमावति - आदि

झलझलझञ्झलनूपुरभूषित-
सरसिजसुन्दरचरणयुग ।
तकधिमितकधिमितधिङ्गिणतोमिति
ताण्डवकर ते नमो नमो ॥
नन्दात्मज ते नमो नमो
बृन्दावनचर नमो नमो ॥न॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गोकुलरक्षक गोपीनायक
गोवर्धनधर नमो नमो
कोमलाधर श्यामलसुन्दर
कुञ्जविहार नमो नमो ॥न॥
दधिघृतचोर वरसुकुमार
वल्लवीजार नमो नमो
ब्रह्मादिकसुरपूजितचरण
प्रेमिकरक्षक नमो नमो ॥न॥

---

सावेरि - रूपकम्

मुरळीधर मुरमर्दन मुनिमानसलोल
मृदुभाषण मधुरानन जगन्मोहनलील ।
जगदानन्दकर सुन्दर मुनिभावितभाव
विजयी भव विजयी भव व्रजनन्दन देव॥

प्याकट - रूपकम्

कनकाम्बर कमलानन करुणारसपूर
कमलासनपरिपूजितचरणाम्बुज धीर।
अमलाशयहृदयाम्बुजसुखश्यामशरीर
विजयी भव विजयी भव व्रजनन्दन देव॥

सहाना - रूपकम्

गोवर्धनगिरिनायक गोविन्द मुरारे
गोपीजनलीलाप्रिय गोपालक शौरे ।
गोरक्षणकर प्रेमिकजनपाल कंसारे
विजयी भव विजयी भव व्रजनन्दन देव॥

---

मङ्गळकौशिकम् - आदि

गोपाल भवतु ते मङ्गळम् जय जय
गोविन्द भवतु ते मङ्गळम् ॥
व्रजराजनन्दन वल्लवीरमण
गजराजपाल ते मङ्गळम् ॥गो॥
घनश्यामळगात्र कमलायतनेत्र
कंसनिग्रहचरित्र मङ्गळम् ॥गो॥
बृन्दावनचर श्रीनन्दकुमार
प्रेमिकानन्दकर मङ्गळम् ॥गो॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गुरुकीर्तनम्

यस्य प्रसादाद्भगवान्
ददात्यात्मानमेव च ।
तमव्याजकृपासिन्धुं सद्गुरुं शरणं
भजे ॥

नाट - आदि

श्रीगुरुमेव सदा भावये हृदये ॥श्री॥
भगवन्नामबोधनकरं निज-
भक्तबृन्दप्रेमाब्धिचन्द्रम् ॥श्री॥
श्रीहरिचरणध्यानपरायणं
श्रितजनतापत्रयसंहरणम् ।
आनन्दबाष्पपूरितनेत्रं
अद्भुतरूपं पुलकाङ्कितगात्रम्
॥श्री॥
भागवतामृतरसिकं सुमुखं
भवभयभञ्जनचरितं ललितम्।
श्रीहरिकीर्तनचतुरं सुस्वरं
श्रीपदयुगकृतनर्तनं सुगुणम् ॥श्री॥
प्रतिपदं हा कृष्ण कृष्णेति गायन्तम्
प्रसन्नमुखं भक्तहृदि निवसन्तम् ।
कृष्णप्रेमरसवितरणशीलं
कृतार्थजनगणमङ्गलमूलम् ॥श्री॥

नामावलिः

सद्गुरो रक्ष मां परमदयालो पाहि माम्

---

श्रीगोविन्दपुरीं कवेरतनयातीरस्थितां
पावनीं
वैकुण्ठाधिकवैभवां सुरगणैर्मान्यां
नमस्कुर्महे।
यत्र श्रीहरिनामकीर्तनसुधाऽऽस्वादेन
सिद्धिङ्गतः
सान्निध्यं कुरुते गुरुर्यतिपतिर्बोधेन्द्रयोगीश्वरः॥

सिंहेन्द्रमध्यमम् - आदि

गोविन्दपुरीमहं प्रणमामि ॥गो॥
कावेरीतटरञ्जितभुवनाम्
कोकिलबृन्दविरचितगानाम् ॥गो॥
गर्जितहरिनामध्वनिपरिपूर्णाम्
तर्जितवैवस्वतदूतगणाम् ॥गो॥
बोधेन्द्रगुरुवरसान्निध्ययुताम्
बोधवैराग्यभक्तिरसप्रदाम् ॥गो॥
भक्तमण्डलकृतहरिकीर्तनाम्
भावुकप्रेमिककृतदिव्यनर्तनाम्
॥गो॥

---

श्रीगोविन्दपुरीं वन्दे
सर्वपापविनाशिनीम् ।
भगवन्नामबोधेन्द्रो यत्र सिद्धिङ्गतो
गुरुः॥

सारङ्गा - आदि

भज रे मानस गोविन्दपुरीम् ॥
भगवन्नामबोधेन्द्रगुरुवर-
पदपद्मरजःकणपवित्राम् ॥भ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भगवन्नामबोधेन्द्राधिष्ठान-
सान्निध्येन परमकल्याणाम् ॥भ॥
भगवन्नामबोधेन्द्रचरण-
सेवकप्रेमिकपूजितभवनाम् ॥भ॥

---

श्रीमन्बोधेन्द्र योगीन्द्र देशिकेन्द्र
नमोस्तु ते।
सर्वलोकशरण्यस्त्वं नामभक्तिं
प्रयच्छ मे ॥

केदारगौळ - आदि

भगवन्नामबोधेन्द्रं - सदा
भज रे मानस देशिकेन्द्रम् ॥भ॥
भागवतधर्मप्रवचनधीरम्
भगवन्नामबोधनचतुरम् ॥भ॥
भक्तमण्डलसेवितचरणम्
भव्यगुणालयमघहरणम् ॥भ॥
ऊर्ध्वपुण्ड्रविलसत्फालम्
उन्मत्तमिव भक्तिरसलोलम् ॥भ॥
ब्रह्मानन्दमेव मूर्तिमन्तम्
प्रेमिकहृदये क्रीडन्तम् ॥भ॥

---

काषायदण्डकरकादिविभूषिताङ्ग
वैराग्यभाग्यजलधे करुणानिधे त्वम् ।
संसारसिन्धुपतितस्य समाकुलस्य
बोधेन्द्रदेव मम देहि करावलम्बम् ॥

सिंहेन्द्रमध्यमम् - आदि

त्वमेव मम शरणं हे गुरुनाथ ॥त्व॥
त्वां विना दीनरक्षकं मान्यम्
क्षणमपि मनसा स्मरामि
नान्यम्॥त्व॥
जननी त्वमेव जनकस्त्वमेव
जगदुद्धारक सर्वं त्वमेव ।
पालय भगवन्नामबोधेन्द्र
प्रेमिकभावितपादारविन्द ॥त्व॥

नामावलिः

सद्गुरुनाथ शरणं शरणम्
श्रीगुरुनाथ शरणं शरणम्

---

अनामरूपं चिन्मात्रं
सर्वव्यापिनमीश्वरम् ।
भगवन्नामबोधेन्द्रं ध्यायामि जगतां
गुरुम्॥

जोन्पुरी - आदि

वीक्षे कदाहं सद्गुरुनाथम् ॥वी॥
वीक्षणलालितनिजभक्तबृन्द-
रक्षणलोलं सद्गुणशीलम् ॥वी॥
कोमलसुन्दरचरणाम्बुरुहम्
कामितफलदं विघटितमोहम् ॥वी॥
मन्मथकोटिलावण्यस्वरूपम्
मदगजगमनं मानसदीपम् ॥वी॥
कामक्रोधमुखरिपुमारम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रेमिकभावुकमानसचोरम् ॥वी॥

---

भगवन्नामसिद्धान्तनिर्धारणधुरन्धरम् ।
अपारकरुणासिन्धुं बोधेन्द्रं गुरुमाश्रये॥

जौन्पुरी - आदि

कारणरहितकृपानिधिरेकः
सद्गुरुनाथो नान्यः सत्यम् ॥का॥
निजचरणाम्बुजविमुखं मामनु-
धावन् कृपया जननीवत् ।
मयि कोपः किमिति मधुरेण
वचसाऽऽश्वास्य प्रीतोऽभवत् ॥का॥
कैवल्यनिधिभीतं मामनु-
गच्छन् मम कामितमनुसृत्य ।
श्रीहरिप्रेमरत्नोत्तममिह
दत्वा गच्छति कृपया वीक्ष्य ॥का॥
शुकसनकादिकवाञ्छितमेतत्
सकलसुरासुरदुर्लभं कृपया ।
भगवन्नामसुधारसशुद्ध-
प्रेमरसं ददौ कटाक्षदीक्षया ॥का॥

---

गोपीमृत्कलितोर्ध्वपुण्ड्रविलसत्फालं प्रसन्नाननं
चिन्मुद्राङ्कितपाणिपद्ममनिशं सङ्कीर्तयन्तं हरिम्।
काषायाम्बरवेष्टितं प्रणमतां कल्याणकल्पद्रुमं
वन्देहं करुणार्णवं यतिवरं बोधेन्द्रयोगीश्वरम् ॥

मागेश्री - आदि

स्वागतं स्वागतं सद्गुरुनाथ
स्वागतं स्वागतं मम गुरुनाथ ॥
भागवतामृतवर्षणचतुर-
भगवन्नामबोधेन्द्र योगीन्द्र ॥स्वा॥
योगयागव्रततीर्थक्षेत्र-
होमप्रमुखधर्मैः किम् ।
श्रीहरिनामकीर्तनमेव
कलिसन्तरणमिति वदसि त्वम् ॥स्वा॥
दुस्तरसंसारसागरपतित-
जनेषु करुणया भगवन्नाम ।
अवलम्बनमिति सकलागमवर-
वचनैः सिद्धान्तं वदसि ॥स्वा॥
दण्डकमण्डलुकाषायाम्बर-
शोभितदिव्यसुन्दररूप ।
कमलविलोचनकरुणावीक्षण
पोषितप्रेमिकपूजितपाद ॥स्वा॥

नामावलिः

गोविन्दनामरुचिं देहि मे सद्गुरो।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गोविन्दपुरवास बोधेन्द्र सद्गुरो॥
श्रीरामनामरुचिं देहि मे सद्गुरो।
गोविन्दपुरवास बोधेन्द्र सद्गुरो॥

---

गुरोः कटाक्षमात्रेण पूर्णो भवति मानवः।
न धनेन न पुत्रेण न गृहेण न बन्धुभिः ॥
यस्यपादनखज्योतिरज्ञानध्वान्तनाशनम्।
तस्मै श्रीगुरुदेवाय
नतिरस्त्वात्मबन्धवे॥

देष् - आदि

पूर्णोहं परिपूर्णोहं
कारणरहितगुरुकृपया ॥पू॥
आश्विनदर्शपुण्यदिने
सोमवारे किल सुप्रभाते ।
आजगाम जगदुद्धारी भगवन्-
नामबोधेन्द्रो मयि विनते ॥पू॥
भागवतामृतवर्षणं कर्तुं
आज्ञां कुर्वन् शुश्राव ।
भक्तं मां कृपया किल वीक्ष्य
श्रीपदसेवां प्रददौ तदैव ॥पू॥
प्रणते मयि कृत्वाञ्जलिं दीने
परमकृपालुरभयं दत्वा ।
प्रेमभक्तिसिद्धिरस्त्विति प्रवदन्
प्रययौ पुनरागच्छेयमित्युक्त्वा ॥पू॥

---

पादच्छायामुपाश्रित्य तवैवाचार्यसत्तम ।
सुखं जीवाम भुवने पीत्वा
कृष्णकथामृतम्॥

सावेरी - आदि

क्षणमपि तव पदच्छायायां मां
मा त्यज करुणया गुरुनाथ ॥
धनजनयौवनगर्वयुतानाम्
दूरीकुरु मम सङ्गं नराणाम् ॥क्ष॥
शरणमिति दृढविश्वासेन
शरणागतोहमज्ञानेन ।
श्रान्तोहं भवकान्तारेण
क्लान्तोहं बहुदुस्तरेण ॥क्ष॥
कामक्रोधदम्भपरायण-
जनपूर्णमिमं दृष्ट्वा लोकम् ।
कलिकलुषाग्रहभीतोहं तव
चरणकमलं भजाम्यमोघम् ॥क्ष॥
भगवन्नामबोधेन्द्र यतीन्द्र
भक्ततापहर शारदचन्द्र ।
पतितोद्धारक तारकमन्त्र-
प्रदायक प्रेमिकदेशिकेन्द्र ॥क्ष॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सद्गुरोरुपदेशेन सफलं जीवितं मम ।
किं धनेन गृहेणापि किं लोकेन च
बन्धुभिः॥
रामानुजं शङ्करमारुणिञ्च श्रीवल्लभं
गौरहरिञ्च मध्वम्।
आनन्दरामं हरिवंशमीडे ज्ञानेश्वरं
प्रेमिकसद्गुरुम्॥

[illegible]ाण्डु - आदि

करकमलं मम शिरसि निधाय
करुणाञ्चक्रे गुरुनाथः ।
कर्णे तारकमन्त्रं प्रदाय
तापं जहार गुरुनाथः ॥
चरणयुगं मम हृदये कृत्वा
कटाक्षं चक्रे गुरुनाथः ।
जननमरणभयं परिहृत्य
पूर्णपदं ददौ गुरुनाथः ॥
पादोदकं मम वदने कृत्वा
पापं जहार गुरुनाथः ।
गाढं कृपया मां परिरभ्य
प्रेमसुखं ददौ गुरुनाथः ॥

नामावलिः

गुरुमहराज् गुरु जय् जय्
परब्रह्मसद्गुरु
गुरुमहराज् गुरु जय् जय्
भगवत्पादसद्गुरु
गुरुमहराज् गुरु जय् जय्
रामानुजसद्गुरु
गुरुमहराज् गुरु जय् जय् मध्वाचार्यसद्गुरु
गुरुमहराज् गुरु जय् जय्
गौराङ्गसद्गुरु
गुरुमहराज् गुरु जय् जय्
निम्बार्कसद्गुरु
गुरुमहराज् गुरु जय् जय्
हरिवंशसद्गुरु
गुरुमहराज् गुरु जय् जय्
श्रीवल्लभसद्गुरु
गुरुमहराज् गुरु जय् जय्
ज्ञानेश्वरसद्गुरु
गुरुमहराज् गुरु जय् जय्
रामानन्दसद्गुरु
गुरुमहराज् गुरु जय् जय्
वासुदेवसद्गुरु
गुरुमहराज् गुरु जय् जय् प्रेमिकेन्द्र
सद्गुरु

सद्गुरुमहराज् की जय्

---

यदा श्रीगुरुदेवस्य दर्शनं पादपद्मयोः।
तदैव भुवि मर्त्यानामुदेति
नवजीवनम्॥

वरालि - आदि

सद्गुरुचरणं भजत



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दुर्जनसङ्गं त्यजत ॥स॥
सत्यवचनं रटत
श्रीहरिचरितं पठत ॥स॥
भक्तिं परमां वृणुत
भागवतार्थं शृणुत ॥स॥
प्रेमाश्रुकलां धरत
नामानि हरेः स्मरत ॥स॥

---

गुरुरेव हरिः साक्षात् हरिरेव गुरुः परः।
एवं ह्यनन्यभावेन
भजेताचार्यपुङ्गवम्॥

शेन्चुरुट्टी - आदि

हरिरेव गुरुर्गुरुरेव हरिः ॥ह॥
गुरुपूजा यदि हरिपूजया किम्
गुरुसेवा यदि हरिसेवया किम् ॥ह॥
गुरुदर्शनं यदि हरिदर्शनेन किम्
गुरुस्मरणं यदि हरिस्मरणेन किम्॥ह॥
गुरुनाम यदि हरिनाम्ना किम्
गुरुप्रेम यदि हरिप्रेम्णा किम् ॥ह॥

---

गुरुर्माता गुरुस्तातो गुरुर्बन्धुर्गुरुःसखा।
गुरुरेव परं दैवं गुरुरेव परा गतिः॥

केदारगौळ - आदि

गुरुर्माता गुरुः पिता
गुरुरेव मम कुलदेवता ॥
गुरुर्ब्रह्मा गुरुर्विष्णुः
गुरुरेव महादेवः शिवः ॥गु॥
गुरुर्नित्यो गुरुः सत्यम्
गुरुरेव परं ब्रह्म तत्त्वम् ॥गु॥
गुरुर्ज्ञानम् गुरुर्ध्यानम्
गुरुरेव मम प्राणधनम् ॥गु॥
गुरुः सखा गुरुः स्वामी
गुरुरेव मम प्रेमपतिः ॥गु॥

---

कलिसाम्राज्यनाशाय
नामसाम्राज्यवृद्धये ।
श्रीमत्सद्गुरुराजेन्द्र लोके दिग्विजयं कुरु॥

देष् - आदि

विजयी भवतु गुरुनाथः
विजयी भवतु मम नाथः ॥वि॥
मदगज इव बहुसुन्दरगमनेन
आजगाम मम गुरुनाथः ।
अभयं प्रददौ करकमलेन
भवकान्तारे गुरुनाथः ॥वि॥
पदकमलं मम शिरसि निधाय
परमसुखं ददौ गुरुनाथः ।
सद्गुरुचरणस्पर्शसुखेन
धन्योहं मम पतिर्गुरुनाथः ॥वि॥
प्रेमकटाक्षपुलकितदेहं
पश्यति मां श्रीगुरुनाथः ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शुद्धप्रेमिकमण्डलमध्ये
सुप्रसन्नो भवतु गुरुनाथः ॥वि॥

---

प्रातःस्मरामि गुरुदेवपदारविन्दं
मोहान्धकार परिहारि नखप्रकाशम् ।
यत्संश्रयात् सकलतापमहं विधूय
शान्तिं परामिह भजामि हरौ च
भक्तिम् ॥

मोहनम् - आदि

भज रे मानस हृदयाभरणम्
भगवन्नामबोधेन्द्रचरणम् ॥भ॥
भजदार्तिहरदिव्यप्रभावम्
भवजलनिधिसन्तारितजीवम् ॥भ॥
पङ्कजदलसमसुन्दरशोभं
कुङ्कुमकोमलमरुणनिभम् ।
किङ्करहृदयाङ्गणमणिदीपं
शङ्खरथाङ्गरेखमपापम् ॥भ॥
भवकूपपतितपरमालम्बनं
भक्तजनोत्पलकोटिचन्द्रगुणम्।
भवरोगमलिनजनसङ्घपावनं
भक्तिसुधाप्रदं नित्यकल्याणम्॥भ॥
कामक्रोधमुखरिपुशिक्षकं
नामजपप्रियभक्तरक्षकम् ।
सोमसहस्रसमामृतवर्षकं
प्रेमिकभावुकमण्डलपोषकम् ॥भ॥

---

चण्डालमानीय गृहं क्षुधार्त-
मन्नं ददौ दीनदयानिधिर्यः ।
गङ्गाविरासीदपि यस्य कूपे
तं श्रीधरार्यं सततं भजामि ॥

शङ्कराभरणम् - आदि

श्रीधरवेङ्कटेशमाश्रयेहम् ॥श्री॥
श्रीकण्ठनामामृतरसिकम्
श्रितजनमण्डलसुमुखम् ॥श्री॥
भक्तिज्ञानवैराग्यपूर्णम्
भवमेव भुवि समवतीर्णम् ॥श्री॥
भागवतधर्मप्रचारकम्
भक्तप्रेमिकोद्धारकम् ॥श्री॥

नामावलिः

गङ्गाधर गङ्गाधर गङ्गाधर
गङ्गाधर

---

राधाकृष्णप्रेमतत्त्वनिगूढरसलोलुपम्।
श्रीमद्वेङ्कटरामार्यं सद्गुरुं शरणं
भजे॥

कमास् - आदि

भज रे गुरुराजं मानस ॥भ॥
भक्तकल्पकतरुं भव्यगुणाकरम्
भजनपरं भक्तमण्डलाग्रेसरम् ॥भ॥
मदनान्तकपुरमन्दिरविहारम्
मदनकोटिसमसुन्दराकारम् ॥भ॥
राधामाधवरसरसिकम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रसिकप्रेमिकजनसुमुखम् ॥भ॥

---

यस्योञ्छवृत्तिसमये विविधोपचारै-
राराधयन्ति परितो भगवत्प्रपन्नाः।
सङ्कीर्तयन्तमनिशं रघुनाथनाम
तं भावयामि हृदि
सद्गुरुमात्मबन्धुम्॥

भैरवि - आदि

कटाक्षञ्चक्रे वेङ्कटरामः
कृपया सद्गुरुसार्वभौमः ॥क॥
जटाधरश्रीधरशतधृतिरूपः
निटिलविराजितत्रिपुण्ड्रशोभः ॥क॥
रामनामसुधारसाञ्चितरसनः
राधारमणध्यानजातमृदुहसनः।
रमणीयराकेशसमानसुवदनः
रतिपतिकोटिसौन्दर्यदमनः ॥क॥
अक्षयपात्रं प्रददौ मम स्वयं
रक्षितसकलसज्जनः सदयम् ।
वक्षःस्थलशोभिजपमालोयं
वीक्षणेन हरन्निखिलमपायम् ॥क॥
कराङ्गुलिशोभितजपसूत्रः
करुणारसभृतकमलनेत्रः ।
कामकोपरहितः परमपवित्रः
कामितफलदः प्रेमिकमित्रः ॥क॥

---

यस्य प्रसन्नवदनं सकृदालोक्य
मानवाः।
तमेव शरणं यान्ति सद्गुरुं शरणं
भजे॥

धन्यासि - आदि

वेङ्कटरामदेशिकवर्यम्
वारं वारं भजेऽहम् ॥
पङ्कजलोचनं भव्यगुणालयम्
भजदार्तिहरं भागवतप्रियम् ॥वे॥
कनकाम्बरपरिवेष्टितोत्तमाङ्गं
कुण्डलशोभितकर्णयुगम् ।
कर्णान्तदीर्घकरुणावीक्षणं
कामकोटिसमदिव्यलावण्यम् ॥वे॥
वीणाशोभितभुजदण्डं
वनमालालङ्कृतकम्बुकण्ठम् ।
वामकराङ्गुलिवृतजपसूत्रं
रामचन्द्रमिव शरणागतमित्रम्॥वे॥
भक्तमण्डलकलितोपचारं
भावुकप्रेमिकहृदयविहारम् ।
भजनानन्दपरिपूर्णशरीरं
भजनपरायणजनपरिवारम् ॥वे॥

---

वन्दे भक्താग्रगण्यं तं
कृष्णसेवापरायणम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

१५

गुरुं विजयगोपालयतीन्द्रं
वैष्णवोत्तमम् ॥

काम्भोदि - आदि

विजयगोपालयतिवरमीडे
विषयवैराग्यज्ञानभक्तिप्रदं ॥वि॥
गजराजवरदसङ्कीर्तनपरम्
कमनीयकण्ठतुलसीमणिहारम्॥वि॥
काषायवस्त्रकमण्डलुधरं
करशोभितवरदण्डम् ।
कमलचरणयुगधृतमणिपादुकं
कटाक्षवीक्षणरक्षितश्रितजनम्॥वि॥
मन्दहासयुतमधुरमृदुभाषणं
माधवलीलास्मरणपुलकितम् ।
मायाविरहितं मङ्गलविग्रहं
मन्मथवैरिणं महादेवसमम् ॥वि॥
परमकृपालयं पावनचरितं
प्रेमभक्तिरसपरिपूर्णहृदयम् ।
भागवतोत्तमपरिवारयुतं
प्रेमिकविनुतं परब्रह्मभूतम् ॥वि॥

---

श्रीप्रेमिकेन्द्रगुरुकीर्तनम्

निधये भक्तितत्त्वानां गतये च
महात्मनाम्।
अस्माकं पतये तुभ्यं प्रेमिकाय नमो
नमः॥

कापि - आदि

प्रेमिकनाथं स्मरामि सद्गुरुवर्यम्॥प्रे॥
श्रीराधिकारमणचिन्तनलोलं - हरि
नामकीर्तनानन्दपूरितवदनम् ॥प्रे॥
भव्यगुणालयं भावुकवत्सलं
भक्ताब्धिचन्द्रं प्रेमस्वरूपम् ।
भक्तपुरीराज्यपट्टाभिषिक्तं
सुन्दरराजहृदयनिवासम् ॥प्रे॥

---

बृन्दावनसारङ्गा - आदि

सद्गुरुप्रेमिकं शरणं भजामि ॥स॥
भक्तकोलाहलचरणाब्जमधुपम्
भक्तबृन्दमुखकुमुदचन्द्रम् ॥स॥
गोपीचन्दनपुण्ड्रविलसल्ललाटं
कारुण्यपूरितकटाक्षवर्षिणम्।
कोमलवदनं सुन्दरनासं
कलिभयखण्डनश्रीमन्दहासम्॥स॥
कण्ठशोभिततुलसीमणिमालं
प्रेमभक्तिरसपुलकितगात्रम् ।
चन्द्रसमानशोभितवसनं
शीतलकोमलचरणारविन्दम् ॥स॥
भक्तपुरीनाथं प्रेमैकराजं
परमभक्तिबोधकं परमदयानिधिम् ।
श्रितजनवत्सलं श्रीनिवासं
सुन्दरराजमानसचोरम् ॥स॥

नामावलिः

गुरुनाथ गुरुनाथ प्रेमिकनाथ गुरुनाथ



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गुरुनाथ गुरुनाथ प्रेमानन्द गुरुनाथ

चिन्तामणिर्लोकसुखं सुरद्रुः स्वर्गसम्पदम्।
गुरुर्ददाति सुप्रीतो वैकुण्ठं योगिदुर्लभम्
॥

रीतिगौल - आदि

शेष्व सुखं - श्रीगुरुनाथ ॥शे॥
शुद्धाद्वैतविवेकसुतल्पे
सुषुप्त्यतीते निर्विकल्पे ॥शे॥
कुण्डलिन्या निजप्रियया साकम्
कुरु सुरदुर्लभं समाधिभोगम् ॥शे॥
ब्रह्मरसानुभूतिं निद्राम्
प्राप्नुहि विशुद्धां प्रेममुद्राम् ॥शे॥

---

प्रातःस्मरामि गुरुदेवमचिन्त्यमूर्ति-
मानन्दकन्दमतिसुन्दरमार्तबन्धुम् ।
राधामुकुन्दचरणाम्बुजमध्यभृङ्गं
रक्षामणिं त्रिजगतामनुरागसिन्धुम् ॥

भूपालम् - चापु

सुप्रसन्नो भव श्रीगुरुनाथ ॥सु॥
अविद्याशर्वरी सपदि विनष्टा
विद्यासन्ध्या पुरतो दृष्टा ॥सु॥
चन्द्रकला रेचकेन च पिहिता
सूर्यकला पूरकेण सुविहिता ॥सु॥
विकसितं सहस्रदलं कमलम्
विलसितं प्रेमसुखं निर्मलम् ॥सु॥

---

सर्वलोकशरण्याय बोधेन्द्रगुरुमूर्तये ।
श्रीधरार्यस्वरूपाय नामोद्धाराय
मङ्गळम्॥

सुरुटि - आदि

जय जय मङ्गळं जय जय मङ्गळं
जय जय मङ्गळं श्रीगुरुनाथ ॥ज॥
मदनविकारमत्तगजेन्द्र-
मस्तकभेदकरसिंह ।
मरणजननभेदप्रशमना-
मृतरसदाननिर्जितसोम ॥ज॥

करुणावर्षणचतुरविलोचन
दीक्षाशमितश्रितजनगर्व ।
कमलापतिपदप्रेमप्रदान-
कारणप्रदर्शितसुगमसुमार्ग ॥ज॥
ब्रह्माद्यखिलसुरमुनिसेवित-
चरणप्रशमितमायागर्व ।
प्रेमिकभावुकपरिषत्कीर्तित-
चरित्र पवित्रगुण गुरुदेव ॥ज॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## साधुमहिमा

वाञ्छाकल्पतरुभ्यश्च कृपासिन्धुभ्य एव च।
पतितानां पावनेभ्यो वैष्णवेभ्यो नमो नमः॥

### केदारगौल - आदि

भागवतानहं प्रणमामि ॥भा॥
लोकहितार्थमवतीर्णान्
शोकरहितान् परिपूर्णान् ॥भा॥
प्रह्लादध्रुवभीष्मपराशर-
पाण्डवाम्बरीषपवनसुतादीन् ।
शुकसनकादिकशौनकशबरी-
सूतसुदामश्रुतदेवादीन् ॥भा॥
गौतमनारदकश्यपगजेन्द्र-
गणिकाजामिलगुहगृध्रादीन् ।
व्यासवैनतेयविभीषणबलि-
वाल्मीकिवसिष्ठभरद्वाजादीन्
॥भा॥
कृष्णप्रेमरसाब्धिनिमग्ना-
नक्रूरोद्धवविदुरप्रमुखान् ।
चम्पकलतिकाप्रमुखा गोपी-
र्न्यान्गर्गशाण्डिल्यादीन् ॥भा॥

नामावलिः

भक्तप्रियकृष्ण मां पाहि
भागवतसङ्गं मम देहि

---

कर्मावलम्बकाः
केचित्केचिज्ज्ञानावलम्बकाः।
वयं तु हरिदासानां
पादरक्षावलम्बकाः॥

### पुन्नागवरालि - आदि

दासोहं किल हरिदासानाम् ॥दा॥
नामस्मरणोन्मत्तानाम् ।
नारायणपदचित्तानाम् ॥दा।
रागद्वेषरहितानाम् ।
राधानाथसन्निहितानाम् ॥दा॥
प्रेमपूरितहृदयानाम् ।
ब्रह्मानन्दनिलयानाम् ॥दा॥

नामावलिः

नारदप्रह्लाद और् भक्तबृन्दगाया
हरिगोविन्द हरिगोपाल माधव
यदुराया
भक्तबृन्दगाया परमानन्द पाया
माधवयदुराया मधुरनाम तेरा
भक्तबृन्द की जय् कृष्णनाम कि जय्
भक्तबृन्द की कृष्णनाम की रामनाम
की जय्

---

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सुरुटि - आदि

सज्जनसङ्गं भज रे - क्षणमपि
दुर्जनसङ्गं त्यज रे ॥
सज्जनसङ्गे हरिस्मरणम्
दुर्जनसङ्गे स्त्रीस्मरणम् ॥स॥
सज्जनसङ्गे गुणभजनम्
दुर्जनसङ्गे धनभजनम् ॥स॥
सज्जनसङ्गे बृन्दावनम्
दुर्जनसङ्गे असिपत्रवनम् ॥स॥
सज्जनसङ्गे रविनन्दिनी
दुर्जनसङ्गे वैतरणी ॥स॥
सज्जनसङ्गे रामकथा
दुर्जनसङ्गे कामकथा ॥स॥
सज्जनसङ्गे प्रेमभक्तिः
दुर्जनसङ्गे कामबुद्धिः ॥स॥

नामावलि

साधुसमाज की जय् जय् जय्
साधुसमाज की जय् जय् जय्
सद्गुरुनाथ की जय् जय् जय्
सद्गुरुनाथ की जय् जय् जय्
कृपासमुद्र की जय् जय् जय्
कृपासमुद्र की जय् जय् जय्
आनन्दलहर् की जय् जय् जय्
आनन्दलहर् की जय् जय् जय्
प्रेमचन्द्र की जय् जय् जय्
प्रेमचन्द्र की जय् जय् जय्

---

भूतं सरश्च महदाह्वयभट्टनाथ-
श्रीभक्तिसारकुलशेखरयोगिवाहान् ।
भक्ताङ्घ्रिरेणुपरकालयतीन्द्रमिश्रान्
श्रीमत्पराङ्कुशमुनि प्रणतोस्मि नित्यम्॥

तोडि - आदि

भागवतोत्तमान् भजामि सदा ॥भा॥
भोगिशयनहरिपादसरोरुह-
भजनपरायणान् विरहितमोहान्॥भ॥
परमदयाकरं पद्ममुनीन्द्रं
भव्यगुणालयं भूतयोगीन्द्रम् ।
भवसन्तारकं कासारयतीन्द्रं
भक्तिबोधकं भक्तिसारचन्द्रम्
॥भा॥
मधुरगुणालयं मधुरकवीन्द्रं
मङ्गलविग्रहं मारमुनीन्द्रम् ।
महनीयं कुलशेखरनरेन्द्रं
महितपराक्रमं कलिहकवीन्द्रम्॥भा॥
विप्रनारायणमपि विप्रेन्द्रं
विमलं बाणं भागवतेन्द्रम् ।
विष्णुचित्तमपि वैष्णवचन्द्रं
विनतप्रेमिकमानससान्द्रम् ॥भा॥

नामावलिः

समस्तसाधुमण्डलि की जय्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

क्षणार्धेनापि तुलये न स्वर्गं
नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां
किमुताशिषः ॥

मुखारि - आदि

सज्जनसङ्गं देहि
सरसिजलोचन मां पाहि ॥स॥
दारसुतादिकभोगैः किं मे
धनधान्यादिसमृद्धिभिः किं मे ॥स॥
बन्धनहेतुभिर्बन्धुभिः किं मे
स्यन्दनभवनदासैः किं मे ॥स॥
स्वर्गापवर्गादिभिरपि किं मे
सरसप्रेमविहीनैः किं मे ॥स॥

---

भाग्योदयेन बहुजन्मसमार्जितेन
सत्सङ्गमं च लभते पुरुषो यदा वै ।
अज्ञानहेतुकृतमोहमदान्धकार-
नाशं विधाय हि तदोदयते विवेकः॥

धन्यासि - आदि

कोटिजन्मपुण्यसाधनसाध्यम्
गोविन्ददासमण्डलदास्यम् ॥को॥
मोक्षप्रमुखानन्दरसप्रदं
मुकुन्दचरणाम्बुजरतिप्रदम् ।
मुखरितमद्दलवीणागान-
समुदितमुरारिकीर्तनरसप्रदम् ॥को॥
जननमरणक्लेशविनाशं
जगदुद्धारकं परमपावनम् ।
जनगणसुखदं कल्याणगुणं
जयमङ्गलदं चित्तरञ्जनम् ॥को॥
आनन्दबाष्परोमाञ्चादि-
प्रेमभक्तिलक्षणवर्धनम् ।
अच्युत माधव गोविन्देति
नामसङ्कीर्तनानन्दसंपूर्णम् ॥को॥

---

एषां संस्मरणात्पुंसां सद्यःशुध्यन्ति वै गृहाः।
किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः॥

पुन्नागवराली - आदि

भाग्यमहो मम भाग्यमहो
भागवतानां सङ्गेन ॥
योगयागदानतीर्थक्षेत्र-
मन्त्रजपादिफलं परिपूर्णम् ॥भा॥
नूनं भगवान् जगदीशो मयि
करुणां चक्रे धन्योहम् ।
दीनं मामपि समुद्धर्तुमिह
स्मरति मुकुन्दः पुण्योहम् ॥भा॥
अहमप्येको हरिदासानां
सङ्घे गणितो भविष्यामि ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अच्युत केशव गोविन्देति
नामावलिमपि वक्ष्यामि ॥भा॥
उद्धृतमिह मम कुलमपि नूनं
पितरश्च तथा तृप्यन्ति ।
उन्मत्तं मां कृष्णप्रेम-
रसेन च देवाः पूजयन्ति ॥भा॥

---

निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम्।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः॥

केदारगौलम् - आदि

पादरेणुमहं प्रणमामि ॥पा॥
साधनहीनहृदयस्य मम
मोदकरं भवबन्धहरम् ॥पा॥
प्रह्लादोद्धवनारदव्यास-
मार्कण्डेयध्रुवभीष्माणाम् ।
भृगुशुकसनकभरद्वाजात्रि-
शौनकसूतवसिष्ठानाम् ॥पा॥
धन्नारविदासरामानन्द-
नामदेवकबीररघूणाम् ।
ज्ञानेश्वरहरिदाससमर्थ-
तुकारामपुरन्दराणाम् ॥पा।
कुलशेखरशठकोपकलिह-
बाणपराशरभट्टानाम् ।
रामानुजकूरेशवेदान्त-
सद्गुरुविष्णुचित्तानाम् ॥पा॥
भगवन्नामबोधेन्द्रश्रीधर-
वेङ्कटरामसदाशिवेन्द्राणाम् ।
भद्राचलरामदासजयदेव
नारायणतीर्थत्यागराजानाम् ॥पा॥
मीरागोदामुक्ताजनाबायी-
कर्माप्रमुखवरनारीणाम् ।
माधवचरणप्रेमपराग-
मत्तमानसगोपीनाम् ॥पा॥

---

वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नः।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दर्शनेस्तु भवत्तनूनाम् ॥

शेञ्चुरुट्टि - आदि

सङ्गं देहि भगवन् - महताम् ॥स॥
निर्जितकामक्रोधानाम्
भर्जितसंसारबीजानाम् ॥स॥
तर्जितमोहमदचोराणाम्
गर्जितवेदान्तसाराणाम् ॥स॥
प्रह्लादादिभागवतानाम्
प्रेमपरायणचरितानाम् ॥स॥

---

नामवैभवम्

सकृत्स्मरणमात्रेण
सर्वमङ्गलदायकम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

जगदुद्धारकं वन्दे
हरिरित्यक्षरद्वयम्॥

हिन्दोलम् - आदि

जप रे हरिनाम रसने ॥ज॥
जपतां नित्यं भक्तजनानाम्
शुभदं सुलभं मधुरं सुस्वरम् ॥ज॥
मुनिवरनारदवीणारणितं
मोहमहाब्धिशोषणचरितम् ।
मोक्षादिकजनमण्डलभणितं
मोदकरं नित्यानन्दभरितम् ॥ज॥
गणिकाजामिल गजवाल्मीकि-
प्रमुखोद्धारणप्रथितचरित्रम् ।
गौतमकौशिकशुकसनकादि-
मुनिगणकीर्तितपरमपवित्रम् ॥ज॥
प्रेमिकभक्तप्रार्थितममलं
भवसिन्धुपतिततारकं कोमलम्।
पवनात्मजपरिपूजितमनन्तं
पार्वतीशमुखरसितममृतम् ॥ज॥

नामावलिः

हरि बोल हरि बोल हरि हरि बोल
मुकुन्द माधव गोविन्द बोल

---

सदा सर्वेष्टदं जन्तोः
सर्वारिष्टनिवारकम् ।
श्रीरामनाम जयतु
श्रेयोहेतुशिखामणिः॥

सिंहेन्द्रमध्यमम् - आदि

अनिर्वचनीयं नामवैभवम् ॥अ॥
पवनकुमारो वेत्ति नामरसम् ।
पशुपतिरेव वेत्ति नामबलम् ॥अ॥
वाल्मीकिमुनिर्वेत्ति नामगुणम् ।
विप्रकुचेलो वेत्ति नामधनम् ॥अ॥
प्रह्लादोपि वेत्ति नामसुखम् ।
प्रेमिक एव वेत्ति नामजपम् ॥अ॥

---

चेतोदर्पणमार्जनं
भवमहादावाग्निनिर्वापणं
श्रेयःकैरवचन्द्रिकावितरणं
विद्यावधूजीवनम्।
आनन्दाम्बुधिवर्धनं प्रतिपदं
पूर्णामृतास्वादनं
सर्वात्मस्नपनं परं विजयते
श्रीकृष्णसङ्कीर्तनम्॥

पिहाक - आदि

पिब रे नामरसं रसने ॥पि॥
कृष्ण मुरारे गोविन्देति
केशव माधव गोपालेति ॥पि॥
मेघश्यामळमनोहर शौरे
मधुसूदन जय कंसहरेति ॥पि॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नारायण हरे नन्दकिशोर
नवनीतप्रिय दधिचोरेति ॥पि॥
राधारमण रमानाथेति
बोधानन्दप्रेमप्रदेति ॥पि॥

नामावलिः

रामनामतारकं सदा भज रे
सदा जप रे सदा भज रे

---

तृणादपि सुनीचेन तरोरपि सहिष्णुना।
अमानिना मानदेन कीर्तनीयः सदा हरिः॥

काापि - आदि

निवसति रसनायां भगवान् ॥नि॥
हरिरिति मधुराक्षररूपेण
हर्तुं भवतापमशेषेण ॥नि॥
भवरोगहरः परमकृपाकरः
पशुपतिविनुतः परमपवित्रः ॥नि॥
पातककोटितूलवातूलः
पावनप्रेमसुखप्रदलीलः ॥नि॥

नामावलिः

हरि हरि हरि हरि स्मरण करो
हरिचरणकमलध्यान करो
राधामाधवभजन करो
मुकुन्दगिरिधारिसेवा करो

---

सकृदेव प्रपन्नाय तवास्मीति च
याचते।
अभयं सर्वभुतेब्यो ददाम्येतदव्रतं
मम॥

सुरुटि - आदि

सकृदपि यो जपति - स हि धन्यः॥स॥
गोवधशिशुवधब्रह्मवधादि-
घोरपातकोपि हरिनाम ॥स॥
स्वर्णस्तेयसुरापानगुरुदार-
सङ्गमादिपापोपि हरिनाम ॥स॥
श्रुतिस्मृतिपुराणवचनप्रमाण-
सिद्धमिदं किल प्रेमिकवचनम्॥स॥

---

बहुभिः सुकृतैरेव जन्मान्तरकृतैः कलौ।
नामसङ्कीर्तने विष्णोर्दृढश्रद्धा प्रजायते॥

पिहाक् - आदि

तस्य मुखे हरिनाम जयति ॥त॥
येन सहस्रगोदानं कृतम्
येनानेकतीर्थाटनं कृतम् ॥त॥
येन सकलवेदा अधीताः
येन च सर्वे देवाः पूजिताः ॥त॥
येनाष्टाङ्गो योगः कलितः
येन च विहितो यागःकलितः ॥त॥
येन ब्रह्मकुलं बहुपूजितम्
येन प्रेमवचनं भाषितम् ॥त॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

लभन्ते नैव विश्वासं वासुदेवस्य कीर्तने।
पठन्तोपि च शास्त्राणि भाग्यहीना नराः कलौ॥

खरहरप्रिया - आदि

नामरसं न हि जानाति भवरोगी॥ना॥
न हि जानाति खरो गन्धसुखम्
न हि जानाति नरोऽमृतसुखम् ॥ना॥
न हि जानाति षण्ढः स्त्रीसुखम्
न हि जानाति जडो विद्यासुखम्॥ना॥
न हि जानाति बधिरो गानसुखम्
न हि जानाति वन्ध्या पुत्रसुखम्॥ना॥
न हि जानाति पापी स्वर्गसुखम्
न हि जानाति कामी प्रेमसुखम्
॥ना॥

---

न देशकालनियमो नोपदेशो गुरुष्वपि ।
परं सङ्कीर्तनादेव राम रामेति मुच्यते ॥

बिलहरि - आदि

सन्ततं जप रसने श्रीहरिनाम ॥स॥
कालदेशद्रव्यनियमरहितम्
कामितफलदं शुभदम् ॥स॥
अघसङ्घहरमानन्दकरम्
अद्भुतं मधुरममृतप्रदम् ॥स॥
भवतापहरं परमपवित्रम्
भावुकप्रेमिकजनसङ्कीर्तितम् ॥स॥

---

श्रीराम राम रामेति रमे रामे मनोरमे।
सहस्रनाम तत्तुल्यं रामनाम वरानने॥

सुरुटि - आदि

तारकमन्त्रं जप रे रसने ॥ता॥
सोमशेखरसङ्कीर्तितमिदम्
कामिदफलदं कलिमलहरणम् ॥ता॥
सकलागमवरवचनसारम्
संसारतापहरं वारं वारम् ॥ता॥
प्रेमरसाम्बुधिस्नानप्रदायकम्
प्रेमिकभावुकरसनानायकम् ॥ता॥

---

शरीरे जर्झरीभूते व्याधिग्रस्ते कळेबरे ।
औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः॥

पन्तुवरालि - आदि

औषधमेतत्परमं श्रीहरिनाम ॥औ॥
श्रुतिवचनाद्रिशिखरोद्भूतम्
शुकसनकादिवैद्यप्रकटितम् ॥औ॥
भवरोगहरं पथ्यविरहितम्
पशुपतिवदनपात्रन्यस्तम् ॥औ॥
प्रेमानुभवानन्दरसप्रदम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रेमिकभावुकपरिषत्प्रथितम् ॥औ॥

---

हे जिह्वे रससारज्ञे सर्वदा मधुरप्रिये ।
नारायणाख्य पीयूषं पिब जिह्वे
निरन्तरम्॥

शेञ्चुरुट्टि - आदि

नामरसं पिबरे - रसने ॥ना॥
कदलीद्राक्षाखर्जूराम्र-
कपित्थपनसफलरसैः किम् ॥ना॥
लड्डुकसूपापूपशष्कुली-
मोदकप्रमुखभक्ष्यरसैः किम् ॥ना॥
धनजनयौवननिधुवनभुवन-
शासनस्वर्गापवर्गैः किम् ॥ना॥
भवरोगहरं पशुपतिरसितम्
भावुकप्रेमिकपरिषत्पीतम् ॥ना॥

---

कालेस्मिन् कल्मषापूर्णे विपरीते श्रुतेः
कलौ ।
दुष्टैरेवावृते देशे हरेर्नामैव मे गतिः॥

आभोगी - आदि

जप रे हरिनाम कलौ ॥ज॥
पापाचारप्रवर्धनकरे
पाषण्डमताचारप्रचुरे ॥ज॥
नास्तिकवादकलुषितचित्ते
नारीनरगणे निखिले मत्ते ॥ज॥
सकलवर्णाश्रमधर्मविहीने
सरसप्रेमरहितेपि जने ॥ज॥

---

गृहान्धकूपान्निर्गत्य विविक्तं
स्थानमागतः।
रामनाम जपेन्नित्यं कोतिशश्चिन्तयन् प्रभुम् ॥

सामा - आदि

नामजपं कुरु रे - सदा ॥ना॥
नियमसामान्यनिरपेक्षम्
निरवधिसंसारदुःखविमोक्षम् ॥ना॥
श्रीराम जयराम जय जय रामेति
श्रीकृष्ण जयकृष्ण जय जय
कृष्णेति ॥ना॥
आब्रह्मचण्डाललोकसुलभम्
आनन्दरसखण्डमात्मलाभम् ॥ना॥
ब्रह्मादिनिखिलदेवकृतम्
प्रेमभक्तिरसानन्दप्रदम् ॥ना॥

---

हिन्दोलम् - आदि

शरणं हरिनाम - तेषाम् ॥श॥
विरचितसकलदुराचाराणाम्
विरहितसाधुसदाचाराणाम् ॥श॥
वर्णाश्रमधर्मविहीनानाम्
विनयादिसद्गुणक्षीणानाम् ॥श॥
विरक्तिविवेकरहितानाम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विविधविषादसहितानाम् ॥श॥
प्रेमभक्तिरसबहुदूराणाम्
कामकोपमदपरिवाराणाम् ॥श॥

---

कल्याणी - आदि

जप रे मम रसने मधुरम् ॥ज॥
जयश्रीराधाकृष्णेति सदा
जगदानन्दकरं नाम मुदा ॥ज॥
गोकुलनारीजनगणरसितम्
कोमलरसनापरमाह्लादम् ॥ज॥
बृन्दावनधामवासप्रदम्
प्रेमभक्तिरसास्वादप्रमोदम् ॥ज॥

---

तोडि - आदि

कीर्तय रे मधुरं सदा ॥की॥
शम्भो शङ्कर गौरीशेति
साम्ब सदाशिव सर्वेशेति ॥की॥
चन्द्रकलाधर जटाधर हरेति
शरणागतप्रिय शर्व शिवेति ॥की॥
पन्नगभूषण पापहरेति
पार्वतीरमण हरिप्रेमप्रदेति ॥की॥

---

नाटरागः - आदि

स्मरणे सुखं श्रीहरिनाम ॥स्म॥
दुस्तरभवजलनिधिसन्तारक-
परमालम्बनश्रीगुरुचरण-
सरोरुहकेसरमृदुलाङ्गुलिपरि-
शोभितसुन्दरनखमणिज्योतिः ॥स्म॥
शमदमकरुणादिकसद्गुणपरि-
भूषितहृदयविनिर्गतशुद्ध-
प्रेमरसामृतपोषितभुवन-
प्रथितचरित्र भक्तसमागम ॥स्म॥
केशव माधव गोपीरमण
कृष्ण जनार्दन गोवर्धनधर
कंसान्तक पुरुषोत्तम गोकुल-
नन्दन गोविन्द मधुसूदनेति ॥स्म॥
बर्हालङ्कृतमौलिविराजित-
पूर्णकलाधरसुन्दरवदन-
विराजितमन्दस्मितबिम्बाधर-
विनिर्गतमुरलीगानमाधुर्य ॥स्म॥
तगुमितितगुमितिताण्डवसमय-
विरावितनूपुरभूषितकोमल-
सरसिजसुन्दरमृदुलमनोहर-
सुरगणपूजितचरणयुगल ॥स्म॥
हरिचरणाम्बुजभूषितसिकता-
लङ्कृतपुलिनभानुसुतातट-
कुञ्जकुटीरवंशीवटगो-
वर्धनगोकुलबृन्दारण्य ॥स्म॥

कृष्णप्रेमरसोन्मदराधा-
चरणयुगप्रियगोपीमण्डल-



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कोकिलकेकिकलहंसशुक-
गोवत्सहरिणीवृषभाद्यखिल ॥स्म॥
नन्दयशोदावृषभानुसुता-
चम्पकवल्लीललिताविशाखा-
श्रीदामोद्धवबलभद्रादिक-
कृष्णप्रेमिकनामगुणादि ॥स्म॥
कृष्णकथासङ्कीर्तनश्रवण-
हरिचरणार्चनगुरुपदसेवन-
श्रीकृष्णजन्माष्टमिदिनकुतूहल-
श्रीभागवतसप्ताहमहोत्सव ॥स्म॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गीतावलिः

जयतु जयतु शङ्खग्रामनाथो मुरारि-
र्जयतु जयतु लोके वैष्णवःकृष्णसूरिः।
जयतु जयतु विप्रो वेङ्कटश्चोपकारी
जयतु जयतु कृष्णप्रेमिकः प्रेमकारी॥
सीतासमेतः श्रितपारिजातः
सौमित्रिसंसेवितपार्श्वभागः ।
समीरपुत्रार्चितपादपद्मः
श्रीरामचन्द्रः कुलदैवतं नः ॥
कमलसदृशनेत्रं कालमेघाभगात्रं
कनकमयविभूषं कुन्दमन्दारहासम् ।
गरुडवरतुरङ्गं गोपकन्याभुजङ्गं
कटिविनिहितहस्तं पाण्डुरङ्गं भजे
तम्॥
प्रेमिकेन्द्रमुखाम्भोजमकरन्दतरङ्गिणी।
गीतावलिस्त्रिजगतां प्रयच्छतु परं रसम्॥
उत्फुल्लाम्बुजलोचनं जलधरश्यामञ्च
पीताम्बरं
श्रीवत्साङ्कितवक्षसञ्च तुलसीमालाधरं
सुन्दरम्।
नानाभूषणभूषितं दरवरं चक्रं गदां
बिभ्रतं
शङ्खग्रामनिधिं भजामि भगवन्
त्वामेव दत्ताभयम्॥

द्विजावन्ती - आदि

प्रणमाम्यहं प्रभुं श्रीनिवासम्
वरशङ्खपुरवरदवेङ्कटेशम् ॥प्र॥
शरणागतपरिपालनम्
करुणामृतपरिपूर्णगुणम् ॥प्र॥
पाञ्चजन्यचक्रपङ्कजपाणिम्
पद्मारमणं भक्तचिन्तामणिम् ॥प्र॥
प्रेमिकभक्तबृन्दकीर्तितम्
बृन्दारकमुनिबृन्दप्रार्थितम् ॥प्र॥

---

कदा वेणातीरे विमलपुलिने मन्दपवने
समासीनः शान्तः
पुलकितवपुर्गद्गदगलः।
हरे कृष्णस्वामिन्
परमकरुणापूर्णहृदय
प्रसीदेत्याक्रन्दन्निमिषमिव नेष्यामि
दिवसान्॥
व्यत्यस्तपादं वनजायताक्षं
वंशीधरं वल्लवराजसूनुम् ।
पीताम्बरं भक्तमनोभिरामं
पश्यामि साक्षात्पुरतो मुकुन्दम् ॥
राधासमालिङ्गितवामभागं
रामाभिरामं रसिकं किशोरम् ।
नानाविभूषं नलिनायताक्षं
श्रीभक्तकोलाहलमाश्रयेहम् ॥
त्यक्त्वा विष्णुपदं महद्भिरमलैस्संसेवितं सूरिभिः
त्यक्त्वा क्षीरसमुद्रप्यमरबृन्दाराधितं पावनम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अर्चारूपमुपेयिवान् करुणया सौलभ्ययुक्तो हरिः
कृष्णारण्यमुपेत्य भक्तिरसिको भक्तैःसदा नन्दति ॥

सहाना - आदि

पश्यत देव शिखामणिमीशं
भक्तकोलाहलं श्रीनिवासम् ।
त्यक्तपरानन्दवैकुण्ठवासम्
भक्तरक्षकं भक्तपुरीवासम् ॥प॥
कटितटशोभितकरयुगलम्
किञ्चित्कुञ्चितपदकमलम् ॥प॥
कनकाम्बरधरमतिसुन्दरम्
करुणारसभृतदिव्यशरीरम् ॥प॥
त्रिगुणातीतं त्रिजगन्नाथम्
त्रिभङ्गिललिताकृतिं श्रीनाथम्॥प॥
मुरलीमण्डितकरकमलम्
मन्दस्मितमधुराधरममलम् ॥प॥
कुटिलश्यामलस्निग्धकुन्तलम्
कुङ्कुमपङ्किलवक्षःस्थलम् ॥प॥
प्रेमिकपूजितचरणाब्जयुगम्
बृन्दावनसञ्चारममोघम् ॥प॥

नामावलिः

कोलाहल भक्तकोलाहल
राधारमण कोलाहल
नन्दनन्दन अरविन्दमुखज्वलित
मन्दहसन नीलोत्पलनयन
क्षीरचोर नवनीतचोर व्रज-
गोपीवसनचोर भक्तचित्तचोर
भक्तवत्सल निजभक्तपरिपाल
भक्तमण्डलमध्यनृत्यकुतूहल

---

कृष्णाय गोकुलेन्द्राय यशोदानन्दनाय च।
बृन्दावनविलोलाय नमो राधाविहारिणे॥

सिन्धुभैरवि - आदि

गोविन्द कृष्ण नन्दबाल हरे
गोपाल कृष्ण नन्दबाल ॥
नन्दकुमार नवनीतचोर
बृन्दावनचर गोविन्द ।
वन्दितमुनिगण मन्दरगिरिधर
मन्दहासानन मुकुन्द ॥गो॥
माधव केशव मधुमुरलीधर
मधुरमयानन्द गोपाल ।
यादवबाल यदुकुलतिलक
यशोदानन्दन गोपाल ॥गो॥
राधालोल रम्यसुचेल
रुक्मिणीचोर सुकुमार ।
प्रेमानन्द पुण्यचरित्र
पुराणपुरुष दधिचोर ॥गो॥

नामावलिः

नन्दबाल नन्दबाल नवजलधरसमनील
गोपाल गोपाल गोपीजनहृदयविलोल



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्यामसुन्दर गोविन्द दर्शनं देहि माधव।
मणिमञ्जीरपादाभ्यां नटनं कुरु नागर॥

भीम्बलास् - त्रिपुट

श्यामसुन्दर कोमलाधर
शिखण्डशेखर रक्ष माम् ।
राधिकाप्रिय गोपिकाप्रिय
रसिकभूषण पाहि माम् ॥
नन्दनन्दन नीरजानन
नटनसुन्दर रक्ष माम् ।
गोकुलेश्वर कोटिमन्मथ-
रूप माधव पाहि माम् ॥
प्रेमिकप्रिय भक्तवत्सल
परमपावन रक्ष माम् ।
रामसोदर रासनर्तन
वेणुवादन पाहि माम् ॥

---

हा हा गोकुलमन्दार गोवर्धनधर प्रभो ।
दामोदर दयासिन्धो धुनोमि विरहेण ते॥

सेञ्चुरुटि - त्रिपुट

गोपिकाजनबन्धो जय
गोपालकरुणासिन्धो ॥
कालीयनर्तन कंसविमर्दन
कमलारमण काममनोहर ॥गो॥
गोकुलपाल गोपीलोल
गोवर्धनधर श्रीगोपाल ॥गो॥
कनकाम्बरधर कौस्तुभहार
कैवल्यप्रद कामशरीर ॥गो॥
बृन्दावनचर भक्तमन्दार
प्रेमाधार रासविहार ॥गो॥

---

जय पद्मपलाशाक्ष जय भक्तवशीकृत ।
जय गोवर्धनोद्धार जय गोपीजनप्रिय॥

कानडा - आदि

जय जय राधे जय जय राधे
जय हरिदयिते जय जय राधे ।
जय जय कृष्ण जय जय कृष्ण
जय राधाप्रिय जय जय कृष्ण ॥
सुन्दरवदने सुमधुरवचने
सरसिजचरणे जय जय राधे ।
श्यामसुन्दर कोमलाधर
सरसिजनेत्र जय जय कृष्ण ॥ज॥
निकुञ्जसदने करुणायतने
निर्मलसुगुणे जय जय राधे ।
नारदवन्दित नीरजचरण
निरवधिकरुण जय जय कृष्ण ॥ज॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बहुविधभूषणे कलहंसगमने
कमलनयने जय जय राधे ।
भक्तवत्सल बृन्दावनेश्वर
प्रेमिकलोल जय जय कृष्ण ॥ज॥

---

शीघ्रमागच्छ गोपाल पाहि मां
भक्तवत्सल।
क्वासि कृष्ण हरे शौरे मुरारे
मुरळीधर॥

पीलु - आदि

नीलमेघश्यामलरूप गोपाल ।
नित्यानन्दस्वरूप कृष्ण गोपाल ॥
देवदेव देवकीबाल गोपाल ।
वासुदेववारिजनेत्र गोपाल ॥
शङ्करादिसेवितचरण गोपाल ।
शङ्खचक्रधरण स्वामि गोपाल ॥
रासलोल राधिकारमण गोपाल।
राजराजमुरलीरसिक गोपाल ॥
प्रेमभक्तमण्डलपाल गोपाल ।
बृन्दावननिकुञ्जलोल गोपाल ॥

---

कृष्णं गोपिकारमणं हरिम् ।
राधिकावल्लभं देवं मधुरानायकं भजे॥

आभोगी - आदि

मधुरानाथ हरे माधव
मङ्गळं देहि शौरे ॥
देवकीवसुदेवदिव्यकुमार
दीनदयापर दामोदर ॥म॥
नन्दयशोदानन्दन कृष्ण
नवनीतचोर नारायण विष्णो ॥म॥
कनकाम्बरधर कमलारमण
कमलविलोचन कल्याणगुण ॥म॥
मेघश्यामळ मङ्गळरूप
नागशयन हरे पद्मनाभ ॥म॥
पुण्यश्लोक पुराणपुरुष
पुण्डरीकाक्ष वैकुण्ठवास ॥म॥
बृन्दावनसञ्चार मुकुन्द
प्रेमिकपूजितपादारविन्द ॥म॥

---

व्यत्यस्तपादं वनमालिनं च
वंशीं सहर्षं मृदु वादयन्तम् ।
राधाकटाक्षेण विलोकयन्तं
वन्दे जगन्मोहनकृष्णदेवम् ॥

हुसेनी - आदि

गोपाल नवमोहन - कृष्ण
गोविन्द जगन्मोहन ॥गो॥
गोवर्धनधर गोपीरमण
गोकुलदधिहरण ।
गिरिधर माधव मुरहर केशव
जय जय मधुसूदन ॥गो॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

राधिकारमण रञ्जितभुवन
रसिकमनोहरण ।
रतिपतिदमन रासविहरण
रमणीजनरमण ॥गो॥
मुदिरश्यामळ मञ्जुललील
मङ्गळगुणशील ।
मुरळीगानलोल मुनिजनपाल
मुग्धप्रेमबाल ॥गो॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## द्वादशनामकीर्तनम्

### शङ्कराभरणम् - त्रिपुट

चिन्तय रे केशवम् सन्ततं ॥चि॥
बृन्दारकगणवन्दितचरणम्
नन्दात्मजमभिनन्दितसुजनम्॥चि॥
मन्दाराम्बुजमालतीमालं
वन्दारुजनगणानन्दितनलीलम्।
मन्दरगिरिधरमम्बुदनीलं
सुन्दरमनुगतसुदतीलोलम् ॥चि॥
कनकाम्बरधरकमनीयकटिं
कटाक्षनिर्जितगोपवधूटिम् ।
कामकोटिसमसौन्दर्यपेटिं
कलितसञ्चारकालिन्दीवनवाटिम्॥चि॥
कुङ्कुमपङ्किलकोमलचरणं
कण्ठविभूषितकौस्तुभाभरणम् ।
कल्पितदधिनवनीतहरणं
कलितप्रेमिकहृदयविहरणम् ॥चि॥

---

### काम्भोदि - त्रिपुट

नारायणं सदा नमाम्यहम् ॥ना॥
नारदमुनिवरकीर्तितसुगुणं
नागाधिपमृदुतल्पशयनम् ॥ना॥
नळिनासनाकरलालितचरणं
नवनीरदनिभाभासितभुवनम् ।
नतजनहृदयतापसंहरणं
नर्मदवीक्षणसुन्दरनयनम् ॥ना॥
शङ्खचक्रगदासरसिजशार्ङ्गधरं
मङ्गळकरमतिसुन्दरशरीरम् ।
तुङ्गवक्षःस्थलतुलसीहारं
कुङ्कुमपङ्किलचरणाब्जबरम् ॥ना॥
पीताम्बरालङ्कृतपृथुश्रोणिं
भक्तजनसङ्गकलिताभयपाणिम् ।
प्रेमिकजनकर्णसुखमधुरवाणिं
प्रसन्नमुखं श्रितजनचिन्तामणिम्
॥ना॥

---

### तोडि - आदि

माधवमहमीडे मङ्गलरूपम् ॥मा॥
यादवकुलाम्बुधि समुदितचन्द्रं
यतिजनमानसकुमुदानन्दम् ॥मा॥
मधुमुरनरकदर्पदलनं
मधुरासरोवरसुन्दरनलिनम् ।
मुरळीगलितमनोरमगानं
मुखरितनूपुरभूषितचरणम् ॥मा॥
वनजायतचारुचञ्चलनेत्रं
वसुदेवदेवकीवाञ्छितपुत्रम् ।
वनमालिनमतिसुन्दरगात्रं
व्यासंसुतादिकीर्तनपात्रम् ॥मा॥
प्रणतार्तिहरं परमदयाकरं



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रेमिकभावुकहृदयविहारम् ।
प्रह्लादादिभक्ताभयङ्करं
प्रथितचरित्रं जगदाधारम् ॥मा॥

---

भूपाळम् - आदि

पालय नमस्ते श्रीगोविन्द ॥पा॥
पालितसकलभक्तमण्डल
भूषितकनकमकरकुण्डल ॥पा॥
गोपीजनकुचकुङ्कुमपङ्किल
गोपालबालककेलिविलोल ।
गोवर्धनधर गोकुलपाल
गोवत्सनिकरपोषणशीला ॥पा॥
राधिकारमण रञ्जितभुवन
राजीवायतसुन्दरनयन ।
रामसहोदर त्रिजगन्मोहन
रमणीरञ्जक मुरळीगान ॥पा॥
बृन्दावनान्तरकुञ्जविहार
मन्दहासमुख श्यामसुन्दर ।
नन्दकिशोर नवनीतचोर
नन्दितप्रेमिकहृदयाधार ॥पा॥

---

आनन्दभैरवि - त्रिपुट

परमपुरुषाय विष्णवे नमः ॥प॥
सुरमुनिमण्डलसेवितचरणाय
सुन्दरसुवर्णदिव्याभरणाय ॥प॥
गरुडासनाय कौस्तुभभूषणाय
कमलासनादिककल्पितपूजनाय ।
गङ्गाजनकाय कमलाजीवनाय
गजराजादिनिजभक्तपोषणाय ॥प॥
दुरितशमनाय द्रौपदीपालनाय
दुष्टदुर्गमाय दूरीकृतकालाय ।
दूर्वादलसमश्यामलकोमलाय
ध्रुवराजवन्दितचरणकमलाय ॥प॥
कनकाम्बराय कंसहराय
कमनीयशरीराय कल्याणकराय ।
कमलकराय कमलावराय
कह्लारहाराय प्रेमिकेश्वराय ॥प॥

---

मोहनम् - आदि

मधुसूदन मां पाहि - हरे
मङ्गळं मम देहि ॥म॥
यदुकुलकमलोत्सवकर भास्कर
यतिजनहृदयाकाशवराकार ॥म॥
मधुरानायक मङ्गळरूप
मन्दहासमुख शमितभवताप ।
मुनिजनहृदयभवनसुदीप
मुदिरश्यामळ सुन्दरशोभ ॥म॥
परमपुरुष भक्तवत्सल
पद्मासनार्चितपदकमल ।
प्रकटितनिगमार्थ लीलाविलोल



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रपन्नजनप्रिय प्रह्लादपाल ॥म॥
पतितोद्धारण परमानन्द
पावनचरित्र भगवन्ननन्त ।
प्रेमिकहृदयोद्यानवसन्त
परमाद्वैतरससुखगन्ध ॥म॥

---

बिलहरि - आदि

चिन्तय रे हृदये त्रिविक्रमम् ॥चि॥
चिन्तितसकलकामदकल्पकं
चिन्मयविग्रहं सुन्दरं सुभगम् ॥चि॥
वेदवेदाङ्गवेदान्तवेद्यं
वनजासनप्रमुखार्पितपाद्यम् ।
वन्दितनिजजनभवरोगवैद्यं
विनतासुतवाहनमजमाद्यम् ॥चि॥
विश्वव्यापकं विराट्स्वरूपं
विष्णुं निरामयं विरहिततापम् ।
विधिसम्भवपदसरसिजनाभं
विश्वाश्रयं हरिं करधृतसुनाभम् ॥चि॥
बलिदर्पदलनपवित्रचरित्रं
ललितप्रेमिकहृदयाब्जमित्रम् ।
कलिकल्मषहरं घनश्यामगात्रं
कलितसुरेन्द्रप्रियं कञ्जनेत्रम् ॥चि॥

---

मध्यमावति - आदि

भावय रे सन्ततं श्रीवामनम् ॥भा॥
भावुकहृदयभावितरूपम्
भव्यगुणालयं भजनसुलभम् ॥भा॥
कमनीयाननं कश्यपनन्दनं
कमलारमणं कमलचरणम् ।
करुणाकरं कलिकल्मषहरणं
कैवल्यप्रदं कौस्तुभाभरणम् ॥भा॥
इन्द्रसेनपरिपूजितपादं
इन्द्रादिसुरगणवाञ्छितवरदम् ।
इन्द्रनीलप्रभं इन्दिरानाथं
चन्द्रमुखं साधुमानसशीतम् ॥भा॥
निगमसङ्कीर्तितनिर्मलचरितं
नित्यानन्दरसवरभरितम् ।
निर्गुणं नीलनीरद ललितं
निरवधिकृपया प्रेमिकमिलितम् ॥भा॥

---

सावेरी - आदि

भज रे मानस श्रीधरं वारं वारम् ॥भ॥
भजदार्तिहरं परमकृपाकरम्
भवसिन्धुपतितजनपालनकरम् ॥भ॥
नारदमुनिवरमनोरमलीलं
नवनवकिसलयतुलसीमालम् ।
नीरदनीलसुन्दरं निर्मलं
निरवधिपरमानन्दविलोलम् ॥भा॥
श्रीवत्साङ्कितविपुलवक्षसं
श्रितजनहृदयकमलनिवासम् ।
शृङ्गाररसबहुरम्यविलासं



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीकरलालितचरणं मृदुहासम्॥भ॥
भोगिशयनं भुवनैकमूलं
भानुमण्डलमध्यविलोलम् ।
भक्तजनतापतूलवातूलं
भावुकप्रेमिकगणपरिपालम् ॥प॥

## हुसेनि - रूपकम्

हृषीकेशमहं हृदये भावये ॥हृ॥
ऋषिगणभाषणभूषणसुगुणम् ॥हृ॥
शरणागतपरिपालनव्रतमम्बुजचरणं
करुणार्णवं कमलापतिं
क्षीरार्णवसुखसुप्तम्।
तरुणारुणकरपल्लवपरिपालितनिजभ
क्तं
धरणीधरमिह
भक्तहृदयप्रियपाशबद्धम्॥हृ॥
कमलासनहरिशङ्करकरपूजितचरणं
कमलाननं
वरकौस्तुभधरमद्भुताभरणम्।
अमलाशयनुतमीश्वरमभिरञ्जितसुज
नं
विमलाम्बरमतिसुन्दरं
नलिनायतनयनम्॥हृ॥
निजप्रेमिकनिरुपाधिकसुखसागरवरदं
व्रजमण्डलपरिकल्पितरसपूरितचरित
म् ।
गजरक्षकमरिशिक्षणकरकल्पितवरच
क्रं
भजदार्तिहरणकेळिं
कुलमन्दिरहृततक्रम्॥हृ॥

## आरभि - आदि

भज रे मानस श्रीपद्मनाभम्
भक्तजनहृदयमन्दिरदीपम् ॥भ॥
गजराजविपद्धरणचरित्रम्
व्रजराज बहुवाञ्छितपुत्रम् ॥भ॥
कण्ठशोभितकौस्तुभाभरणं
कनकनूपुरभूषितचरणम् ।
कमलविलोचनं कमलारमणं
कामरहितहृदयविहरणम् ॥भ॥
अप्रमेयं परिपूर्णं पुराण-
मव्ययमाद्यं नित्यकल्याणम् ।
अमृतं कूटस्थं पुरुषं निर्गुणं
अव्यक्तं क्षेत्रज्ञं
भक्तमङ्गळगुणम्॥भ॥
मङ्गळकरबहुरम्यविग्रहं
गङ्गाजनकचरणाम्बुरुहम् ।
शङ्खचक्रधरं निरामयं निरीहं
किङ्करप्रेमिकमोहनिग्रहम् ॥भ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## कल्याणि - आदि

ध्यायाम्यहं सदा दामोदरम् ॥ध्या॥
जायासूतादिचिन्तानिग्रहं
मायारहितमङ्गळविग्रहम् ॥ध्या॥
नन्दमन्दिरोलूखलनिबद्धं
नारदकीर्तितलीलाप्रबन्धम् ।
नतजनहृदयप्रणयसुबद्धं
नलिनचरणमादृतभक्तम् ॥ध्या॥
यमुनातीरलोलं यतिचित्तरञ्जनं
यमळार्जुनतरुवरभञ्जनम् ।
यदुकुलभूषणं नयनकृताञ्जनं
यशोदावदनकमलकञ्जनम् ॥ध्या॥
व्याघ्रनखमणिमण्डितकण्ठं
व्याससुतशुभहृदयोत्कण्ठं ।
वासुदेवं भक्तमिळितवैकुण्ठं
व्यसनहरं शुद्धप्रेमरसमखण्डम्॥ध्या॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कीर्तनावलिः

सीता सीतेति मधुरं जपन्तं सुस्वरं सदा ।
तं वन्दे राजगोपालदेशिकं वैष्णवोत्तमम्॥
आलोड्य दिव्यसूरीणां श्रीसूक्तिरससागरम्।
दीयते प्रेमिकेन्द्रेण गृहीत्वा कीर्तनावलिः॥

कुन्तलवरालि - आदि

जय जय गोदे गोविन्ददयिते
जय जय मङ्गंलरूपिणि वनिते॥ज॥
जय जय विष्णुचित्तनन्दिनि
जय जय वैष्णवबृन्दजननि ॥ज॥
जय जय कोकिलमञ्जुलभाषिणि
जय जय कोमलमृदुलहासिनि ॥ज॥
जय जय कुड्मलभूषितवेणि
जय जय कुन्दरदने कल्याणि ॥ज॥
जय जय रङ्गराजविलासिनि
जय जय रागद्वेषविनाशिनि ॥ज॥
जय जय कृष्णप्रेमिकस्वामिनि
जय जय देवि हंसगामिनि ॥ज॥

नामावलिः

गोदारङ्ग राधाकृष्ण

माण्डु - आदि

वेङ्कटकृष्ण वेङ्कटकृष्ण
शीघ्रमागच्छ
वेङ्कटकृष्ण वेङ्कटकृष्ण
शीघ्रमागच्छ॥
कङ्कणहस्त किङ्किणिपाद
मङ्गलविग्रह
गङ्गाजनक करुणापाङ्ग भक्तानुग्रह ॥वे॥
नन्दकुमार नवनीतचोर नलिनदलेक्षण
नित्यानन्द नित्यमहोत्सव
नवनवभूषण॥वे॥
धैयत्तिगुतिगुधैयत्तिगुतिगुताण्डवसुन्दर
देवकीनन्दन दीनदयापर देव
दामोदर॥वे॥
श्यामलवर्ण कोमलाधर
कामितशुभवरद
कमलारमण कलभगमन
कनकाम्बरललित॥वे॥
भव्यगुणालय परमदयालो
भक्तकोलाहल
प्रेमिकभावुकभावितपाद
बृन्दावनभूपाल॥वे॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## वरालि - आदि

करिराजवरदं भजामि हस्ति-
गिरिराजनिलयं भजामि ॥क॥
गिरिशादिसुरगणविनुतं श्री
हरिमार्तिहरणमनन्तम् ॥क॥
घनश्यामसुन्दरशरीरम् भक्त
जनसङ्घमध्यविहारम् ॥क॥
वरदाभयहस्तममोघम् निज
करशोभितसुदर्शनशङ्खम् ॥क॥
निजप्रेमिकभक्तवत्सलं मत्त
गजराजगमनं दयाशीलम् ॥क॥

---

## कमास् - आदि

एहि वरद देहि अभयम् ॥ए॥
गजेन्द्रवरद देहि अभयम्
द्विजेन्द्रवरद देहि अभयम् ॥ए॥
अक्रूरवरद देहि अभयम्
अर्जुनवरद देहि अभयम् ॥ए॥
ध्रुवराजवरद देहि अभयम्
द्रौपदीवरद देहि अभयम् ॥ए॥
अम्बरीषवरद देहि अभयम्
आञ्जनेयवरद देहि अभयम् ॥ए॥
रुक्माङ्गदवरद देहि अभयम्
रुक्मिणीवरद देहि अभयम् ॥ए॥
प्रह्लादवरद देहि अभयम्
प्रेमिकवरद देहि अभयम् ॥ए॥

---

## कापि - आदि

तव चरणाम्बुजच्छायायां मम
दयया वासं देहि श्रीराम ॥तव॥
भवकमलासनबलारिप्रमुख-
बृन्दारकसेव्यचरण सुमुख ॥तव॥
तव पुण्यतटाके मीनो भवामि वा
तव दिव्यमन्दिरे स्तम्भो भवामि वा।
तव पुष्पवनेपि तरुर्भवामि वा
तव दास्यरसिको भृत्यो भवामि
वा॥तव॥
कामये नाहं साम्राज्यसिद्धिं
कामये नाहं पारमेष्ठ्यप्राप्तिम् ।
कामये नाहं कैवल्यमुक्तिं
कामये तवैव चरणाब्जभक्तिम् ॥तव॥
शेषगिरिवास श्रितजनसोम
श्रीनिवास केशव सत्यकाम।
शिशुपालकंसरावणभीम
श्रीधर प्रेमिकहृदयाराम ॥तव॥

---

## मोहनम् - आदि

पश्यत दीर्घबाहुं भक्ताः ॥प॥
अश्वमारुह्य विहरन्तं
विश्वानुकूलं भगवन्तम् ॥प॥
घनश्यामलकोमलरूपं



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मन्दस्मितमुखं पद्मनाभम् ।
मुनिजनहृदयसदनदीपं
माधवं मङ्गलकरप्रतापम् ॥प॥
करधृतकनककोदण्डं
कौस्तुभशोभितकम्बुकण्ठम् ।
कलिकलुषतमोमार्ताण्डं
कङ्कणभूषितभुजदण्डम् ॥प॥
प्रेमिकमानसमोहनं
बृन्दारकगणपालनम् ।
परमपुरुषं मधुसूदनं
पापहरं श्रीनारायणम् ॥प॥

नामावलिः

गोविन्द सुन्दर मोहन
दीनमन्दार गरुडवाहन
भवबन्धाब्दि दुष्कर्मदहन
भक्तवत्सल त्रैलोक्यपावन

---

मध्यमावति - आदि

पद्मनाभं भजे पद्मनाभम्
भक्तबृन्दसेव्यमानं पद्मनाभम् ॥प॥
पद्मासनभवशक्रभास्करादिपूज्यमान -
पादपद्मं पद्मनेत्रं
पद्माभूमिपतिमेनम्॥प॥
योगनिद्रामीलिताक्षं योगिवर्यगणपक्षम्
यागफलदानदक्षं
लोकत्रयाधीशाध्यक्षम्॥प॥
शेषतल्पन्यस्तगात्रं चन्द्रसूर्यसमनेत्रम्
शरणागतोद्धारगोत्रं
शङ्करादिसुरमित्रम्॥प॥
पराङ्कुशभाव्यमानपादयुग्मं
नारायणम्
प्रेमिकेन्द्रगीयमानपराक्रमं
सुनिदानम्॥प॥

नामावलिः

कमलनयन वासुदेव पाण्डुरङ्ग पाहि माम्
पद्मनयन पद्मचरण पद्मनाभ पाहि माम्

---

सावेरी - आदि

भज रे मानस श्रीनरसिंहम् ॥भ॥
भजदार्तिहरं परमदयाकरम्
भवबन्धनहरं भव्यगुणाकरम् ॥भ॥
सिंहाद्रिकूटकुहरनिवासिनं
सिन्दूरारुणकेशाभरणम् ।
श्रीवत्साङ्कितं कौस्तुभधरणं
श्रीपरिभूषितवामाङ्करमणम् ॥भ॥
भक्तोत्तमप्रह्लादपरिपालं
भवब्रह्मादिसुरगणमूलम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भगवन्तं मुनिभावितलीलं
भक्तिसुलभं कमलालोलम् ॥भ॥
परमदयारसपूरितहृदयं
परमपवित्रं विरहितमायम् ।
पतितोद्धारणकरकलिताभयं
प्रेमिकपालं प्रशमितापायम् ॥भ॥

---

सिंहेन्द्रमध्यमम् - आदि

प्रह्लादवरद शरणं शरणं
प्रसन्ननरसिंहम शरणं शरणं ॥
ब्रह्मादिविनुत शरणं शरणं
भृगुमुनिपूजित शरणं शरणं ॥

मुचुकुन्दनायक शरणं शरणं
मुकुन्द गोविन्द शरणं शरणं ॥
पद्मामनोहर शरणं शरणं
पङ्कजलोचन शरणं शरणं ॥
पाञ्चजन्यधर शरणं शरणं
पाञ्चालीरक्षक शरणं शरणं ॥
शक्रादिसन्नुत शरणं शरणं
चक्रपाणे कृष्ण शरणं शरणं ॥
प्रेमिककीर्तित शरणं शरणं
भक्तकोलाहल शरणं शरणं ॥

---

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम्
।
तेषु तेष्वचलाभक्तिरच्युतास्तु सदा त्वयि॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी
।
त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु
॥

सुरुटि - आदि

एहि मुदं देहि गोपाल
देहि तव दास्यं श्रीलोल ॥ए॥
पाहि भक्तजनं भूपाल
परमदयाकर भक्तकोलाहल ॥ए॥
किं बहुमानेनान्येन
कटाक्षं कलय कारुण्येन ।
कैङ्कर्यमेव वयं दैन्येन
कृष्ण याचामः पूर्वपुण्येन ॥ए॥
जन्मनि जन्मनि तव दास्यं
जनार्दन भवतु यशस्यम् ।
जलजसंभवाद्यभिवाञ्छ्यं
जगदीश देहि विनाऽऽलस्यम्॥ए॥
वारय काममन्यविषये
कारयास्मद्बुद्धिं त्वद्विषये ।
चारय प्रेमिकजनं कैङ्कर्ये
स्मारय तव नाम चरमसमये ॥ए॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीरागः - आदि

गोपाल गोपाल
गोकुलनन्दन गोपाल ॥गो॥
नन्दकुमार नवनीतचोर
बृन्दावनचर गोपाल ॥गो॥
कंसध्वंसन कालीयनर्तन
कावलम्पाडिगोपाल ॥गो॥
यशोदाबाल यदुकुलतिलक
यक्षशापहर गोपाल ॥गो॥
नित्यानन्द नित्यमहोत्सव
निर्मलरूप गोपाल ॥गो॥
वेणुविलोल विजयसहाय
वेदान्तवेद्य गोपाल ॥गो॥
भक्तवत्सल भागवतप्रिय
प्रेमिकरक्षक गोपाल ॥गो॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीरङ्गशतकम्

जयतु जयतु लोके मङ्गळं रङ्गधाम
जयतु जयतु दिव्यं रङ्ग रङ्गेति नाम
।
जयतु जयतु देवो वेदवेद्यः स भूमा
जयतु जयतु देवी प्रेमकारुण्यसीमा॥

नाट्टै - आदि

जय जय जय श्रीरङ्गविभो
जय विजयी भव श्रीरङ्गविभो ॥
जय जय कमलासनसंपूजित
जय जय कमलबन्धुवंशार्चित ।
जय जय कमलाकुचकुम्भाङ्कित
जय जय कमलसुन्दरपाद ॥ज॥
जय जय राघवकरनीराजित
जय जय रजनीचरसंस्थापित ।
जय जय राजराजविराजित
जय जय रम्यकवेरजालिङ्गित
॥ज॥
जय जय बाणादिभक्तसमर्चित
जय जय भाष्यकारसमाश्रित ।
जय जय प्रेमिकभावुकगीत
जय जय भक्तमण्डलनाथ ॥ज॥

---

सप्तप्राकारमध्ये सरसिजमुकुलोद्भासमाने विमाने
कावेरीमध्यदेशे
मृदुतरफणिराड्भोगपर्यङ्कभागे ।
निद्रामुद्राभिरामं
कटिनिकटशिरःपार्श्वविन्यस्तहस्तं
पद्माधात्रीकराभ्यां परिचितचरणं
रङ्गराजं भजेहम्॥

काम्भोजि - आदि

परिमलरङ्गं प्रणमामि - निज
भक्तजनप्रियं भजामि ॥प॥
पद्माधरणीपरिचितचरणम्
पद्मदलाक्षं भव्यसुगुणम् ॥प॥
कावेरीतटनिलयं कामित-
फलदं करुणावारिनिधिम् ।
कालाम्बोधर कमनीयविग्रहं
पालितप्रेमिकं कलभगतिम् ॥प॥

नामावलिः

कस्तूरिरङ्ग कावेरीरङ्ग श्रीरङ्गरङ्ग
गरुडगमनरङ्ग शेषशयनरङ्ग
श्रीरङ्गरङ्ग

---

रमादयित रङ्गभूरमण कृष्ण विष्णो हरे
त्रिविक्रम जनार्दन त्रियुग नाथ नारायण ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इतीव शुभदानि यः पठति नामधेयानि ते
न तस्य यमवश्यता नरकपातभीतिः कुतः॥

सेञ्चुरुट्टि - आदि

राजराजराजराजराजशेखर
रङ्गराज देवराज राजसुन्दर ॥रा॥
राघवेन्द्र राक्षसेन्द्रराजपूजित
राजराजपूज्ययतिराजसेवित ॥रा॥
पाण्ड्यचोलचेरराजवंशदैवत
पद्मनाभ पद्मपाद परमशास्वत ॥रा॥
पद्ममत्तभूतयोगिचित्तमन्दिर
भक्तिसारभक्तपादरेणुमनोहर ॥रा॥
विष्णुचित्तवकुलभूषकलिहकीर्तित
विष्णुचित्तनन्दिनीश
विश्ववन्दित॥रा॥
बाणभक्तभव्यकुलशेखरार्चित
भावभक्तिपूर्णनिजप्रेमिकार्चित॥रा॥

---

लक्ष्मीं क्षीरसमुद्रराजतनयां
श्रीरङ्गधामेश्वरीं
दासीभूतसमस्तदेववनितां
लोकैकदीपाङ्कुराम्।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम्॥

मध्यमावती - आदि

स्वागतं स्वागतं स्वागतं जननि
स्वाधीनहरिवक्षःस्थलपीठरमणि॥
वरलक्ष्मि वैष्णवि वैकुण्ठवनिते
वन्दनमस्तु ते वामनदयिते ॥
कल्याणरूपिणि कलशाब्धितनये
कलयामि चरणौ ते कमले मम हृदये॥
वैदेहि रघुवीरप्रियपट्टमहिषि
वैदर्भि यदुवीरप्रियपट्टमहिषि ॥
भृगुवारपूजनमङ्गीकुरु दयया
भार्गवि पाहि मां प्रेमिकं परया ॥

---

प्याकट - आदि

अद्य मे जन्म सफलम् रङ्गेश
अद्य मे कर्म सफलम् ॥
सत्यस्वरूप सत्यकाम
सकलसुरगणसार्वभौम ॥अ॥
तव दर्शनेन नयनं सफलं
तव स्मरणेन हृदयं सफलम् ।
तव कीर्तनेन वदनं सफलं
तव वन्दनेन शिरो मे सफलम्॥अ॥
तव तीर्थयात्रया चरणौ सफलौ
तव दास्येन हस्तौ सफलौ ।
तव कथाश्रवणेन कर्णौ सफलौ



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तव भक्तस्य मे पितरौ सफलौ
॥अ॥
तव भक्तस्य मे शीलं सफलं
तव भक्तस्य मे कुलं सफलम् ।
तव भक्तस्य मे प्रेम सफलं
तव भक्तस्य मे नाम च सफलम्॥अ॥

---

भागेश्री - आदि

पाहि मां पाहि मां दीनबन्धो
परिमलरङ्ग करुणासिन्धो ॥
रोहिणीनन्दनसोदरभाव
लोहितसरसिजलोचन देव ॥पा॥
अहैतुकी करुणा तव स्वभावः
अश्रद्धा त्वयि मम स्वभावः ।
आश्रितवात्सल्यं तव स्वभावः
अविश्वास एव मम स्वभावः ॥पा॥
अपेक्षा मयि किल तव स्वाभावः
उपेक्षा त्वयि बत मम स्वभावः।
आतुरता मयि तव स्वभावः
अनादर एव मम स्वभावः ॥पा॥
अव्याजप्रेम तव स्वभावः
अर्थार्थित्वं मम स्वभावः ।
आश्रितपोषणं तव स्वभावः
अच्युतदूषणं मम स्वभावः ॥पा॥

---

कमास् - आदि

भज रे रङ्गनाथं मानस ॥भ॥
पङ्कजनयनं पन्नगशयनं
कुङ्कुमचरणं सङ्कटहरणम् ॥भ॥
वारिदनीलं नारदपालं
निर्मलशीलं नीलालोलम् ॥भ॥
ब्रह्मादिविनुतं पालितद्विरदं
प्रेमिकगीतं पद्मानाथम् ॥भ॥

---

विनतासुतवाहन भव्यमते
विधिसन्नुतपादसरोजवर ।
विमलाशयमानसहंस हरे
विजयी भव रङ्गपुरीश हरे॥

कल्याणि - आदि

वासुदेव वनजायतलोचन
वासवादिनुत वन्दनं ते ॥वा।
भासमानबहुविधभूषण
हासशोभितमृदुमधुरसंभाषण ॥वा॥
वैनतेयविपुलांसनिकेतन
वेदवेद्यवैभव मधुसूदन ।
विधिभवमुखनुत वररङ्गसदन
विरहितभवदुःख प्रेमिकरमण ॥वा॥

---

फणिवरमृदुतल्पे योगनिद्राविलासं
सरसमनुभवन्तं श्रीधरासेव्यमानम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सरसिजदलनेत्रं सत्यकामं पवित्रं
रमितसुजनसङ्गं रङ्गराजं भजेहम् ॥

खरहरप्रिया - त्रिपुट

पश्यत पश्यत परमपुरुषम्
भक्तजनानन्दवर्धनवेषम् ॥प॥
घुष्यमाणदिव्यप्रबन्धगीतं
सस्यसमनीलं सज्जनविनुतम् ॥प॥
भूलोकवैकुण्ठश्रीरङ्गनगरे
सालोक्यसानन्दसूरीणां निकरे ।
आलोलप्रेमिकसेवार्थिसागरे
मालोलं महामणिमण्टपान्तरे ॥प॥

---

मोहनम् - आदि

कस्तूरीरङ्गं पश्यामि कलित-
करुणापाङ्गं भजामि ॥क॥
कौस्तुभशोभितकम्बुकण्ठं
मस्तकशोभितमणिमकुटम् ॥क॥
कावेरीतटरम्यकानने
कनकमयदिव्यरङ्गविमाने ।
कमलाधरणीरमणं सुदिने
कमनीयसुन्दरवदनं जाने ॥क॥
नान्यमितःपरं द्रष्टुमिच्छामि
नाहं परमपदमपि गच्छामि ।
नयनयुगं मे सफलं मत्स्वामी
नयनपथमाप मातङ्गगामी ॥क॥
मरुवकदमनकमल्लीमालिनं
मरकतमणिमयदिव्यविभूषणम् ।
मनोहरमङ्गळमञ्जुळरूपिणं
मन्दस्मितमुखं प्रेमिकपोषणम्॥क॥

---

ऐश्वर्यमक्षरगतिं परमं पदं वा
कस्मैचिदञ्जलिपरं वहते विधीर्य ।
अस्मै न किञ्चिदुचितं
कृतमित्यताम्ब
त्वं लज्जसे कथय कोयमुदारभावः॥

आनन्दबैरवि - आदि

भगवति जननि पालय माम् सौ-
भाग्यविवर्धिनि पालय माम् ॥
जगति त्वां विना कारुण्यविवशं
जानामि नाहं दैवं सरसम् ॥भ॥
अपराधान् मम न हि पश्यसि
कृपया वीक्ष्य मां परितुष्यसि ।
उपगत्य मयि प्रेम करोषि
उपमारहितं दैवतमसि ॥भ॥
पद्मनाभप्रियमहिषि रमे
पद्मासनस्थिते देवि पद्मे ।
पद्मविलोचने तव पादपद्मे
पद्मिनि प्रेमभक्तिं देहि मे ॥भ॥
कुङ्कुमहरिद्रापङ्किलचरणे
मङ्गळरूपिणी मणिमयाभरणे ।
रङ्गनिवासिनि रमणीयवदने



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

किङ्करप्रेमिकसुखदवचने ॥भ॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीतीर्थशतकम्

कमलसदृशनेत्रं काळमेघाभगात्रं
कनकमयविभूषं कुन्दमन्दारहासम् ।
गरुडवरतुरङ्गं गोपकन्याभुजङ्गं
कटिविनिहितहस्तं पाण्डुरङ्गं भजेहम्॥

शङ्कराभरणम् - त्रिपुट

पाण्डुरङ्गमहं प्रणमामि ॥पा॥
पुण्डरीकमुनिवरप्रदम्
पुण्डरीकाक्षं भुवनैकनाथम् ॥पा॥
पण्डरीक्षेत्रनिलयं देवं
पण्डितमण्डलप्रथितप्रभावम् ।
कुण्डलशोभितगण्डं केशवं
खण्डेन्दुशेखरविनुतं माधवम् ॥पा॥
इन्द्रादिसुरगणशोकहरं
चन्द्रभागातटवनसञ्चारम् ।
सान्द्रनवाम्बुदसमशरीरं
मन्त्रतन्त्रयन्त्रबहुदूरम् ॥पा॥
भौमादिरिपुजनसंहारिणं
भामादिपट्टमहिषीविहारिणम् ।
भूमानं भूधरवरधारिणं
भीमानुजप्रेमवर्धनकारिणम् ॥पा॥

नामावलिः

जय् जय् विट्टल पाण्डुरङ्ग
जय् हरि विट्टल पाण्डुरङ्ग

---

हिहीहीहीकारान् प्रतिपशुवने कुर्वति
सदा
नमद्ब्रह्मेशेन्द्रप्रभृतिषु च मौनं
धृतवति।
मृगाक्षीभिः
स्वाक्षीनवकुवलयैरर्चितपदे
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे॥

काम्बोजि - आदि

श्रीनाथमहं श्रयामि ॥श्री॥
दीनानाथशरण्यं मान्यम्
देवाधिदेवं देवकीपुण्यम् ॥श्री॥
गोवर्धनगिरिधरं गोपालम्
गोपीजनवल्लभं घननीलम् ॥श्री॥
नाथद्वारापुरनिलयम्
नमतां कल्पकमव्ययमभयम् ॥श्री॥
प्रेमिकभावुकभक्तिफलम्
ब्रह्मादिकसुरबृन्दमूलम् ॥श्री॥

---

जाम्बूनदोष्णीषविराजिमुक्ता-
मालामणिद्योतिशिखण्डितास्यः ।
भङ्ग्या नृणां लोलुपयन् दृशः श्री-
गोविन्ददेवः शरणं ममास्तु ॥

सिंहेन्द्रमध्यमम् - आदि

गोविन्दमहं भजामि ॥गो॥
गोपीजनगणपरमानन्दम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गोकुलनन्दनमानन्दकन्दम् ॥गो॥
जलजविलोचनं केशवम्
जयपुरवासिनं माधवम् ॥गो॥
बृन्दावनचरं श्रीधरम्
प्रेमिकभक्तमनोहरम् ॥गो॥

---

कटिकृतवरभङ्गन्यस्तजङ्घान्यज
ङ्घः
करयुगधृतवंशीं न्यस्य बिम्बाधराग्रे ।
सुमधुरमतितिर्यग् ग्रीवया वादयंस्तां
स्फुरति मदनपूर्वः कोपि गोपाल एषः॥

सुरुटि - आदि

मदनमोहनं स्मरामि ॥म॥
वदनविराजितमृदुहासम्
व्यत्यस्तपादं गोकुलेशम् ॥म॥
वृषभानुसुताप्राणेशम्
वल्लववनिताकृतरासम् ॥म॥
बृन्दावनसञ्चारमनन्तम्
प्रेमिकपोषणमानन्दकन्दम् ॥म॥

---

आस्ये हास्यं तत्र माध्वीकमस्मिन्
वंशीं तस्यां नादपीयूषबिन्दुः ।
तद्वीचीभिर्मज्जयन् भाति गोपी-
र्गोपीनाथः पीनवक्षा गतिर्नः ॥

केदारगौलम् - आदि

गोपीनाथं कलयामि ॥गो॥
गोपालं व्रजभूपालम्
गोकुलबालं घननीलम् ॥गो॥
नन्दयशोदानन्दितलीलम्
बृन्दारण्ये राधालोलम् ॥गो॥
प्रेमिकमानसदधिचोरम्
भक्तमण्डलमध्यविहारम् ॥गो॥

---

व्यत्यस्तचरणाम्भोजं त्रिभङ्गिललिताकृतिम्
पीताम्बरपरीधानं राधिकारमणं भजे॥

शङ्कराभरणम् - आदि

राधारमणं रमयामि ॥रा॥
गीतामोदितबृन्दारण्यम्
नाथं नन्दयशोदापुण्यम् ॥रा॥
रासक्रीडारसिकं कृष्णम्
रमणीयमण्डलमण्डनतृष्णम् ॥रा॥
यमुनातीरविहारं जारम्
यमलार्जुनभञ्जनं सुकुमारम् ॥रा॥
प्रेमिकमानसचोरं धीरम्
व्रजबालकवरनिजपरिवारम् ॥रा॥

---

यस्याः कदापि वसनाञ्चलखेलनोत्थ-
धन्यातिधन्यपवनेन कृतार्थमानी ।
योगीन्द्रदुर्गमगतिर्मधुसूदनोपि
तस्या नमोस्तु वृषभानुभुवो दिशेपि॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

देष् - आदि

राधावल्लभं रञ्जयामि ॥रा॥
राधालिङ्गितवामभागम्
राधाचुम्बितं महाभागम् ॥रा॥
राधावदनचन्द्रचकोरम्
राधावक्षःस्थलमणिहारम् ॥रा॥
राधाप्रेमरसमुग्धम्
राधाजीवननिधिं विमुग्धम् ॥रा॥

---

अनुपमकरशाखोपात्तराधाङ्गुलीको
लघु लघु कुसुमानां पर्यटन्
वाटिकायाम्।
सरभसमनुगीतश्चित्रकण्ठीभिरुच्चै-
र्व्रजनवयुवतीभिर्भाति कुञ्जे विहारी॥

मलयमारुतम् - आदि

बाङ्केविहारिणं भजामि ॥बा॥
सङ्केतीकृतमञ्जुलकुञ्जे
सहितं राधया किसलयमञ्जे ॥बा॥
मोहनमुरलीवादनरसिकम्
मोदकरं व्रजमहितममोघम् ॥बा॥
ललितत्रिभङ्गिलावण्यमूर्तिम्
ललितादिसखीप्रेमपरिपूर्तिम् ॥बा॥

---

व्यत्यस्तपादं वनजायताक्षं
वंशीधरं वल्लवराजसूनुम् ।
पीताम्बरं भक्तमनोभिरामं
पश्यामि साक्षात्पुरतो मुकुन्दम् ॥

शङ्कराभरणम् - त्रिपुट

नन्दकुमारं भजाम सन्ततम् ॥न॥
बृन्दावनचरं बृन्दारकगण-
वन्दितचरणं वन्दारुमन्दारम् ॥न॥
कामकोटिसमं श्यामसुन्दरम्
वामाक्षीबृन्दकामविहारम् ॥न॥
यमुनातीरसञ्चारं धीरम्
यदुवीरं हरिं सुकुमारम् ॥न॥
भव्यगुणालयं भक्तवत्सलम्
प्रेमिकलोलं भक्तकोलाहलम् ॥न॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

राघवशतकम्

कोदण्डमण्डितकरं कमलायताक्षं
सीतासमाश्रितभुजं जगतां शरण्यम्।
आजानुबाहुममरार्चितपादपद्मं
पीताम्बरं रघुवरं शरणं प्रपद्ये ॥
राजाधिराजतनयं रघुवंशनाथं
राकेशचारुवदनं रमणीयगात्रम् ।
रक्षःकुलप्रशमनं रमितं मुनीन्द्रैः
रक्षाकरं त्रिजगतां प्रणमामि रामम्॥
यस्य स्मरणमात्रेण रामभक्तिः प्रजायते।
तं वन्दे रङ्गनाथार्यं रामायणपरायणम् ॥
वारुणिकवितासागरमथितं
मारुति हृदयानन्दनममृतम् ।
प्रेमिकरचितं भावुकरसितं
राघवशतकं गायत मधुरम् ॥

नाट्ट - आदि

जय विजयी भव श्रीरघुवीर ॥
जय जय दशरथराजकुमार
जय जय करुणापारावार ।
जय जय कोदण्डमण्डितकर
जय जय जनकसुतामनोहर ॥ज॥
जय जय लक्ष्मणपूजितपाद
जय जय साकेतनगरीनाथ ।
जय जय सुग्रीवराज्यप्रद
जय जय रघुवरपरमानन्द ॥ज॥
जय जय मुनिगणमण्डलदास
जय जय मारुतिहृदयनिवास ।
जय जय जानकीमनोज्ञविलास
जय जय प्रेमिकशोकविनाश ॥ज॥

---

यो दण्डकारण्यनिशाचरेन्द्रान्
कोदण्डलीलाविषयी चकार ।
वेतण्डशुण्डायतदीर्घबाहुः
कोदण्डपाणिःकुलदैवतं नः ॥

रीतिगौळ - आदि

मामककुलदेव मारीचान्तक
मारुतिसेवित श्रीराघव ॥मा॥
माधव केशव मधुरमृदुहास
मोहनसुन्दरवदन श्रीराघव ॥मा॥
स्वागतं स्वागतं शरणागतजन-
रक्षणदीक्षापाङ्ग श्रीराघव ॥मा॥
कनकाम्बरधर कौस्तुभभूषण
कौसल्यानन्दन श्रीराघव ॥मा॥
मदगजगमन मुनिजनरमण
मनसिजलावण्य श्रीराघव ॥मा॥
कोमलचरण कोदण्डभूषण
कर्णान्तलोचन श्रीराघव ॥मा॥
श्यामळसुन्दर नानामणिहार
सीतामनोहर श्रीराघव ॥मा॥
बृन्दारकार्चितब्रह्मस्वरूप
प्रेमिकपूजित श्रीराघव ॥मा॥

---

धीरोदात्तगुणान्वितं दशरथाहूतञ्च हैमं रथं
चारूढञ्च सुमन्त्रसेवितपदं साकेतवीथीङ्गतम्।
नेत्रानन्दविवर्धनं त्रिजगतां नाथं सदा भावये
राज्यश्रीपरियाचितं नरवरं त्वामेव सीतापते॥

आरभि - आदि

राजति रघुकुलयुवराजेन्द्रो
रमणीयवदनो रामचन्द्रः ॥रा॥
राजवीथीगतरत्नमयरथ-
राजन्मणिपीठमध्यविराजितो ॥रा॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बाहुविभूषितमणिमयकटकः
परिमळतैलसिक्तालकः ।
मृगमदलिखितललाटफलकः
मलयजलिप्तवक्षोभागः ॥रा॥
सौन्दर्यनिर्जितगन्धर्वराजः
शौर्यविनिर्जितसर्वराजः ।
गमनविनिर्जितमातङ्गराजः
गाम्भीर्यनिर्जितमृगराजः ॥रा॥
भक्तजनानां प्रियदर्शनः
प्रेमिकचित्ताकर्षणवचनः ।
दशरथवीक्षितसुन्दरवदनः
सुमन्त्रसेवितसरसिजचरणः ॥रा॥

---

कमास् - आदि

श्रीराममेव दैवतं परं मन्ये ॥श्री॥
कामादिदोषरहितं ब्रह्मरुद्रादिमहितम्
सर्वलोकहितं सौमित्रिसहितम् ॥श्री॥
श्यामसुन्दरगात्रं तामरसायतनेत्रम्
शरणागतमित्रं परमपावनचरित्रम् ॥श्री॥
मङ्गलं मङ्गलानां महनीयमहतानाम्
दैवतं दैवतानामुत्तममुत्तमानाम् ॥श्री॥
सर्ववेदागमतात्त्वं सुमित्रया परिष्कृतम्
सत्यस्यापि परं सत्यं प्रेमिककीर्तितम्॥श्री॥

---

मोहनम् - आदि

राजति रघुवीरः साकेते ॥रा॥
रक्षितसकलसज्जनमण्डलः
काङ्क्षितवरप्रदकरकमलः ॥रा॥
मत्तमातङ्गवाहनः
मणिमयदिव्यभूषणः ।
मन्दहसितसुन्दरवदनः
माधुर्यपूरितवचनः ॥रा॥
उभयचामरवीजितः
उत्तमभक्तपूजितः ।
श्वेतातपत्रराजितः
कर्पूरदीपभ्राजितः ॥रा॥
उत्तमाङ्गधृतमकुटः
ऊर्ध्वपुण्ड्राङ्कितललाटः ।
उत्तमप्रेमिकपरिवृढः
ऊर्जितधर्मशासनक्रीडः ॥रा॥

---

सुरैः प्रथमतःस्तुता तदनुयोगिभिर्भाविता
ततः प्लवगभल्लकैर्जय जयेति संभाविता ।
जगत्त्रितयनायिका जनकराजकन्यान्विता
मदीयकुलदेवता जयति रत्नसिंहासने॥

प्याकट - आदि

त्वमेव मम कुलदैवतम्
त्वमेव मम परं दैवतम् ॥त्व॥
त्वामेव मम जीवनाधारम्
वन्देहं प्रभो वारं वारं ॥त्व॥
कमलसमानसुन्दरमुख
कारुण्यपूरितकटाक्ष ।
कनककिरीटवरशोभित
कार्मुकपाणे कमलाक्ष ॥त्व॥
मङ्गलविग्रह मृदुवचन
मन्मथकोटिलावण्य ।
मैथिलीचित्तरञ्जन
मारीचमदभञ्जन ॥त्व॥
भक्तवत्सल पुरुषोत्तम
पवनसुतार्चितचरण ।
भावुकप्रेमिकपूजित
भव शरणं मे सीतारमण ॥त्व॥

नामावलिः

श्रीराम जय राम शृङ्गारराम
शृङ्गारराम सीताभिराम



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीराम जय राम सीताभिराम
सीताभिराम कल्याणराम
श्रीराम जय राम कल्याणराम
कल्याणराम कोदण्डराम
श्रीराम जय राम कोदण्डराम
कोदण्डराम पट्टाभिराम

---

## कानडा - आदि

पालय मां रघुवीर श्रीरामचन्द्र ॥
पालितकौशिकयज्ञमहोत्सव
भक्तमण्डलहृदयपद्मोत्सव ॥पा॥
कोमळनयन कुटिलकुन्तल
कोदण्डमण्डितकरकमल ।
कुवलयश्यामळश्रीवनमाल
कुन्दरदन मुनिमानसलोल ॥पा॥
पापसमाकुलमुनिवरनारी-
शापविमोचन कृपानिधे देव ।
चापभञ्जन जानकीजीवन
तापनिवारण तरणिवंशोद्भव ॥पा॥
पतितोद्धारक परमपवित्र
पशुपतिसेवितपुण्यचरित्र ।
परमकृपाकर श्रितजनमित्र
प्रेमिक शरणागतोद्धारगोत्र ॥पा॥

---

माणिक्यमञ्जीरपादारविन्दां
रामार्कसंफुल्लमुखारविन्दाम् ।
भक्ताभयप्रापिकरारविन्दां
देवीं भजे राघववल्लभां ताम् ॥

## केदारगौल - आदि

जनकनन्दिनीं प्रणमामि
जननीं जगतां प्रणमामि ॥ज॥
कनकाभरणविभूषिताम्
सनकादिमुनिपूजिताम् ॥ज॥
रघुनन्दनमनोल्लासिनीम्
रमणीयमुखीं विलासिनीम् ॥ज॥
सिंहासनसमारूढाम्
सदनोद्यानरचितक्रीडाम् ॥ज॥
परमपावनचारित्राम्
प्रेमिकजननीं पद्मनेत्राम् ॥ज॥

---

न जाने प्राचीने जनुषि सुकृतं किं त्वकरवं
सतां वंशेचाहंसमजनिषि कीदृङ्हिमनि।
अधीशो लोकानां मम हृदयमारोहति यतो
जगद्वन्द्यः श्रीमान् जनकनृपकन्यासहचरः॥

## खरहरप्रिया - आदि

भज रे रामं रघुवीरं मानस ॥भ॥
भजितसुरासुरपरिवारम्
भक्तजनप्रियं वारं वारम् ॥भ॥
गौतमपत्नीशापहरम्
गौरीनायकचापहरम् ॥भ॥
वैदेहीकरमालाधरम्
वनसञ्चारं चीरधरम् ॥भ॥
ब्रह्मादिसुरार्चितचरणम्
प्रेमिकमण्डलमनोरमणम् ॥भ॥

---

## आभोगि - आदि

क्रीडति दाशरथिर्लक्ष्मणेन ॥क्री॥
कनकाम्बरधरः कमलवदनः



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

25/3/19

कौसल्या दशरथानन्दवर्धनः ॥क्री॥
कलभमारुह्य गच्छति काननम्
कलयन् मृगयामायाति भवनम्॥क्री॥
सोदरप्रकटितपरमानुरागः
सरयूतीरविहारी सुमुखः ॥क्री॥
प्रियजनकीर्तितभव्यगुणः
प्रेमिकहृदयानन्दवर्धनः ॥क्री॥

---

बिलहरि - आदि

राजति रघुवीरो नितराम् ॥रा॥
सुरगणसेविततापसमण्डले
सुबाहुमारीचप्रभृतिसमाकुले ॥रा॥
सुमित्रानन्दनानन्दवर्धनः
सुन्दरबाहु धृतशरासनः ॥रा॥
पूरितकौशिकमनोरथः
प्रेमिकभक्तपोषणरतः ॥रा॥

---

बिलहरि - आदि

राजति रघुनाथः सीतया ॥रा॥
राजराजेन्द्रपूजितदशरथ-
राजकुमारो युवराजेन्द्रः ॥रा॥
राकाचन्द्रशीतलकिरण-
राजितकनकमयभवने ।
रमणीयमणिमयमण्डपराजित-
रत्नसिंहासने मृदुवसने ॥रा॥
कनकभूषितकनकाङ्गी सखी-
गणपरिसेविता जनकसुता ।
कमलकरेण क्वणयन्ती वीणां
कलयति रामेण रतिं विनता ॥रा॥
प्रेमपरिपूर्णमृदुवचनेन
प्रणयस्निग्धकटाक्षेण ।
प्रीतिं वर्धयन् जनकसुतायाः
पार्थिवनन्दनो जयति हर्षेण ॥रा॥

---

सामा - आदि

विहरति रघुवीरः सीतया ॥वि॥
मारुतचञ्चल वीरुद्बृन्दे
मन्दारादिकुसुमसुगन्धे ॥वि॥
सरससङ्गीतरसपरिपूर्णे
वसन्तविराजितोद्यानवने ॥वि॥
पुष्पविनिर्मितकन्दकेन
प्रेमिकः प्रियया प्रियवचनेन ॥वि॥

---

सिन्धुभैरवि - आदि

क्रीडति रघुनाथः सीतया ॥क्री॥
प्रणयवचनलज्जितजानकी-
पद्मवदनवीक्षणकौतुकः ॥क्री॥
वैदेहीकरकमलस्पर्श-
माधुर्यपूरितमधुरसरसिकः ॥क्री॥
दशविधसुगन्धताम्बूलकराम्बित-
कोमलाधरमृदुप्रेमवचनः ॥क्री॥

---

वरालि (सेञ्चुरुट्टि) - आदि

उत्तमपुत्ररत्नं कैकेयि
न त्यजेयमहं जीवरत्नम् ॥
राघवो ज्येष्ठपुत्रः कैकेयि
राज्यमर्हति सच्चरित्रः ॥
मा कुरु मयि कोपं कैकेयि
मामव दिनमणिकुलदीपम् ॥
आवयोर्भव शरणं कैकेयि
तं विना नूनं मम मरणम् ॥
तव पदं पूजयामि कैकेयि
तमपि प्रेमिकं न त्यजामि ॥

---

सहाना - आदि



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीरघुनन्दनकरुणां स्मृत्वा
द्रवति मनो मे सुमन्त्र ॥श्री॥
घोरभवाब्धिसन्तारणविषये
कारणं तस्य नाकलये ॥श्री॥
गृध्रकपिप्रमुखानां जन्मेदं
पापार्जितमिति जगति प्रसिद्धम् ।
कृपया तदिह पावनं कुर्या-
मिति तच्चित्तं वनाय सन्नद्धम् ॥श्री॥
धर्मविहीनमनाचारमपि
व्याधाधिपमिह गुहं किल कृपया ।
धर्मात्मा परिरेभे विपुले
वक्षसि परिरब्धे सीतया ॥श्री॥
निरवधिप्रेमरसामृतपूरित-
हृदयं रघुपतिं विस्मृत्यान्यम् ।
निर्दयं क्षुद्रं भजतो भजन्तं
देवं मन्ये नाहं गण्यम् ॥श्री॥

---

नादनामक्रिया - आदि

नाहं मां प्रति शोचामि लक्ष्मण
त्वामेवाहं शोचामि ॥
आगतवानसि किं मया लक्ष्मण
अयोध्यां गच्छ त्वरया ।
अबलामूर्मिलामानय लक्ष्मण
कृपया त्वया सह वनाय ॥
अथवा नगरमेव गच्छ लक्ष्मण
वृद्धं पितरमभिरक्ष ।
लक्ष्मणमूचे राघवः सदयं
गङ्गाकूले प्रेमिकदेवः ॥

---

जोन्पुरि - आदि

वीक्षे कदाहं श्रीरघुवीरम् ॥वी॥
रक्षितभुवनं राजीवलोचनम्
शिक्षितराक्षसं सीतारमणम् ॥वी॥
कुवलयनीलं कुटिलकुन्तलम्
कोदण्डमण्डितकरकमलम् ॥वी॥
आजानुबाहुमच्युतमनन्तम्
अजरुद्रादिगुरुं परं शान्तम् ॥वी॥
प्रेमिकपूजितपङ्कजचरणम्
प्रेमसुखप्रदं प्रेमजीवनम् ॥वी॥

---

आनन्दभैरवि - आदि

पालय मां श्रीरघुपतिपादुके ॥पा॥
पालितकोसलराज्यमण्डले
भक्तजनहृत्कमलविलोले ॥पा॥
त्वमसि किलेह भवमग्नानाम्
अवलम्बनं श्रुतिवेद्यं जनानाम् ॥पा॥
ब्रह्मभवादिजगत्पतिविनुते
बृन्दारकगणपरिपूजिते ॥पा॥
भागवतोत्तमभरतानन्दे
भावुकप्रेमिकशरणप्रदे ॥पा॥

---

भागेश्री - आदि

स्वागतं स्वागतं राघववीर
स्वागतं स्वागतं राजकुमार ॥स्वा॥
शरणागतजनभरणधुरन्धर
स्वामिन् शरणं भव रणधीर ॥स्वा॥
करुणारसपरिपूर्णनयन
कामकोटिसमलावण्य ।
कञ्जभवादिसुरगणमान्य
कान्तारसञ्चारकोमलचरण ॥स्वा॥
मुनिजनहृदयमोहनवेष
मुदिरश्यामल मञ्जुलभाष ।
मैथिलीरमण विरहितदोष
मङ्गलरूप सज्जनपोष ॥स्वा॥
शर्वरीचरसङ्घसमाकुलं
शरणागतमिदं तापसमण्डलम् ।
सदयमालोकय विलम्बेनालं
शरणं भजामश्चरण कमलम् ॥स्वा॥
भक्तवत्सल भव्यगुणार्णव



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

परमकृपालय ब्रह्मण्यदेव ।
परमपावन विरहितपाप
प्रेमिकपूजितपद पद्मनाभ ॥स्वा॥

हिन्दोलम् - आदि

क्रीतोहं त्वया मारुते मम पते ॥क्री॥
नाहं शक्तो दातुं तव फलं
कैङ्कर्यस्य कदापि ।
नाथैषोस्तु परिष्वङ्गस्ते
भवानशुल्कदासस्तथापि ॥क्री॥
ऋणवाणस्मि त्वयि भक्तोत्तम
दासोहं तव न हि त्वं दासः ।
कृपया यस्मै मां प्रददासि
तस्याहमपि नूनं दासः ॥क्री॥
तव किं विष्णुपदेन च फल्गुना
ब्रह्मपदेन साम्राज्येन ।
आयुष्मान् भव प्रेमविमुग्धो
नाम मम स्मर निर्व्याजेन ॥क्री॥

सिह्मेन्द्रमध्यमम् - आदि

हे रघुवीर शरणं त्वमेव ॥हे॥
माता त्वमेव पिता त्वमेव
भ्राता त्वमेव सद्गुरुस्त्वमेव ॥हे॥
ज्ञानं न हि मे ध्यानं न हि मे
योगो न हि मे विरागो न हि मे ॥हे॥
राघव पाहि रघुनन्दन पाहि
राम पाहि सीतारमण पाहि ॥हे॥
ब्रह्माद्यखिलपूजितचरण
प्रेमिकभावुकमण्डलपालन ॥हे॥

कमास् - आदि

सर्वं राममयं लोके ॥स॥
अग्रतो रामः पृष्ठतो रामः
सव्यदक्षिणतः सर्वत्र रामः ॥स॥
अन्तरतो रामो बाह्यतो रामः
अण्डचराचरमखिलं रामः ॥स॥
जाग्रति रामः स्वप्ने रामः
सुषुप्त्यां समाधौ प्रेमिकरामः ॥स॥

कल्याणि - आदि

भज रे मानस सततं पट्टाभिरामं॥भ॥
भजितसुरासुरकिन्नरगारुडं
भक्तजनप्रियं सिंहासनारूढम् ॥भ॥
लक्ष्मणभरतशत्रुघ्नार्चित-
चरणं लक्ष्मीरमणं रामम् ।
लावण्यामृतसिन्धुसमुद्भव-
चन्द्रसमं हरिं सत्यकामम् ॥भ॥
वसिष्ठप्रभृतितपोधनहृदय-
विलोलं वेदवचनवेद्यम् ।
विभीषणसुग्रीववातात्मजगुह-
जाम्बवत्प्रमुखवैष्णववन्द्यम् ॥भ॥
कोमलनयनं कोदण्डधरं
श्यामलरूपं चन्द्रमुखम् ।
कौसल्यात्मजं कल्याणगुणं
कनकाभरणमजममोघम् ॥भ॥
श्रीराम जय राम जय जय रामेति
कीर्तनमुग्धप्रेमिकलोलम् ।
शरणागतजनवत्सलममलं
सनातनधर्मोद्धारणलीलम् ॥भ॥

अटाणा - आदि

राजति सिह्मासने श्रीरामः ॥रा॥
राजाधिराजपूजितचरणः
राजीवनेत्रो रञ्जितस्वजनः ॥रा॥
वामाङ्कशोभितनिजदारः
कनकदण्डशोभितकरः ॥रा॥
भरतशत्रुघ्नवीजितचामरः
सौमित्रिगृहीतश्वेतच्छत्रः ॥रा॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मारुतिपूजितसरसिजपादः
मङ्गलप्रेमगुणभरितः ॥रा॥

---

सहाना - आदि

जन्मनि जन्मनि तव भक्तिं
देहि मे कृपया राघव ॥ज॥
जानकीरमण जलजविलोचन
जगदेकरक्षक सुजनजीवन ॥ज॥
स्वर्गमपवर्गं कामये नाहं
सुन्दरचरण तव दासोहम् ।
सीतावल्लभ विनाशय मोहं
श्रीराघव कुरु कृपाप्रवाहम् ॥ज॥
तव कथामृतमत्तस्य मे
तव गुणचिन्तनं सदा भवतु ।
तव नामकीर्तनसिद्धस्य मे
तव रूपदर्शनं सुलभं भवतु ॥ज॥
आञ्जनेयमिव मामवधारय
अथवा विभीषणमिव मां पालय ।
भरतमिव मामाकलय
प्रेमिकभक्तं मामानन्दय ॥ज॥

---

कल्याणि - आदि

भज रे मानस श्रीहनुमन्तम् ॥भ॥
भजनसुखाङ्कितसुन्दरनयनम्
भगवन्नामसुधाङ्कितरसनम् ॥भ॥
अक्षकुमारशिक्षणविक्रम-
मक्षयसुखनिधिमभिरामम् ।
सीतादुरितहरणचरित्रं
बोधानन्दनिभृताद्भुतगात्रम् ॥भ॥
राघवपादाब्जलालनलोलं
रावणदर्पहरं बहु शीलम् ।
रामकथामृतपानविमुग्धं
रामध्यानपरमानन्दस्तब्धम् ॥भ॥
अञ्जनाभाग्यवरं कपिवीर-
ममलचरित्रं परमपवित्रम् ।
भवसिन्धुवरलङ्घनचतुरं
भावुकप्रेमिकमङ्गलकरम् ॥भ॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गोविन्दशतकम्

करकल्पितगव्यमाश्रयेहं
करुणारसपूरितान्तरङ्गम् ।
कमलायतलोचनं कुमारं
कमनीयकथारसं मुकुन्दम् ॥
प्रेमवात्सल्यसंपूर्णप्रमोदाकुललोचनौ।
कृष्णस्य पितरौ वन्दे श्रीयशोदाव्रजेश्वरौ॥
जयतु जयतु नित्यं गोकुलं दिव्यधाम
जयतु जयतु रामो रोहिणीनन्दनश्च ।
जयतु जयतु देवो भक्तकोलाहलोयं
जयतु जयतु लोके व्यासपुत्रस्य वाणी॥

शङ्कराभरणम् - आदि

जय जय देव जय जगन्नाथ
जलजलोचन जय जनार्दन ॥
देवकीबाल दीनवत्सल
देवपालक दानवान्तक ॥
नन्दकुमार नवनीतचोर
नीरदवर्ण निर्मलाकार ॥
प्रणतरक्षक प्रेमिकार्चित
पद्मसंभवप्रमुखपूजित ॥

---

अटति वने हरिरयं व्रजार्भकै-
र्बहुविधकेळिरसिकः स्मिताननः ।
सुरभिकुलं बहुविनोदवार्तया
रमयति शाद्वलपदेषु चारयन् ॥

देशिकतोडि - आदि

कृष्णं भजे सदा बृन्दावनलोलम्॥कृ॥
झञ्झलझलझलनूपुरपादम्
चञ्चलकुटिलकुन्तलजातम् ॥कृ॥
किणिकिणिकिङ्किणिकटिमूलम्
कङ्कणभूषितकरकमलम् ॥कृ॥
मेदुरमुदिरकदम्बनीलम्
सादरं प्रेमिकहृदयलोलम् ॥कृ॥

नामावलिः

मुद्धुकृष्ण मोहनरूप मुन्दे नी भारो
मुन्दे नी भारो हरि मुकुन्द नी भारो
मुरळीलोल श्यामळरूप गोपिकालोल
गोपिकालोल हरे गोपालबाल

---

कमास् - आदि

पिब रे मम रसने सन्ततम् ॥पि॥
भागवताख्यं रसमतिमधुरम्
भक्तिज्ञानवैराग्याधारम् ॥पि॥
निगमकल्पकतरुसञ्जातम्
नित्यानन्दानुभवशुभप्रदम् ॥पि॥

शुकमुखरसितं परमुच्छिष्टम्
सुरगणदुर्लभमत्युत्कृष्टम् ॥पि॥
प्रोज्झितकैतवधर्मप्रथितम्
प्रेमिकभावुकपरिषत्कथितम् ॥पि॥

---

श्रीरञ्जनी - आदि

भागवतं शृणुत भक्ताः ॥भा॥
योगिमनोहरपदपङ्क्तियुतम्
भोगिविदूरं भक्तिसुखप्रदम् ॥भा॥
नारायणमुखकमलविनिःसृतं
नलिनजभृङ्गरसितं मकरन्दम् ।
नारदमुनिवररसनारसितं
नानाविधरसपूरितचरितम् ॥भा॥
व्यासमहामुनिक्लेशविनाशं
व्यासकुमारकचित्तविलासम् ।
दासजनश्रवणानन्दहासं
वासवादिसुरदुर्लभं सरसम् ॥भा॥
विष्णुरातमनःक्लेशसंहारं
वैष्णवभृङ्गगणमनोहरम् ।
सूतपौराणिककीर्तितं मधुरं
शौनकादिप्रेमिकचित्तचोरम् ॥भा॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नीलाम्बरी - त्रिपुट

स्मरामि सन्ततं बालमुकुन्दम् ॥
किङ्किणिभूषितकटिमूलम्
कङ्कणरञ्जितकरकमलम् ॥स्म॥
कर्णलम्बितकनककुण्डलम्
कण्ठसज्जितकुटिलकुन्तलम् ॥स्म॥
वनजमुखं चारुचञ्चलनयनम्
व्याघ्रनखयुतमौक्तिकाभरणम् ॥स्म॥
ब्रह्मादिकसुरपूजितचरितम्
प्रेमिकहृदयान्दोलनमिलितम् ॥स्म॥

---

मोहनम् - आदि

माधव माधव मा याहि
मन्दं मन्दं मामायाहि ।
मधुरस्मेरसरसिजवदन
मङ्गळकरकामकोटिलावण्य ॥मा॥
धूलिपटलधूसरितमङ्गं
दूर्वादलसमश्यामळं कोमळम्
दृष्ट्वा तव बहुदूनचित्ताहं
दामोदर त्वां प्रार्थये स्नातुम् ॥
झञ्झलझलझलनूपुरभूषित-
संभ्रमनटनसुन्दरचरण
कलकलक्वणितकनककङ्कण-
मण्डितकरयुग कमलारमण ॥मा॥
कुञ्चितमितं तव गुह्यं केशव
काङ्क्षति द्रष्टुं मम नयनम् ।
कञ्जजविनुत तथापि त्वमिह
कनकाम्बरवरं परिधेहि ॥
किणिकिणिक्वणितकिङ्किणिभूष
कलकलनिनदमोहनहास
पलपलज्वलितभूषणजाल
परिमलकिसलयतुलसीमाल ॥मा॥
चञ्चलमधुरसुन्दरनयन
चपलासमबहुसंभ्रमगमन
चन्द्रकचारुबर्हविभूषण
चन्द्रमुख किं धावसि सुगुण ॥
अघटितघटनाक्रीडालोल
तरिकिटतरिकिटताण्डवशील
प्रकटितपरमप्रेमिकलील
शकटोच्चाटनचरणकमल ॥मा॥

---

सुरुटि - आदि

एहि नन्दनन्दन आ-
याहि भक्तचन्दन ॥ए॥
लीलयालं तव लावण्यशील
ललनालोल स्नातुं बाल ॥ए॥
कज्जलमलिनमुकुरकपोल
गन्धविहीनमृगमदफाल ॥ए॥
धूलिपटलधूसरिताङ्ग
मौलिविराजितमयूरबर्ह ॥ए॥
दधिनवनीतपङ्किलभूष
धवलचन्दनमलिनसुवेष ॥ए॥
विगलितकुटिलनीलकुन्तल
विरचितप्रेमिकहृदयशीतल ॥ए॥

---

मलयमारुतम् - आदि

स्नापयति यशोदा सुन्दरबालम्॥
गोपकुटीर कर्दममलिनम्
गोवत्सपालं कमलनयनम् ॥स्ना॥
दधिनवनीतपङ्किलाभरणम्
तरुणीजनकुचकुङ्कुमारुणम् ॥स्ना॥
कज्जलतिलकनीलिमवदनम्
कञ्जजभवनुतकमलचरणम् ॥स्ना॥
प्रकटितकैशोराद्भुतलीलम्
प्रेमिकशुभहृदयाङ्गणलोलम् ॥स्ना॥

---

कुन्तलवराली - आदि



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भूषयति यशोदा गोपालम् ॥भू॥
पुरुषोत्तममिह भुवनैकनाथम्
बुधजनहृदयभूषणं श्रीनाथम् ॥भू॥
कङ्कणकिङ्किणिकाञ्चीकटिसूत्र-
कुण्डलतरलहारादिभिः ॥भू॥
कनकाम्बरवरपरिमलचन्दन-
कज्जलकस्तूरितिलकादिभिः ॥भू॥
प्रेमरसामृतपूरितहृदया
प्रतिक्षणमानन्दनिधिं नन्दजाया॥भू॥

---

भवनमुपगतो निशायां प्रदीपद्युतिं संहरन्
सकलमपि पयो निपीय प्रभिन्दन् घटं लीलया।
तनयमनुगतं निकृन्तन्नखेन प्रियं मामकं
हसति निजगृहं गतोयं यशोदे सुतस्तावकः॥
अन्तर्गेहे तव तनयं दधि नवनीतञ्च हरन्तं
दृष्ट्वा सद्यो लगुडकरो मम पतिरेवं छलयन्तम्।
अत्रागच्छेत्यवददयं भयचकिताङ्गःपरिधावन्
पश्चात्तिष्ठन् पिहितमुखः प्रहसति नृत्यञ्च करोति॥
वत्सान् मुञ्चन् क्वचिदसमये
क्रोशसंजातहासः
स्तेयं स्वादत्त्यथ दधि पयः कल्पितैः
स्तेययोगैः।
मर्कान् भोक्ष्यन् विभजति स चेन्नात्ति
भाण्डं भिनत्ति
द्रव्यालाभे स गृहकुपितो यात्युपक्रोश्य
तोकान्॥

हुसेनि - आदि

अम्ब यशोदे कथितम्
शृणु तव बालकचरितम् ॥अ॥

मन्दारमृदुचरणयुगेन
मन्दं मन्दमनुगच्छति ।
मधुरवचनमुग्धायां मयि
दधिपरिपूर्णं कुम्भं हरति ॥अ॥
किङ्किणिभूषितं चरणकमल-
मुत्थाप्यैकं नटति ।
नटनगतिं तथा वीक्ष्य विमुग्धां
वञ्चयन् मां नवनीतं हरति ॥अ॥
मोहनमधुरस्मेरमुखेन
मोहयन् गोष्ठे मम धेनुम् ।
मन्दारारुणकोमळाधराभ्यां
चुम्बन् कुरुते क्षीरपानम् ॥अ॥
प्रतिपदमनुनयवचनेन मम
बालकं छलयन् मन्दगुणम् ।
प्रकटितकपटनिजचरितोयं
हरति दधिनवनीतमन्नम् ॥अ॥
पथि पथि गोपवधूमनुगच्छन्
मोहयन् मुरलीगानेन ।
दधिनवनीतं भुक्त्वा कुम्भे
मृदं विनिधाय धावति संभ्रमेण॥अ॥
तमसि रजन्यां मम भवनेस्मिन्
याते हृत्वा नवनीतम् ।
मामकमेव कुमारं भ्रान्ता
कृष्णं स्मृत्वा ताडयामि भीतम्॥अ॥

दुहन्त्यां मयि गोष्ठेप्यनुगच्छन्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दुग्धं पीत्वा पात्रं च ।
पातयन् ससंभ्रममवलोकयन् मां
सत्वरं स्वगृहं धावति च ॥अ॥
वेत्रवरमादाय करेण
मम पतिरेनं गृह्णाति ।
पश्यन्त्यां मयि बहुरूपोयं
मोहयन् मामपि परिहसति ॥अ॥
स्तम्भवरे तव बालकं बद्ध्वा
तिष्ठाम्यग्रे दण्डेन ।
भीतवत्सुचिरमभिरुदंस्तत्क्षण-
मन्तर्दधे दधिभाण्डेन ॥अ॥
एवं गोकुलराजगृहिण्यै
नवनीतप्रियचरितम् ।
कथितं गोपीजननिकरेण
प्रकटितप्रेमरसमिळितम् ॥अ॥

---

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रत्वासः कनककपिशं वैजयन्तीञ्च
मालाम्।
रन्ध्रान् वेणोरधरसुधया पूरयन्
गोपबृन्दै-
र्बृन्दारण्यं स्वपदरमणं प्राविशत् गीतकीर्तिः॥

आरभि - आदि

मन्मथमन्मथो विजयते
मधुरं मुरलीं वादयते ॥म॥
आभीरार्भककीर्तितकीर्तिः
आनन्दकरश्यामलमूर्तिः ॥म॥
कैशोराद्भुत शोभाविलसित
दिव्याङ्गैरनुरञ्जयति ।
कामकोटिदर्पहरस्मित-
शाली वनमाली जयति ॥म॥
गोप्यो यमुनामनुगत्य हरिं
विकसितनयनाः पश्यन्ति ।
गोकुलनन्दनदिव्यकटाक्ष-
वीक्षणविद्धा हृष्यन्ति ॥म॥
आश्लेषणचुम्बनसंभाषण-
प्रणयनिरीक्षणपाणिग्रहणैः ।
प्रेमसुधामभिवर्षन् भगवान्
मोहयति व्रजवनिताः स्वगुणैः॥म॥

नामावलिः

राजाधिराज व्रजराज
राधादिगोपीजनलोल
मुरलिगानलोल सर्वमोहनकृष्ण
मधुरवचन महितसर्व गोकुलकृष्ण
हरे गोपाल कृष्ण

---

देष् - आदि

भज रे मानस गोपालम्
भक्तजनप्रियमद्भुतलीलम् ॥भ॥
भक्षितवानसि किं त्वं मृदमिति
मात्रा पृष्टं बहुभीतम् ।
कुक्षिस्थितनिखिलाण्डं दर्शित-
विश्वाकारं गोविन्दम् ॥भ॥
मन्दस्मितमधुराधरमोहित-
नन्दकुटुम्बिनीहृदयम् ।
मन्दारारुणचरणं कुन्द-
रदनं मुकुन्दं सदयम् ॥भ॥
सत्यं ज्ञानमखण्डं नित्यं



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अचिन्त्यं ब्रह्म निराकारम् ।
सच्चित्प्रेमाकारं प्रकटित-
नानालीलं दधिचोरम् ॥भ॥

---

बृन्दारण्ये पुळिने यामुनेये
बालैः साकं सरसं नन्दसूनुः ।
नृत्यन्नृत्यन् रमते कन्दुकेन
मञ्जीरं तं क्वणयन् पादबद्धम् ॥
यत्पादपांसुर्बहुजन्मकृच्छ्रतो
धृतात्मभिर्योगिभिरप्यलभ्यः ।
स एव यद्दृग्विषयःस्वयं स्थितः
किं वर्ण्यते दिष्टमतो व्रजौकसाम्॥

सिन्धुभैरवि - आदि

नृत्यति गिरिधारी हे सखि ॥नृ॥
यमुनापुलिनदेशविहारी
यादवकुलसन्तारणकारी ॥नृ॥
बृन्दावनस्थितकुञ्जविहारी
बृन्दारकनुतपदसञ्चारी ॥नृ॥
सुरवनिताजनमानसहारी
सुन्दरप्रेमिकरत्यनुसारी ॥नृ॥

नामावलिः

*नन्दबाल नन्दबाल नवजलधरसमनील*
*गोपाल गोपाल गोपीजनहृदयविलोल*

---

खरहरप्रिया - आदि

विहरति यमुनातीरे भगवान् ॥वि॥
केसरकेतकीपाटलगन्धे
किसलयविलसितभूरुहबृन्दे ॥वि॥
मन्दसमीरे मधुकरगीते
माधवीलतिकावेणीवीते ॥वि॥
कोकिलकोकमनोरमगीते
कोमलकौमुदीकल्पितशीते ॥वि॥
हरिणीगणपरिमण्डितदेशे
हरिकीर्तनकृतप्रेमावेशे ॥वि॥

---

मध्यमावती - आदि

पश्यत नन्दबालं गोपालम् ॥प॥
गोपबालककेलिविलोलम्
कोमलरुचिरवरभोजनलीलम् ॥प॥
मुरलीमण्डितजठरसमीपम्
मुनिजनमानसहरणस्वरूपम् ॥प॥
कक्षन्यस्तवेत्रशृङ्गम्
रक्षितगोपबालकसङ्घम् ॥प॥
प्रेमिकमानसविपिनसञ्चारम्
प्रेमदमद्भुतविविधविहारम् ॥प॥

---

धन्यासी - आदि

भज रे गोपालम् मानस ॥भ॥
करकमलधृतदध्यन्नम्
कमलेक्षणमतिभव्यगुणम् ॥भ॥
चतुर्मुखमोहनसुचरित्रम्
चन्द्रमुखं श्यामळगात्रम् ॥भ॥
कक्षन्यस्ततोत्रवेत्रम्
करुणयावलोकितनिजमित्रम् ॥भ॥
प्रेमिकमानसमन्दारम्
ब्रह्माद्यमरविदूरम् ॥भ॥

---

सेञ्चुरुट्टि - आदि

वादयते मुरलीं भगवान् ॥वा॥
जनितमनोभवभावविहारी
चञ्चलमकरकुण्डलधारी ॥वा॥
कुसुमशरार्चितकेलिविलोलः
गोपीवदनचुम्बनलीलः ॥वा॥
मन्मथकोटिमनोज्ञशरीरः
मुनिजनरसितप्रेमविहारः ॥वा॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कमास् - आदि

क्रीडति वनमाली बृन्दावने ॥क्री॥
किसलयविरचितसुन्दरमालः
किङ्किणिभूषितचरणकमलः ॥क्री॥
नानाधातुविलिखितवेषः
नवनीतदधिपयोघृतमोषः ॥क्री॥
गुञ्जाकाचमणिमयभूषः
गोगोवत्सकुटुम्बपोषः ॥क्री॥
कपटमानुषबालकचरितः
कलितप्रेमवीक्षणललितः ॥क्री॥

---

दर्बार् - त्रिपुट

आगच्छ गोपाल मम बाल
आनन्दनाट्यलोल ॥आ॥
घोषकुटीरविहरणलोल
कोमलवदन गोपीलोल ॥आ॥
धिमिकिटधिमिकिटताण्डवधीर
धर्मोद्धारणचरिताधार ॥आ॥
बालमुकुन्द व्रजमन्दार
पतितोद्धारक वरसुकुमार ॥आ॥
प्रचुरघनावलिचारुशरीर
प्रेमिकपावनहृदयाधार ॥आ॥

---

शङ्कराभरणम् - त्रिपुट

भज रे मानस गोपीरमणम् ॥भ॥
यादवबालं रासविलोलम्
यमुनापुलिने गोपीलोलम् ॥भ॥
कुञ्चितकुन्तलमण्डितबर्हम्
झञ्झलनूपुरचरणाम्बुरुहम् ॥भ॥
कोमलमुरळीगानविलोलम्
कोकिलमधुरवचनशीलम् ॥भ॥
धिमिकिटधिमिकिटताण्डवचतुरम्
धर्माधारं हरिं प्रेमविहारम् ॥भ॥

---

कापि - आदि

नृत्यति वनमाली गोपीमध्ये ॥नृ॥
अंसालम्बितराधाकरः
हंसवाहनादिसुरपरिवारः ॥नृ॥
मृगमदतिलकशोभितफालः
मलयजचन्दनवक्षःस्थलः ॥नृ॥
मन्दस्मितबहुसुन्दरवदनः
मदनमोहनः प्रेमिकरमणः ॥नृ॥

---

माण्डू - आदि

नृत्यति रासविहारी भगवान् ॥नृ॥
अगणितगोपीनामनुरूपः
शुकप्रमुखयोगिमानसदीपः ॥नृ॥
गोपीविद्युल्लताशतबद्धः
गोविन्दः परमानन्दः शुद्धः ॥नृ॥
राधिकालङ्कृतवामभागः
रसिको वेणुविलोलः सुभगः ॥नृ॥
चरणक्वणितकनकनूपुरः
करुणासिन्धुः प्रेमिकव्रूरः ॥नृ॥

---

सिन्धुभैरवी - आदि

भजत मुकुन्दं भक्त्या सततम् ॥भ॥
कामदूषितमानसदूरम्
प्रेमभूषितहृदयमन्दारम् ॥भ॥
मदपरिमलिनमानसगोपम्
मदनकोटिसुन्दररूपम् ॥भ॥
प्रेमिकशुद्धभावविमुग्धम्
प्रियजनप्रणयपाशनिबद्धम् ॥भ॥

---

आहिरी - आदि

वीक्षेहं कदा गोपालबालम् ॥वी॥
वीक्षणमोहितवल्लववनिता-
पल्लवकरबहुलालितचरणम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रक्षितगोकुलं गोवर्धनधर-
मीशं कौस्तुभकनकाभरणम् ॥वी॥
बहुविधवर्णालङ्कृतबर्ह-
विभूषितकुटिलश्यामळकेशम् ।
बन्धूकारुणमृदतरसुन्दर-
मधुराधरकृतमृदुहासम् ॥वी॥
धेनुवराङ्गविन्यस्तकराग्रं
सुखवरसुन्दरत्रिभङ्गिशरीरम् ।
दिव्यसुन्दरवदनमनोहरं
प्रेमनिरीक्षणहृतभवभारम् ॥वी॥

---

जोन्पुरी - आदि

वीक्षे कदाहं वनमालिनं सखि ॥
घनश्यामगात्रं कमलायतनेत्रम्
करुणारसपात्रं गोपालकपुत्रम्॥वी॥
कल्हारमालं कनकदुकूलम्
कस्तूरीफालं कुञ्जविलोलम् ॥वी॥
व्यत्यस्तपादं विरहितखेदम्
वल्लवीनाथं वेणुविनोदम् ॥वी॥
प्रमदालोलं प्रेमिकपालम्
ब्रह्मादिमूलं व्रजराजबालम् ॥वी॥

---

खरहरप्रिया - आदि

सर्वोत्तमः श्रीगोविन्दः
सकलसुरार्चितपादारविन्दः ॥स॥
एवं निगमागमवचनानि
भवन्ति बहूनि प्रमाणानि ॥स॥
यज्ञनिरोधक्रुद्धशचीपति-
पूजितचरणः किल सोयम् ।
नन्दग्रहणभीतोदकपति-
सेवितचरणः किल सोयम् ॥स॥
धेनुग्रहणसमये तेन च
पीतो हि किल दावानलः ।
आचार्यसुतानयने तस्य
निदेशे विनतोऽभवत्किल कालः॥स॥
वत्सग्रहणसमये तेन हि
वाणीपतिरपि विमोहितः ।
बाणासुरसमरे किल रुद्रः
शार्ङ्गच्युतविशिखैर्जितः ॥स॥
रासविलासरसे किल तेन
रतिपतिः सरसं धिक्कृतः ।

वैकुण्ठाधिपतेरपि दिदृक्षां
प्रेमस्वरूपेण जनयत्यतः ॥स॥

---

कापि - आदि

भक्तो मम किल सर्वोत्तमः पार्थ॥भ॥
दण्डी मुण्डी न च चीराम्बरः
दान्तः शान्तो नैव दिगम्बरः ॥भ॥
योगी भोगी नैव गृहस्थः
होता गाता नैव वनस्थः ॥भ॥
जटिलः कुटिलो नैव तपस्वी
जरठः कर्मठो नैव यशस्वी ॥भ॥

---

सिन्धुभैरवी - आदि

भक्तसमर्पितमश्नामि पार्थ ॥भ॥
अण्वपि भक्तदत्तं भूरि
अणुवदभक्तदत्तं भूरि ॥भ॥
श्रुतदेवार्पितशुष्कान्नमिव
सुदामार्पितपृथुकमिव ॥भ॥
शबरीदत्तफलवर्गमिव
द्रौपदीदत्तशाकान्नमिव ॥भ॥
पत्रं पुष्पं फलमपि तोयम्
प्रेमिकदत्तं मम किल सुप्रियम्॥भ॥

---

कमास् - आदि

चरणरजो दैवतं मम उद्धव ॥च॥
चरणरजःकणपावितभुवनानाम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मरणसमयेपि प्रसन्नवदनानाम् ॥च॥
कामादिषड्रिपुविनाशकराणाम्
नामपरायणबहुधीराणाम् ॥च॥
पुलकितपुण्यसर्वाङ्गानाम्
बाष्पकलाञ्चितनयनयुगानाम् ॥च॥
गद्गदरुद्धशुभकण्ठानाम्
गलितप्रेमरसोत्कण्ठानाम् ॥च॥

---

क्वचित्सकलनागरैः परिवृतस्तथा सञ्चरन्
क्वचित्सदसि मन्त्रिभिर्जनहितं समालोचयन्।
क्वचिद्युवतिमण्डलं रतिरसैः सदाऽऽनन्दयन्
हरिर्जयति रुक्मिणीपरिवृढो जगत्पालयन्॥

खरहरप्रिया - आदि

रुक्मिणीदेवीं ध्यायामि
रुक्मविभूषणां ध्यायामि ॥रु॥
निक्वणन्नूपुरपदपद्माम्
तिग्मांशुसमकुण्डलयुग्माम् ॥रु॥
भीष्मकराजनन्दिनीं भव्य-
भावुकप्रेमिकस्वामिनीम् ।

पीनकुचशोभिदामिनीं प्रिय-
भक्तकोलाहलकामिनीम् ॥रु॥

---

करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं
बालं मुकुन्दं मनसा स्मरामि ॥

असावेरी - आदि

वन्दनमस्तु ते गोविन्द
बृन्दावनप्रिय परमानन्द ॥व॥
वल्लवसुन्दरीबृन्दविहार
बृन्दारकनुतपद सुकुमार ॥व॥
सन्ततं तव नामकीर्तनेन
साधुसमागमसेवनेन ।
सत्कथासारश्रवणेन
सरसं गच्छतु जीवनं सुखेन ॥व॥
नान्यं कामये नन्दकुमार
नवनीतचोर रुक्मिणीचोर ।
नवविधभक्तिं देहि श्रीधर
नवनवमणिमयभूषणालङ्कार ॥व॥
प्रपन्नजनप्रिय भक्तकोलाहल
प्रेमभक्तिं देहि भामालोल ।
प्रकटितवैभव त्रिजगन्मूल
प्रेमिकभावुक भक्तजनपाल ॥व॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## श्रीराधिकाशतकम्

या कृष्णसङ्गमसुखं सुलभं सखीभ्यः
प्रीता प्रयच्छति सुदुर्लभमीश्वराणाम्।
प्रेमप्रवाहभरितां श्रितकामधेनुं
तां राधिकां मम गुरुं शरणं प्रपद्ये॥
श्रीमत्कटाक्षपरिपालितभक्तबृन्दं
श्रीराधिकाकुचयुगाङ्कितचारुमूर्तिम्।
श्रीकण्ठकञ्जजसुरेन्द्रनिषेव्यमाणं
श्रीनायकं भजत भक्तकुतूहलाख्यम्॥
नान्यं वरं वृणे लोके भगवन्
भक्तवत्सल।
श्रीकृष्णमाधुरीदास्यं भवेज्जन्मनि
जन्मनि॥

### कुन्तलवराली - आदि

जयति जयति श्रीमद्व्रजराजधानी
जयति जयति श्रीवृषभानुनन्दिनी
॥ज॥
जयति जयति व्रजसुन्दरीमण्डली
जयति जयति नन्दनन्दनो
वनमाली॥ज॥
जयति जयति प्रेमभक्तिरसलहरी
जयति जयति प्रेमिकोपि जगदुद्धारी
॥ज॥

नामावलिः

राधेश्याम राधेश्याम राधेश्याम
राधेश्याम्

---

कन्दर्पाधिकसुन्दरः
कटिलसत्पीताम्बरालङ्कृतः
कर्णान्तायतलोचनः स्मितमुखो
वंशीनिनादोत्सवः।
नानारत्नविभूषणो
नवनवप्रेमास्पदःस्रग्धरो
नारीचित्तहरो हरिर्विजयते मातङ्गगामी
स्वयम्॥
गन्धर्वराजो नवमन्मथो वा
सुराधिपो वा सखि पश्य शीघ्रम् ।
न मानुषोऽयं वरसुन्दराङ्गो
वंशीनिनादं कलयन्नुपैति ॥

### आनन्दभैरवी - आदि

हरति मनो मे नन्दकुमारः
वरमृदुहासेन मधुरवचनेन ॥ह॥
मदगजसमबहुसुन्दरगमनेन
मनसिज इव सखि मन्दं मन्दम् ।
मुरळीं वादयन्नुपगत एव
मदयति मामिह नारीबृन्दे ॥ह॥
बर्हविभूषितकुटिलकुन्तल-
सज्जितकण्ठशोभितमालः ।
मणिमयनूपुरभूषितसुन्दर-
सरसिजरागचरणयुगलः ॥ह॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ललितभ्रुकुटीवलयितलोचन-
कल्पितमदनविलासकटाक्षः ।
कलितप्रेमसुधारसवर्षण-
मधुरमृदुहाससहजसुभाषः ॥ह॥

नामावलिः

नन्दकुमारवर नवनीतचोर हरे
देव देव वासुदेव हरे कृष्ण
गोपीमनचोर गोपाल कृष्ण हरे
देव देव वासुदेव हरे कृष्ण

---

नानाभूषणभूषिता भगवती नीलाम्बरालङ्कृता
बृन्दारण्यविलासिनीं प्रियजनैःसंलालितां सुन्दरीम्।
रामाकोटि निषेवितं प्रतिदिनं कुञ्जान्तरे संस्थितां
राधां रम्यगुणां नमामि शिरसा नन्दात्मजप्रेयसीम्॥

हुसेनी - आदि

भजेहं सदा राधिकाम् ॥भ॥
पूर्णकलाधरसुन्दरवदनाम्
पुण्डरीकाक्षहृदयसदनाम् ॥भ॥
सकलामरवनितागणसेविताम्
सखीजनपरिवारपरिवृताम् ॥भ॥
कुसुमितमाधवीकुञ्जनिलयाम्
कुटिलकुन्तळां प्रेमिकसदयाम्॥भ॥

---

कुसुमितवनराजिशुष्मिभृङ्ग-
द्विजकुलघुष्टसरःसरिन्महीध्रम्।
मधुपतिरवगाह्य चारयन् गाः
सह पशुपालबलश्चुकूज वेणुम् ॥

जोन्पुरी - आदि

विहर सदा श्रीराधे मम रसनायाम् ॥वि॥
कोमळयुवतिरिव निजभवने ।
गौरिव शाद्वलश्यामळविपिने ॥वि॥
शारदचन्द्रिकेव च गगने ।
सरसं हरिणीवोद्यानवने ॥वि॥
प्रेमरसामृतपूर्णस्वरूपा ।
प्रणयार्णवभवकलाधरशोभा ॥वि॥

---

बिलहरि - आदि

निवसति गोलोके राधादेवी ॥नि॥
रासमण्डलकलितक्रीडा ।
रसरूपिणी करुणानीडा ॥नि॥
स्वांशजगोपीजनसमवेता ।
स्वाराज्यसिंहासनसुखभूता ॥नि॥
कृष्णानन्यरसस्वरूपा ।
कृष्णप्रेमिकहृदङ्गणदीपा ॥नि॥

---

शेञ्चुरुट्टी - आदि

पश्यत राधाचित्तरमणम् ॥प॥
चन्दनचर्चितचारुशरीरम् ।
झञ्झलझलझलरवमञ्जीरम् ॥प॥
राधाकरमवलम्ब्य भ्रमन्तम् ।
रसिकं रक्षितभुवनमनन्तम् ॥प॥
चञ्चलकिसलयतुलसीहारम् ।
चन्द्रकलासमशीतलसारम् ॥प॥
चञ्चलकुण्डलचारुकपोलम् ।
सरसप्रेमिकसुन्दरबालम् ॥प॥

---

खरहरप्रिया - आदि

गायति राधां वनमाली
यमुनातीरे॥गा॥
मुरळीसुषिरन्यस्ताङ्गुळिः ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मयूरपिञ्छालङ्कृतमौळिः ॥गा॥
राधे राधे राधे इति सदा ।
रसिको मधुरं मधुरं हि मुदा ॥गा॥
प्रेमसुखप्रदमन्त्रं श्रुत्वा ।
प्रमदास्तत्र सर्वा विमुग्धाः ॥गा॥

नामावलिः

व्रजराज जगन्मोहन
मनमोहन नन्दनन्दन
रसिकभूषण भुवनमोहन
राधिकामनमोहन
हरे कृष्ण हरे कृष्ण

---

सिन्धुभैरवी - आदि

विहरति राधा कुञ्जकुटीरे ॥वि॥
विलसिततिलकसुन्दरफाला ।
विविधमनोहरशृङ्गारलीला ॥वि॥
शिञ्जितकनकमञ्जीरपदा ।
रञ्जितकोकिलमधुरनिनदा ॥वि॥
गोविन्दहृदयसरसिजभृङ्गा ।
गोपीप्रेमपूरितापाङ्गा ॥वि॥

---

खरहरप्रिया - आदि

विहरति माधवसमवेता श्रीराधा॥वि॥
माधवशुभवामाङ्कविलोला ।
माधवहृदयविरचितलीला ॥वि॥
माधवगण्डन्यस्तकपोला ।
माधवमधुराधररसलोला ॥वि॥
माधवबाहुलतापरिरब्धा ।
माधवप्रेमवीक्षणमुग्धा ॥वि॥

---

आभोगि - आदि

क्रीडति कदम्बमूले श्रीमिथुनम्॥क्री॥
परस्परभूषणालङ्काररसिकम् ।
परस्परभाषणमाधुर्यभावुकम् ॥क्री॥
परस्परबहुविधपरिहासरतम् ।
परस्परप्रणयकेलिविशारदम् ॥क्री॥
परस्परप्रेमानुभवविमुग्धम् ।
परस्परप्रेमपाशनिबद्धम् ॥क्री॥

---

सामा - आदि

विलसति श्रीहरिणा श्रीराधा ॥वि॥
मन्दसमीरे कुञ्जकुटीरे
सुन्दरनीरे यमुनातीरे ॥वि॥

गुञ्जद्भ्रमरे कुसुमितमन्दारे
गोपीनिकरे कोमलाकारे ॥वि॥
सरसमधुरे सङ्गीतमुखरे
कामविदूरे प्रेमविहारे ॥वि॥

---

गन्धोन्मादितषट्पदध्वनितझङ्कारस्वनानन्दित-
प्रेमोन्मत्तमयूरबृन्दनिवहानन्दे वनान्ते हरिः।
गोविन्दो वृषभानुगोपतनयामानीय लीलान्तरे
गूढः कुञ्जकुटीमवाप रसिकस्त्यक्त्वा निजप्रेयसीं॥

जोन्पुरी - आदि

एहि मुदं देहि राधे राधे ।
ब्रूहि मया सह राधे राधे ॥
देव वेणीं कलय कृष्ण कृष्ण ।
देहि मे कुसुमानि कृष्ण कृष्ण ॥
रमय मां सुन्दरि राधे राधे ।
रसिकशिखामणे राधे राधे ॥
विलिख तिलकं मम कृष्ण कृष्ण ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विलस मया सह कृष्ण कृष्ण ॥
अधरामृतं घटय राधे राधे ।
मधुरं मया कथय राधे राधे ॥
मेखलां धारय कृष्ण कृष्ण ।
मेघश्यामळ कृष्ण कृष्ण ॥
ताम्बूलमिदं धेहि राधे राधे ।
तारुण्यपूर्णे राधे राधे ॥
प्रकटय प्रेमरसं कृष्ण कृष्ण ।
ब्रह्मादिवन्द्य श्रीकृष्ण कृष्ण ॥

---

तोडी - आदि

विहरति यमुनातीरे सरसम्
व्रजसुन्दरीबृन्दे वनमाली ॥वि॥
मनसिजदर्पहरस्मितसुन्दर-
सरसिजवदनः कुटिलालकः ।
मधुरमुरलीगानसंपूरित-
मधुवनः केकिबर्हावतंसकः ॥वि॥
राधिकाबाहुलतासमालिङ्गित-
मरकतस्तम्भायतभुजः ।
रासकेलिरतो व्रजसुन्दरी-
हृदयविलोलो भुवनैकराजः ॥वि॥
वैजयन्तीलतालङ्कृतवक्षः-
स्थलपरिलिप्तसुगन्धकाश्मीरः ।
वल्लववनिताशतकुचकुम्भ-
कुङ्कुमलाञ्छितचरणो धीरः ॥वि॥
चरणकमलनिक्वणितकनक-
नूपुरमुखरितगोवर्धनः ।
करकमलाग्रसंलालितगोकुल-
वनितानिकरसुन्दरवदनः ॥वि॥
शुकसनकादिमुनीन्द्रसुरेन्द्रै-
वर्षितकुसुमपरिष्कृतः ।
सुरमुनिवल्लकीरणितसुमधुर-
पञ्चमरागप्रेमिकगीतः ॥वि॥

---

देष् - आदि

मोहनमुरलीधारी मुरारिः
क्रीडति बृन्दावनान्ते सखि ॥मो॥
कोकिलकूजिते चन्द्रविराजिते
सुरमुनिमण्डलपूजिते ।
कुञ्जविलसिते कुवलयहसिते
कोमलकिसलयललिते ॥मो॥
हरिणीभूषिते हरिपरिपोषिते
हरिचरणाम्बुजसिकते ।
यमुनावलिते यतिगणमिलिते
कुसुमशरैः परिमलिते ॥मो॥
षट्पदरणिते सारसभणिते
शुकशारिकाद्यभिरमिते ।
मयूरनर्तिते मनसिजवर्धिते
मोहितगोपीमुदिते ॥मो॥
सरसिजगन्धे सरसवसन्ते
रतिपतिविशिखानन्दे ।
विकसितकुन्दे विरचितगीते
विलसितखगमृगबृन्दे ॥मो॥
मधुकरपुञ्जे मधुरनिकुञ्जे
मणिमयमञ्जुलमञ्जे ।
भुवनशरण्ये ब्रह्मादिमान्ये
प्रेमिकभावितबहुपुण्ये ॥मो॥

---

पिहाक् - आदि

विकसितकमले यमुनासलिले
क्रीडति वनमाली ।
हिमकरशीतले कुङ्कुममकोमले
राधिकया सह गुणशाली ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अतिसुकुमारी भानुकुमारी
सिञ्चति पयसा रसिकम् ।
श्रीनवनागरीं रतिरसमाधुरी-
मभिलषति सखीबृन्दं सुमुखम्॥
विगलितकञ्चुकीं गोपीरञ्जकीं
श्लिष्यति रासविहारी ।
रसिकवञ्चकीं ललितासखीं
चुम्बति राधां मुरारिः ॥
शिथिलितवेणीं कोकिलवाणीं
सिञ्चति नन्दबालः ।
पङ्कजपाणिं बृषभानुनन्दिनीं
रमयति रासविलोलः ॥
सखीजनरसितां रसिकेशरमितां
पश्यत श्रीराधाम् ।
ब्रह्मादिविनुतां प्रेमिकगीतां
व्रजपतिनन्दनपाणिगृहीताम् ॥

---

## प्याकट - आदि

संयोजय मां राधे
तव रासलीलायाम् ॥सं॥
अहं किल गोपी त्वत्कैङ्कर्यपरा
वहतु मां तव दिव्यकरुणाधारा ॥सं॥
अपराधान् मम न गणय देवि
कृपया पालय वार्षभानवि ॥सं॥
हरिपदनिकटं प्रापय मां
हरिप्रेमसुधया स्नापय माम् ॥सं॥

नामावलिः

राधे गोविन्द जय् राधे राधे
राधे गोपाल जय् राधे राधे
नन्दकुमार जय् राधे राधे
नवनीतचोर जय् राधे राधे
भक्तवत्सल जय् राधे राधे
भागवतप्रिय जय् राधे राधे
वेणुविलोल जय् राधे राधे
विजयगोपाल जय् राधे राधे

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

राधामाधवशतकम्

पयस्विनीचुम्बितपादपद्मं
पयोदनीलं परमानुकूलम् ।
प्रतिष्ठितं प्रेमिकदेशिकेन
वंशीधरं वल्लवसूनुमीडे ॥

नाट्ट - आदि

जय विजयी भव वंशीधर ॥
जय जय श्रीव्रजराजकुमार
जय जय बृन्दावनसञ्चार ।
जय जय यमुनातीरविहार
जय जय गोपीजनमन्दार ॥ज॥
जय जय पीताम्बरपरिधान
जय जय गुञ्जामणिसरभूषण ।
जय जय नलिनदलायतनयन
जय जय शिञ्जितनूपुरचरण ॥ज॥
जय जय केकिशिखण्डकशेखर
जय जय मनोहर मुरलीधर ।
जय जय तुलसीमालाधर
जय जय प्रेमिकमानसचतुर ॥ज॥

---

नीलज्योतिर्ज्वलति
तुळसीगन्धवायुश्च वाति
मञ्जीरश्च ध्वनति मुरळीगानमायाति
कर्णम्।

इत्थं राधा वदति तदनु श्यामवर्णः
किशोरो
गोपस्त्रीणां नयनविषयः
प्रादुरासीन्मुरारिः॥

सिन्धुभैरवि - आदि

मनोहरमन्दहसितं सखि
महिलामण्डलरसितम् ।
मनसिजकोटिललितं सखि
माधवीमण्डपमिलितम् ॥
कलय गोपीनाथं सखि
कमलदळारुणपादम् ॥क॥
धगधगज्वलितपीताम्बरं सखि
तैयत्तिगुतिगुनटनकरम् ।
तरुणीचित्तचोरं सखि
दामोदरमतिधीरम् ॥क॥
बृन्दावनतटलोलं सखि
प्रेमिकमण्डलफालम् ।
ब्रह्मादिकसुरमूलं सखि
बर्हालङ्कृतचूडम् ॥क॥

---

हिन्दुस्थान्कापि - आदि

राधामनोहर रसिकशेखर ॥रा॥
लावण्यसागर ललनाविहार
ललितादिसखीलालनकर ॥रा॥
पद्माविलोल भक्तानुकूल



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पदयुगलाञ्चितयमुनाकूल ॥रा॥
कारुण्यपूर्ण कौस्तुभाभरण
कमलजभावित कल्याणगुण ॥रा॥
श्यामसुन्दर नन्दकुमार
प्रेमिकहृदय कमलविहार ॥रा॥

---

श्रीरञ्जनि - आदि

श्रीरञ्जनि कृष्णचित्तरञ्जनि
श्रितजनपालिनि पाहि मां जननि॥श्री॥
शरदिन्दुसमानसौन्दर्यपेटि
सरसगुणालयगोपवधूटि ॥श्री॥
सकललोकसौख्यविधायिनि
सरसीरुहाक्षहृदयविहारिणि ।
सकलसखीजनलालनकारिणि
सरससंभाषणसुखवरधारिणि ॥श्री॥
कुटिलालकयुतकुञ्चितवेणि
कोमळाधरतलकलितमृदुवाणि।
गोकुलनायकवामाङ्करमणि
गोपकुलोद्भवे नित्यकल्याणि ॥श्री॥
चम्पकलतिकाकुञ्जनिवासिनि
चन्द्राधिकबहुशीतलभाषिणि ।
चन्दनचर्चितचारुशरीरिणि
चरणकृतालयप्रेमिकपोषिणि ॥श्री॥

---

एहि मुकुन्द गोविन्द
पाहि मां भक्तं परमानन्द ॥ए॥
देहि मे वासं बृन्दारण्ये
देव देव हरे सुरगणमान्ये ॥ए॥
गोपी भूत्वा प्रेम करोमि वा
गोपो भूत्वा सह क्रीडामि वा ।
गौर्भूत्वा ते पुरतश्चरामि वा
गोवर्धनसानौ शिला भवामि वा॥ए॥
राधाकुण्डे मीनो भवामि वा
रमणीयकुञ्जे भृङ्गो भ्रमामि वा ।
रविसुतातीरे रोहामि तरुर्वा
रासस्थल्यां रङ्गं करोमि वा ॥ए॥
बृन्दारण्ये तृणं भवामि वा
प्रेमविवर्धनपक्षी भवामि वा ।
प्रेमिकभावुकभक्तो भवामि वा
प्रियतम यदिच्छसि तदेव भवामि॥ए॥

---

यदुकुलकाम्भोजि - आदि



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## श्रीयुगलशतकम्

बृन्दावने दिव्यकिशोरयुग्म-
सेवामृतं यः प्रददौ च मह्यम् ।
तस्मै कृपापूर्णविलोचनाय
नमोस्तु सर्वोत्तमदेशिकाय ॥

जयतु जयतु देवो भक्तकोलाहलोऽयं
जयतु जयतु देवी राधिका स्वामिनी नः।
जयतु जयतु गोपीमण्डलं प्रेमपूर्णं
जयतु जयतु दिव्यं धाम बृन्दावनञ्च॥

निधये भक्तितत्त्वानां गतये च महात्मनाम्।
अस्माकं पतये तुभ्यं प्रेमिकाय नमो नम॥

प्रणयविवशराधाप्रेमलीलाविमुग्ध-
व्रजनवयुवराजध्यानसंमूर्छितेन ।
रसिकनरवरेण प्रेमिकेन्द्रेण गीतं
युगळशतकमेतद् भक्तकर्णामृतं स्यात्॥

कारुण्यकर्पूरकटाक्षनिरीक्षणेन
कारुण्यसंवलितशैशववैभवेन ।
आपुष्णता भुवनमद्भुतविभ्रमेण
श्रीकृष्णचन्द्र शिशिलीकुरु लोचनं मे॥

दर्बार् - आदि

विजयी भव श्रीरसिकेन्द्र
व्रजमण्डलयुवराजेन्द्र ॥वि॥
वल्लवीमुखचन्द्रचकोरेन्द्र
वृषभानुसुताकुमुदचन्द्र ॥वि॥
गाम्भीर्यनिर्जितमृगेन्द्र
गमनविनिर्जितगजेन्द्र ॥वि॥
धैर्यविनिर्जितशैलेन्द्र
शौर्यविनिर्जितनरेन्द्र ॥वि॥
प्रेमरसोन्मत्तप्रेमिकेन्द्र
भावुकभव्यसद्गुणसान्द्र ॥वि॥

नामावलिः

आवो नन्दलाल् आवो नन्दलाल्
आनन्दसे नाचत आवो नन्दलाल्
गोपीरमण हे जनार्दन
हरे सुकुमार अतिसुकुमार

---

बृन्दानि सर्वमहतामपहाय दूराद्
बृन्दाटवीमनुसर प्रणयेन चेतः।
सत्तारणीकृतसुभावसुधारसौघं
राधाभिधानमिह दिव्यनिधानमस्ति॥

मोहनम् - आदि

मानस सञ्चर सानन्दं सततम्
भावुक लोके स्वच्छन्दम् ॥मा॥
कलिमलरहितप्रेमसंपूरित -
भावनाभुवने बृन्दावने ।
कवितारसपरिपूरितयमुना -
वलिते चिन्तामणिसदने ॥मा॥
स्फटिकमणिप्रभगोपनितम्बिनी -
प्रकटितनानाकेलिविलासे ।
स्फुटकमलायतहृदयनिकुञ्ज -



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

घटितमिथुनकलाविहासे ॥मा॥
रतिरसरञ्जितप्रेमिकजनगण -
मोहनमुरलीगानविनोदे ।
रमणीमण्डलचुम्बितगण्ड -
हरिपरिरंभणजनितोन्मादे ॥मा॥

---

केदारम् - आदि

वासो भवतु मे बृन्दावने सततम्॥वा॥
हरिचरणाङ्कितसिकतासमावृत -
पुलिनालङ्कृतयमुनावलिते ।
हरिणमयूरकोकिलकलहंस -
गोगोवत्सशुकादिकललिते ॥वा॥
शिञ्जितनूपुरमञ्जुलचरण -
सुन्दरवल्लववनितागीते ।
रञ्जितमधुरमुरलीमोहन -
गानामृतरसवर्षणशीते ॥वा॥
विधिनिषेधविरहितप्रणय -
क्रीतगोविन्दपरिरब्धे ।
विधिरुद्रादिविस्मयरसद -
विलासप्रेमिकस्मरणविमुग्धे ॥वा॥

---

माण्डु - आदि

जननं बृन्दावने जीवनं बृन्दावने
स्मरणं बृन्दावने मरणं बृन्दावने ॥
शरणं भजामि बृन्दावनम्
श्रीरसिकेन्द्र केलिवनम् ॥श॥
स्मरणे बृन्दावनं वचने बृन्दावनम्
भजने बृन्दावनं यजने बृन्दावनम्॥श॥
अन्तरतो बृन्दावनं बाह्यतो बृन्दावनम्
सर्वतो बृन्दावनं सर्वस्वं बृन्दावनम्॥श॥
पृष्ठतो बृन्दावनमग्रतो बृन्दावनम्
प्रेमिकप्राणाधारं श्रीबृन्दावनम् ॥श॥

---

सिंहेन्द्रमध्यमम् - आदि

सर्वं श्याममयं श्रीवने ॥स॥
शैलः श्यामः सरिदपि श्यामा
सलिलं श्यामं सरसिजं श्यामम्॥स॥
कोकिलः श्यामः कोकः श्यामः
केकी श्यामः काकः श्यामः ॥स॥
महीरुहः श्यामो मधुपः श्यामः
मेघः श्यामो नागः श्यामः ॥स॥
गोविन्दः श्यामो गोपी श्यामा
प्रेमिकः श्यामो प्रिया च श्यामा॥स॥

---

बिहाक् - आदि

चल यमुनातीरं मानसहंस ॥च॥
मोहनमुरलीगानसंपूरितम्
मुग्धवधूजनमण्डलभरितम् ॥च॥
कोकिलबृन्दकलितकुतूहलम्
कोमलकिसलयलतिकालोलम्॥च॥
विकसितसरसिजपरिमलनीरे
विहर स्वच्छन्दं धीरसमीरे ॥च॥
अवलोकय हरिमागतमत्र
आनन्दय तं प्रेमिकमित्र ॥च॥

---

शङ्कराभरणम् - आदि

सारसर्वस्वमिदं हे सखि ॥सा॥
रसानामुत्तमः शृङ्गाररसः
रसिकानामुत्तमः श्रीराधिकेशः॥सा॥
ऋतूनामुत्तमो वसन्तऋतुः
वधूनामुत्तमा गोपवधूः ॥सा॥
नायकानामुत्तमो राधानायकः
नायिकानामुत्तमा कृष्णनायिका ॥सा॥
वनानामुत्तमं श्रीबृन्दावनम्
धनानामुत्तमं प्रेमरत्नम् ॥सा॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एकस्य श्रुतमेव लुम्पति मनः कृष्णेति नामाक्षरं
सान्द्रोन्मादपरम्परामुपनयत्यन्यस्य वंशीकलः।
एषः स्निग्धघनाकृतिः मनसि मे लग्नः सकृत्दर्शनात्
कष्टं धिक्पुरुषत्रये रतिरभूत् मन्ये मृतिः श्रेयसी॥

कानडा - आदि

सुखयति मे हृदयं सुकुमारः ॥सु॥
मुखलावण्यचन्द्रिकया
मोहनगानमुरलिकया ॥सु॥
अनुगतगोपीमण्डलेन
दिनमणितनयातीरेण ।
अनुसृतधेनुनिकरेण
मणिमयनूपुरनिनदेन ॥सु॥
राधा राधेति कीर्तनेन
रासमण्डलनर्तनेन ।
रमणीकामवर्धनेन
रतिपतिदर्पमर्दनेन ॥सु॥
करुणाकटाक्षवीक्षणेन
शरणागतजनरक्षणेन ।
नूतननवनीतभक्षणेन
प्रेमिकविद्याशिक्षणेन ॥सु॥

नामावलिः

आनन्दनन्दन हे नन्दनन्दन
गोपीजनप्राणधन राधाङ्गचन्दन

---

काम्भोदि - आदि

स्मरामि सन्ततं श्रीगोविन्दम्
स्मरणमात्रेणैव परमानन्दम् ॥स्म॥
रसवरसमुज्जृम्भितवसन्तं
रमणीयमल्लिकापटलसुगन्धम् ।
राधया सह यमुनावनान्तं
रतिरसलोलुपमागच्छन्तम् ॥स्म॥
मदगजसमगम्भीरगमनं
मञ्जुलमनोहरमधुरनटनम् ।
मन्दस्मितमोहितगोपीजनं
माधुर्यलावण्यसौन्दर्यसदनम् ॥स्म॥
गोपीजनवर्षितकुङ्कुमपङ्कं
गोपालकनन्दनं करुणापाङ्गम् ।
गोवर्धनधरघनश्यामलाङ्गं
कोमलप्रेमिकहृदयाब्जरङ्गम् ॥स्म॥

---

सेञ्चुरुट्टि - रूपकम्

वल्लवीकुचकुम्भकुङ्कुमपङ्किलारुणवक्षसम्
पल्लवारुणपादपङ्कजविद्धशकटराक्षसम् ॥
भावयामि नन्दबालं
भामिनीमण्डललोलम्॥
मल्लिकादिसुममालिकाशोभितासितकुन्तलम्
मकराकृतिमणिकुण्डलचुम्बितातुलकपोलम्॥भा॥
कनकाम्बरपरिवेष्टितकटिशोभितकिङ्किणिम्
करपङ्कजदलभूषितनवरत्नकङ्कणम् ॥भा॥
अधरामृतपरिपूरितमुरलीरवरसिकम्
अमलाशयमुनिमानसहरमच्युतमनघम्॥भा॥
वृषभानुकुलवारिधिभवपूर्णचन्द्रिकया
विहरन्तमिह प्रेमविमुग्धराधिकया ॥भा॥

---

शङ्कराभरणम् - आदि

चिन्तय रे सदा राधिकाम् ॥चि॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बृन्दावनेश्वरीं वन्दारुसुन्दरीम्
नन्दितनिखिलनन्दनन्दनमनोहरीम्॥चि॥
सुन्दरशुकवरशोभितकराम्
शुकमुनिहृदयोद्यानविहाराम् ।
सुधाकरवदनां सुजनशुभङ्कराम्
सुमुखीं श्यामसुन्दरप्रेमाधाराम्॥चि॥

---

जय जय जय गोपिकाविलोल
नवयुवसुन्दर कुञ्जकेलिलोल
जय जय जय नीलसुन्दराकार
त्रिभुवनमोहन रासनाट्यलोल ।
जय जय जय नन्दगोपबाल
नटवर सुन्दर दिव्यरूपदेव
जय जय जय राधिकाविलोल
सुललित सुस्वर वेणुगानलोल ॥

देष् - आदि

जय जय जय श्रीमुरलीलोल
जय जय जय श्रीगोकुलबाल ।
जय व्रजराजहृदयविलोल
जय गोपनन्दन घनश्यामल ॥ज॥
राकेन्दुवदन रञ्जितभुवन
रसिकेशभूषण राधारमण ।
रामसहोदर रमणीयेक्षण
रतिपतिकोटिलावण्यसदन ॥ज॥
मणिमयभूषण मञ्जुलभाषण
महिलामण्डलमहितप्रेक्षण ।
मुनिगणपोषण सुरगणरक्षण
मुखरित नूपुरभूषितचरण ॥ज॥
गोकुलपालन गोपीमदन
कोमलवचन कुवलयनयन ।
गोवर्धनधर गोवत्सलालन
गोविन्द गोपाल प्रेमिकपालन॥ज॥

---

नाट्टकुरिञ्जि - आदि

विजयी भव श्रीगोपाल श्रीलोल
विविधविभूषणजाल ॥
व्रजनवयुवराजपट्टाभिषिक्त
गजराजगमन श्रितजनस्निग्ध॥वि॥
राधाकटाक्षवीक्षणविद्ध
रसिकाग्रेसर रतिरसमुग्ध ॥वि॥
गोपीकुचकुङ्कुमकर्दमलिप्त
गोवर्धनधर पालितभक्त ॥वि॥
मणिमयमकुटबर्हविभूषण
मन्दस्मितमुख मङ्गलवेष ॥वि॥
मुरलीचुम्बितमृदुलतरोष्ठ
मुहुरवलोकितगोवृतगोष्ठ ॥वि॥
भव्य गुणालय भजदार्तिहर
भावुकप्रेमिकमानसचोर ॥वि॥

---

नन्रोज् - त्रिपुट

स्वागतं व्रजेशकुमार तव स्वागतम् ॥
स्वागतं क्षीरचोर स्वागतं चित्तचोर ।
स्वागतं गोपीजार स्वागतं वंशीधर॥स्वा॥
स्वागतं मेघश्याम स्वागतं सत्यकाम।
स्वागतं जितकाम स्वागतमभिराम॥स्वा॥
स्वागतं प्रेमपूर्ण स्वागतं दिव्यगुण ।
स्वागतं श्रीरमण स्वागतं श्रीकृष्ण ॥स्वा॥

---

जोन्पुरि - आदि

बृन्दावनं याहि राधे राधे
मन्दस्मितमुखि राधे राधे ।
नन्दकुमारेण राधे राधे
मन्दमन्दं सञ्चर राधे राधे ॥
मुखलावण्येन राधे राधे
मुकुन्दं रमय राधे राधे ।
मुनिजनमोहिनि राधे राधे
मुरलीमपहर राधे राधे ॥
कुञ्जकुटीरे राधे राधे
गुञ्जाभरणेन राधे राधे ।
कुटिलकुन्तले राधे राधे



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कुरु सल्लापं राधे राधे ॥
रासमण्डले राधे राधे
रमणीभिः सह राधे राधे ।
रसिकं रमय राधे राधे
रतिरसदायिनि राधे राधे ॥
प्रेमस्वरूपिणि राधे राधे
श्यामलवेणि राधे राधे ।
प्रेमिकस्वामिनि राधे राधे
श्यामविहारिणि राधे राधे ॥

---

जोन्पुरि - आदि

सूर्यजातीरे सुन्दरीनिकरे
क्रीडति श्यामसुन्दरः ।
सुस्वरमुरलीगानमाधुर्य -
पूरितकोमलबिम्बाधरः सखि
विहरति राधामनोहरः ॥
मत्तमयूरनर्तनविगलित -
बर्हविभूषितश्रीमकुटः ।
चित्तरञ्जनः सुन्दरवदनः
वल्लववनितागणविटः सखि
विहरति राधापरिवृढः ॥
चञ्चलकुण्डलचुम्बितकपोल -
तलनिर्जितमणिमयमुकुरः ।
पञ्चमरागरञ्जितकोकिल -
कूजितबृन्दावनसञ्चारः सखि
विहरति राधासर्वस्वहरः ॥
कुसुमितचम्पकतरुनिकटागत -
गोपीदर्शनकुतूहलः ।
कुङ्कुमपङ्किलहृदयालिङ्गित -
प्रेमिकमण्डलकोलाहलः सखि
विहरति राधाहृदयविलोलः ॥

---

## सिन्धुभैरवि - आदि

राधाधरमधुरसिक कृष्ण
राकाचन्द्रसमानमुख ॥
बृन्दावनकुञ्जलोल कृष्ण
नन्दात्मज गुणशील ॥
गोपीगणचित्तचोर कृष्ण
गोवर्धनशैलोद्धार ॥
नीलाम्बुदनिभगात्र कृष्ण
नीरजसमनेत्र ॥
पीताम्बरपरिधान कृष्ण
गीतामृतरसनिधान ॥
मुरलीगानविलोल कृष्ण
मुनिजनमण्डलपाल ॥
व्यासमहामुनिविनुत कृष्ण
व्यत्यस्तपादारविन्द ॥
मकुटायितशिखिबर्ह कृष्ण
ललितत्रिभङ्गिविग्रह ॥
प्रकटितदिव्यचरित्र कृष्ण
प्रेमिकभावुकमित्र ॥

---

देशिकतोडि - रूपकम्

वेणुगानरसिक कृष्ण
वेणुगानरसिक ॥
भानुगोपनन्दिनीपाद-
रेणुस्पर्शजातपुलक ॥वे॥
असमये वंशीनालं
अधरपुटे विनिवेश्य ।
असमानसुन्दरीं राधा-



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

माह्वयति रतिमुद्दिश्य ॥वे॥
सापि गेहबन्धं विहाय
प्राप त्वमेव सह मया ।
गोपनारी भागधेय
गोपराज प्रियतनया ॥वे॥
श्रोतुमिच्छति सुन्दरी सा
श्रवणसुखं तव गानम् ।
सुन्दराकार याचसे त्वं
शुल्कं देहीति चुम्बनम् ॥वे॥
लज्जयाऽऽवाङ्मुखी सुमुखी
ललितेवावनता राधा ।
ललिते त्वं देहीति मां
लज्जितां प्रेममुग्धां जगाद ॥वे॥

---

हिन्दोलम् - आदि

बृन्दावनकुञ्जनिलये राधे
पाहि मां करुणालये ॥बृ॥
मन्दहासातिसुन्दरवदने
नन्दकिशोरहृदयानन्दने ॥बृ॥
कालिन्दीपुलिनकृतविहरणे
कनककिङ्किणिभूषितचरणे ।
कज्जलनीलिमकमलविलोचने
कटितटशोभितकाञ्चीभूषणे ॥बृ॥
मङ्गलकरबहुमधुरस्वरूपिणि
महनीयसज्जनमहितप्रभाविनि ।
मधुकरपुञ्जोपमनीलवेणि
मधुरमधुरमञ्जुलभाषिणि ॥बृ॥
भावुकप्रेमिकभावितरूपे
परमदयारसलोचनशोभे ।
प्रकटितप्रणयमिथ्याकोपे
ब्रह्मनिष्ठहृदयाङ्गणदीपे ॥बृ॥

---

काپि - आदि

बृन्दावनेश्वरि पालय माम् ॥बृ॥
नन्दनन्दनमानससदने
वन्दनमस्तु ते वारिजलोचने ॥बृ॥
गोकुलबृन्दावनसञ्चारिणि
गोपीमण्डलमध्यविहारिणि ।
कोमलाधरे गोपीमानसहारिणि
गोपवंशोद्भवे गोपालरञ्जनि ॥बृ॥
कुटिलश्यामळदीर्घवेणि
कुन्दरदने शुककोमलवाणि ।
कुवलयदलनीलगोविन्दकामिनि
कुञ्जविहारिणि कलहंसगामिनि॥बृ॥
ललितादिसखीजनसेवानन्दिनि
लालितसखीजनमध्यनिवासिनि ।
लावण्यशालिनि लम्बितमालिनि
ललिते कृष्णप्रेमस्वरूपिणि ॥बृ॥

---

केदारम् - आदि

सन्ततं प्रणमामि श्रीराधाम् ॥स॥
नन्दनन्दनमानसमोहिनीम्
मन्दगामिनीं मङ्गळरूपिणीम्
॥स॥
मन्दहसितसुन्दरवदनां
बृन्दारकवधूवन्दितचरणाम् ।
बृन्दावनवरकुञ्जसदनां
मन्दाराम्बुजमल्लिकाभरणाम्
॥स॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

वनजातारुणचारुविलोचनां
वासन्तिकासुमसुन्दररोचनाम् ।
वञ्जुलकुञ्जवलितसखीजनां
वृषभानुगोपवात्सल्यभाजनाम्॥स॥
कोमलाधरयुतकुन्दरदनां
गोपिकाहृदयसरसिजभवनाम् ।
गोविन्दचकोरचन्द्रवदनां
गोकुलबालकप्रेमिकस्वजनाम्॥स॥

---

सुरुटि - आदि

तत्सुखं भवतु ते माधव
मद्वचः श्रवणेन ॥त॥
यत्सुखं निकुञ्जवासेन
यत्सुखं राधया सह रासेन ॥त॥
यत्सुखं विशाखाऽधरखण्डनेन
यत्सुखं ललितापरिमण्डनेन ॥त॥
यत्सुखं चन्द्रिकाकीर्तनेन
यत्सुखं भद्रया सह नर्तनेन ॥त॥
यत्सुखं पद्मापरिरम्भणेन
यत्सुखं प्रेमाप्रियवचनेन ॥त॥

नामावलिः

कुञ्जविहारि कुञ्जविहारि
यमुनातीरनिकुञ्जविहारि
गोवर्धनोद्धारि गोपीमनोहारि
कोमलहृदय कृष्ण मुरारि

---

सावेरि - आदि

तव कटाक्षेण सर्वं परिपूर्णम्
नवघनश्याम राधारमण ॥तव॥
भवब्रह्मादिसुरगणमान्योहम्
भुवनत्रयेपि धन्योहम् ॥तव॥

शुकसनकादिभागवतार्चित-
सुन्दरचरण सुकुमार ।
शारदचन्द्रकोटिसमान-
वदन नवमन्मथाकार ॥तव॥
वंशीगानविनोदविलास
वदनविराजितमृदुहास ।
वनमालाधर गोकुलवास
व्यत्यस्तपाद गोवर्धनेश ॥तव॥
अप्राकृतं तव सौन्दर्यं
अनिर्वचनीयं तव सौकुमार्यम् ।
अपरिमितं तव कारुण्यं
अप्रमेयं तव प्रेमलावण्यम् ॥तव॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# पूजा

केदारगौळ - आदि

भूयो भूयो याचेऽञ्जलिना
पूजां स्वीकुरु राधारमण ॥भू॥
मुरलीगानविलोल मुकुन्द
मुचुकुन्दप्रिय परमानन्द ॥भू॥
मुखरितनूपुर पालितनन्द
मुरनरकारे कृष्णानन्त ॥भू॥
गोकुलभूषण प्रेमकिशोर
गोपकुमारीमनोहरजार ॥भू॥

---

मध्यमावति - आदि

कर्पूरागरुकस्तूरीवर-
संयुतपरिमळश्रीचन्दनम् ।
कमलावल्लभ कमलविलोचन
कृपया स्वीकुरु गोविन्द ॥
जय जय देवादिदेव विभो
राधारमण कृपाजलधे ॥ज॥
मल्लीमरुवकमाधविकेतकि-
मन्दाराम्बुजमाल्यानि ।
मधुसूदन जगन्मोहनरूप
माधव दयया स्वीकुरु देव ॥ज॥
राधावल्लभ रमणीयानन
रासविलोल भव्यगुण ।
शिञ्चितनूपुर रञ्जितभुवन
धूपमिमं स्वीकुरु देव ॥ज॥
मुरलीगानविलोल मुकुन्द
मोहनमधुरस्मेरमुख ।
मुग्धगोपवधूजननायक
मङ्गलदीपं स्वीकुरु देव ॥ज॥
लड्डुकमोदकसूपापूप-
शाकव्यञ्जनसंयुक्तम् ।
शाल्यन्नमिदं सरसगुणालय
स्वीकुरु दयया गोविन्द ॥ज॥
कदलीद्राक्षाखर्जूराम्र-
कपित्थादीनि मधुराणि ।
कालिन्दीतटकाननलोल
फलानि यथेष्टं स्वीकुरु देव ॥ज॥
एलाकेसरकर्पूरादिक
परिमलद्रव्यसंयुक्तम् ।
पूगीफलशकलेन च सहितं
ताम्बूलं स्वीकुरु गोविन्द ॥ज॥
बृन्दावनचर वन्दारुप्रिय
नन्दात्मज जय गोविन्द ।
बृन्दारकगणपूजितचरण
प्रेमिकभावित भव्यगुण ॥ज॥

---

सुरुटि — चापु

नन्दगोपाल ते मङ्गळम् जय
नवनीतचोर ते मङ्गळम् ॥न॥
वन्दारुजनगणमन्दार वारिद-
सुन्दरस्वरूप मङ्गळम् ॥न॥
काळीयफणरङ्गप्रकटितनर्तन
कंसादिमर्दन मङ्गळम् ॥न॥
ब्रह्मादिसुरगणपूजितचरण
प्रेमिकप्रिय ते मङ्गळम् ॥न॥

---

पुन्नागवराळि - आदि

धन्योहं किल धन्योहम् ।
दामोदर तव दास्येन ॥ध॥
मन्दिरमार्जनचन्दनमर्दननन्दनपालनवन्दनैः
वस्त्रशोधनपुष्पसमर्पणमङ्गळदीपाद्युपचारैः
छत्रग्रहणचामरवीजनताण्डवकीर्तनश्रवणैः
पादसेवनपाद्यप्राशनपादार्पिततुळसीग्रहणैः
भगवद्गीता भागवतादिक पठनैरन्यैः स्तोत्रैश्च
सज्जनप्रेमिकसङ्गेनैवं सन्ततं नामस्मरणेन
धन्योहं किल धन्योहम् ।

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

यस्य स्मरणमात्रेण कृष्णभक्तिः
प्रजायते।
तमेव करुणासिन्धुं सद्गुरुं शरणं
भजे॥
कृष्णप्राणप्रियतमां
कृष्णप्रेमस्वरूपिणीम्।
कृष्णाभिन्नरसां देवीं राधिकां
प्रणमाम्यहम्॥
प्रेमवात्सल्यभावेन
भक्तानुग्रहकातरम्।
ब्रह्मादिभिस्सेव्यमानं भक्तकोलाहलं
भजे॥
नीलाम्बुदश्यामलाय पीताम्बरधराय
च।
हरिचन्दनलिप्ताय गोविन्दायास्तु
मङ्गळम्॥

जय जय गोविन्द जय हरि गोविन्द
गोविन्द राधे गोपाल राधे

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## दिव्यनामकीर्तनम्

राम राघव राम राघव राम राघव रक्ष
माम्
कृष्ण केशव कृष्ण केशव कृष्ण केशव
पाहि माम्

### सेञ्चुरुटि - आदि

एहि गोपाल श्रीवनमाल
राधालोल आयाहि
नन्दकुमार आयाहि - कृष्ण
नवनीतचोर आयाहि
मेघश्यामल मोहनरूप
मुरलीधर आयाहि ॥न॥
कंसध्वंसन कालीयनर्तन
कनकाम्बरधर आयाहि ॥न॥
पङ्कजचरण पङ्कजनाभ
पङ्कजनयन आयाहि ॥न॥
देवकीनन्दन दिव्याभरण
दीनमन्दार आयाहि ॥न॥
शङ्खचक्रधर शङ्करसेवित
मङ्गलविग्रह आयाहि ॥न॥
भक्तवत्सल भवदुःखहरण
भव्यगुणालय आयाहि ॥न॥
पुण्यश्लोक पुराणपुरुष
पुण्डरीकाक्ष आयाहि ॥न॥
विश्वपाल वेणुविलोल
वेदवेद्य आयाहि ॥न॥
चन्दनचर्चित बृन्दावनचर
मन्दहासानन आयाहि ॥न॥
नारदसन्नुत नाथ मया सह
नर्तनं कर्तुमायाहि ॥न॥
गोपीरमण गोवर्धनधर
गोकुलबाल आयाहि ॥न॥
प्रेमिकभावुकपूजितचरण
ब्रह्मादिवन्द्य आयाहि ॥न॥

---

### धन्यासि - आदि

धन्योहं कृष्ण धन्योहम्
धन्योहं तव दर्शनेन
धन्योहं मम जननी धन्या
धन्योहं मम जनको धन्यः ॥ध॥
धन्योहं मम कुलमपि धन्यं
धन्योहं मम कुटुम्बं धन्यम् ॥ध॥
धन्योहं मम जन्म च धन्यं
धन्योहं मम चरितं धन्यम् ॥ध॥
धन्योहं तव कीर्तनेन
धन्योहं तव नर्तनेन ॥ध॥
धन्योहं साधुसङ्गमेन
धन्योहं तव स्मरणेन ॥ध॥
धन्योहं तव श्रवणेन
धन्योहं भवदर्चनेन ॥ध॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

धन्योहं मम सफलं जन्म
धन्योहं तव सफलं नाम ॥ध॥
धन्योहं मम सफलं कर्म
धन्योहं तव सफलं प्रेम ॥ध॥

---

विसृज्य लज्जां योधीते मन्नामानि
निरन्तरम्।
कुलकोटिसमायुक्तो लभते मामकं
पदम्॥
विष्णोर्गानञ्च नृत्तञ्च नटनञ्च
विशेषतः।
ब्रह्मन् ब्राह्मणजातीनां कर्तव्यं
नित्यकर्मवत्॥
नाहं वसामि वैकुण्ठे न योगिहृदये
रवौ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद॥
भक्ताः सङ्गम्य चान्योन्यं दीपं मध्ये
निधाय च
ज्योतिर्मयं मां ध्यायन्तः कीर्तयन्तश्च
मद्गुणान्।
प्रदक्षिणं प्रकुर्वन्तः भूप्रदक्षिणजं
फलम्
लभन्ते नात्र सन्देहो विनतानन्दवर्धन
॥
एकादश्यां जनो विष्णुं रात्रौ सम्पूज्य
भक्तितः।
कुर्याज्जागरणं विष्णोः पुरतो वैष्णवैः
सह॥
नर्तनं कुरुते यस्तु केशवाग्रे नरोत्तमः।
न फलं ह्रीयन्ते तस्य आजन्म
मरणान्तिकम्॥
निमिषं निमिषार्धं वा यः करोति
प्रजागरम्।
धर्मार्थकाममोक्षाणामाप्नोति
पदमव्ययम्॥

यः पुनः कुरुते गीतं नृत्तं जागरणं हरेः।
ब्रह्मं पदं मदीयं च सत्यं वै तस्य
वैष्णवान्॥

---

मोहनम् - आदि

जय जय राघव जय जय राघव
जय विजयीभव जय जय राघव॥
जगदानन्दकर जय जय राघव
जानकीवल्लभ जय जय राघव ।
जलजविलोचन जय जय राघव
जितखरदूषण जय जय राघव॥ज॥
सर्वशरण्य जय जय राघव
सरसिजचरण जय जय राघव ।
श्यामलगात्र जय जय राघव
सज्जनमित्र जय जय राघव ॥ज॥
पुण्यचरित्र जय जय राघव
पुराणपुरुष जय जय राघव ।
पुरारिसेवित जय जय राघव
पुण्डरीकाक्ष जय जय राघव ॥ज॥
लक्ष्मणाग्रज जय जय राघव



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

लक्ष्मीरमण जय जय राघव ।
ललितगुणालय जय जय राघव
लावण्यरूप जय जय राघव ॥ज॥
प्रियजनपालन जय जय राघव
प्रेमिकानन्दन जय जय राघव ।
ब्रह्मादिसेवित जय जय राघव
ब्राह्मणसेवक जय जय राघव ॥ज॥

भैरवि - आदि

सीतामनोहर सुन्दरशरीर
श्रीरामचन्द्र पालय माम् ॥सी॥
भूपतिकुमार श्रीरामचन्द्र
भुवनसुन्दर श्रीरामचन्द्र ।
पुण्यचरित्र श्रीरामचन्द्र
पुण्डरीकाक्ष श्रीरामचन्द्र ॥सी॥
सुकुमारसुन्दर श्रीरामचन्द्र
सुलभगुणाकर श्रीरामचन्द्र ।
सुग्रीवमित्र श्रीरामचन्द्र
सुरगणपूजित श्रीरामचन्द्र ॥सी॥
कोदण्डपाणे श्रीरामचन्द्र
कोमलनयन श्रीरामचन्द्र ।
कौसल्यानन्दन श्रीरामचन्द्र
करुणापयोनिधे श्रीरामचन्द्र ॥सी॥
मन्दहासमुख श्रीरामचन्द्र
मणिमयभूषण श्रीरामचन्द्र ।
मारुतिवल्लभ श्रीरामचन्द्र
मङ्गलविग्रह श्रीरामचन्द्र ॥सी॥
भक्तवत्सल श्रीरामचन्द्र
भरतसहोदर श्रीरामचन्द्र ।
भव्यगुणालय श्रीरामचन्द्र
प्रेमिकपूजित श्रीरामचन्द्र ॥सी॥

नामावलिः

रामचन्द्र रघुवीर रामचन्द्र रणधीर
रामचन्द्र रघुनाथ रामचन्द्र जगन्नाथ
रामचन्द्र रघुराम रामचन्द्र परन्धाम
रामचन्द्र मम बन्धो रामचन्द्र
दयासिन्धो

---

दर्बार् - आदि

राजाधिराजेन्द्र रमणीयमुखचन्द्र
राजीवदलनेत्र श्रीरामभद्र ॥रा॥
कमलविलोचन कौसल्यानन्दन
करुणासागर श्रीरामभद्र ॥रा॥
जगदानन्द जगदेकनाथ
जानकीनायक श्रीरामभद्र ॥रा॥
रविकुलपवित्र रमणीयगात्र
रम्यचरित्र श्रीरामभद्र ॥रा॥
मारुतिसेवित मङ्गलविग्रह
मारीचान्तक श्रीरामभद्र ॥रा॥
सत्यपराक्रम सरसिजनयन
सर्वशरण्य श्रीरामभद्र ॥रा॥
सुग्रीवमित्र सुन्दरगात्र
सद्गुणसान्द्र श्रीरामभद्र ॥रा॥
दशरथनन्दन दशमुखमर्दन
दाशेन्द्रमित्र श्रीरामभद्र ॥रा॥
प्रेमिकभावुक प्रियजनपालक
ब्रह्मादिनायक श्रीरामभद्र ॥रा॥

नामावलिः

कमलनयन राम् कमलवदन राम्
कमलनयन कमलवदन कमलचरण
राम्
जानकीजीवन राम् सज्जनपोषण राम्
जानकीजीवन सज्जनपोषण
सीतामोहन राम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नादनामक्रिया - आदि

कारुण्यवारिधे लावण्यमूर्ते
कामितफलद कमनीयकीर्ते ॥
कौसल्यानन्दन कोदण्डपाणे
कमलविलोचन कोदण्डपाणे ।
कनकाम्बरधर कोदण्डपाणे
कामारिसेवित कोदण्डपाणे ॥का॥
सीतावल्लभ कोदण्डपाणे
श्रितजनवत्सल कोदण्डपाणे ।
सुन्दरवदन कोदण्डपाणे
सुरेन्द्रसेवित कोदण्डपाणे ॥का॥
मङ्गलविग्रह कोदण्डपाणे
मारीचान्तक कोदण्डपाणे ।
महितपराक्रम कोदण्डपाणे
मन्दहासमुख कोदन्डपाणे ॥का॥
धीरगुणोदात्त कोदण्डपाणे
दीनरक्षक कोदण्डपाणे ।
दशरथनन्दन कोदण्डपाणे
दिव्यसुन्दर कोदण्डपाणे ॥का॥
पावनचरित्र कोदण्डपाणे
भक्तवत्सल कोदण्डपाणे ।
ब्रह्मादिपूजित कोदण्डपाणे
प्रेमिकमित्र कोदण्डपाणे ॥का॥

नामावलिः

रघुपते रामचन्द्र राघव दयानिधे

---

असावेरि - त्रिपुट

करुणापयोनिधे जानकीपते
कृपया पाहि मां दाशरथे ॥क॥
तामरसनेत्र तामसगुणरहित
तव दासोहं दाशरथे ॥क॥
श्यामलसुन्दर सौमित्रिसोदर
शरणागतोद्धार दाशरथे ॥क॥
भरताग्रजवर भव्यगुणाकर
भक्तवत्सल दाशरथे ॥क॥
धीरगुणोदात्त दीनदयापर
दिव्यचरित्र दाशरथे ॥क॥
दानवशिक्षक धर्मरक्षक
दान्तस्वभाव दाशरथे ॥क॥
मुनिजनसेवित मोहनविग्रह
मुदिरश्यामल दाशरथे ॥क॥
मणिगणभूषण मञ्जुलभाषण
मन्दहासमुख दाशरथे ॥क॥
प्रेमिकसेवितपादारविन्द
प्रेमपरिपूर्ण दाशरथे ॥क॥

---

नानारत्नविराजिते मृदुतरे
सौवर्णपीठस्थितं
दीव्यत्काञ्चनभूषणं मलयजालिप्तं
प्रसन्नाननम्।
देव्या चामरहस्तया च सहितं
शृङ्गारमूर्तिं प्रभुं
वन्देहञ्च सुमन्त्रसेवितपदं त्वामेव मे
स्वामिनम्॥

कल्याणि - आदि

दशरथनन्दन पालय माम्
जानकीरमण पालय माम् ॥
सुन्दरवदन सीतारमण
सुलभगुणालय सीतारमण ।
शृङ्गाररसिक सीतारमण
श्रितजनवत्सल सीतारमण ॥द॥
कामितफलद सीतारमण
कमलनयन सीतारमण ।
कारुण्यमूर्ते सीतारमण
कोदण्डपाणे सीतारमण ॥द॥
सज्जनपोषक सीतारमण



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सर्वशरण्य सीतारमण ।
शरणागतप्रिय सीतारमण
सरसिजनयन सीतारमण ॥द॥
मारीचान्तक सीतारमण
मङ्गलविग्रह सीतारमण ।
महितप्रताप सीतारमण
मणिमयभूषण सीतारमण ॥द॥
पावनचरित्र सीतारमण
परमपवित्र सीतारमण ।
प्रेमिकमित्र सीतारमण
प्रेमैकपात्र सीतारमण ॥द॥

नामावलिः

## जय् जय् सीताराम् जय् जय् राजाराम्

---

आनन्दभैरवि - आदि

पालय दशरथराजकुमार
पालय सुन्दर सुकुमार ॥
अद्भुतसुन्दर युवराजेन्द्र
अरुणचरण युवराजेन्द्र ।
अमरगणार्चित युवराजेन्द्र
अम्बुजलोचन युवराजेन्द्र ॥पा॥
सर्वसुलभ युवराजेन्द्र
सीतावल्लभ युवराजेन्द्र ।
सुमन्त्रपूजित युवराजेन्द्र
सुन्दरवदन युवराजेन्द्र ॥पा॥
मन्दहासमुख युवराजेन्द्र
मङ्गलविग्रह युवराजेन्द्र ।
मञ्जुलभाषण युवराजेन्द्र
मणिमयभूषण युवराजेन्द्र ॥पा॥
कौसल्यानन्दकर युवराजेन्द्र
करुणासागर युवराजेन्द्र ।
कनकाम्बरधर युवराजेन्द्र
कमलविलोचन युवराजेन्द्र ॥पा॥
भव्यगुणालय युवराजेन्द्र
भक्तवत्सल युवराजेन्द्र ।
पालितप्रेमिक युवराजेन्द्र
भरतसहोदर युवराजेन्द्र ॥पा॥

नामावलिः

## राम राम रामसीता राम राम रामसीता
## राम राम रामसीता राम राम रामसीता

---

मध्यमावति - आदि

जय रघुनन्दन जानकीजीवन
जय विजयी भव जगदीश हरे॥ज॥
सुरगणसेवित सुन्दरचरण
सुगुणालय हरे दशरथनन्दन ॥ज॥
कौशिकमखसंरक्षण राघव
गौतमपत्नीपालक मामव ॥ज॥
शङ्करचापभञ्जनकर जय
सीतानायक मां परिपालय ॥ज॥
पितृवचनपरिपालक कानन-
प्रस्थित लक्ष्मणसहचर सुगुण ॥ज॥
शरणागतभरताश्वासनकर
सत्यसन्ध जय मुनिगणकिङ्कर॥ज॥
धरणिसुताहृदयोत्पलचन्द्र
दण्डकारण्यसञ्चारचतुर ॥ज॥
शूर्पणखामदभङ्गविचक्षण
शूरविमर्दन सुरकल्याण ॥ज॥
मायामानुषवेष महेश्वर
मारीचान्तक महितमहीसुर ॥ज॥
सीतान्वेषणतत्पर रघुवर
श्रितजनपरिपालक श्रीधर ॥ज॥
खगपतिपालक कमलानायक
कबन्धविदारण श्रीरघुनायक ॥ज॥
शबरीदत्तफलादिकतुष्ट
सुग्रीवाभयदायक विशिष्ट ॥ज॥
वालिप्रमथनलीलालोल
वानरमुखश्रुतमैथिलीशील ॥ज॥
विभीषणसान्त्वन सर्वशरण्य
विरचितसेतुसागरतरण ॥ज॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दशमुखमर्दन दयितालोकन-
दैन्यप्रकटनलीलारमण ॥ज॥
ब्रह्माद्यमरपूजितचरण
भरताभयद भक्तार्तिहरण ॥ज॥
प्रियजनसेवितपट्टाभिराम
प्रेमिक प्रेमद श्रीगुणग्राम ॥ज॥

---

काम्बोदि - त्रिपुट

राजीवनेत्रं रमणीयगात्रं
राजाधिराजं राघवमीडे ॥रा॥
मञ्जुलनिनदमञ्जीरभूषण
रञ्जितचरणं राघवमीडे ॥रा॥
मणिमयमेखलामहितमहार्ह-
मृदुकनकाम्बरं राघवमीडे ॥रा॥
कौशेयाम्बरशोभितकाञ्ची-
कनककटिसूत्रं राघवमीडे ॥रा॥
ललितवलित्रयवटपत्रोदरं
वनरुहनाभं राघवमीडे ॥रा॥
जनकसुताकुचकुट्मललाञ्छित-
विशालवक्षःस्थलं राघवमीडे ॥रा॥
मणिमयतरलहारविभूषित-
हृदयकपाटं राघवमीडे ॥रा॥
परिमळचन्दनलिप्तमहोन्नत-
विपुलोरःस्थलं राघवमीडे ॥रा॥
आवापकवरभूषितसुन्दर-
भुजगायतभुजं राघवमीडे ॥रा॥
मणिमयकङ्कणमण्डितसुन्दर-
करतलकमलं राघवमीडे ॥रा॥
कङ्कणभूषितकरयुगशोभित-
कार्मुकबाणं राघवमीडे ॥रा॥
मरुवकमन्दारमाधवीमल्ली-
तुळसीमालं राघवमीडे ॥रा॥
चञ्चलचारुमनोहरकुण्डल-
शोभितकर्णं राघवमीडे ॥रा॥
निर्मलपूर्णकलाधरसुन्दर-
मनोरमवदनं राघवमीडे ॥रा॥
करुणारसभरचञ्चलकोमळ-
नयनसरोजं राघवमीडे ॥रा॥
अरुणाधरपुटशोभितदन्त-
मौक्तिकनासं राघवमीडे ॥रा॥
कस्तूरितिलकाञ्चितसुन्दर-
विपुलललाटं राघवमीडे ॥रा॥
भास्करकोटिसमानहिरण्मय-
मकुटविराजितं राघवमीडे ॥रा॥
भरतशत्रुघ्नवीजितचामरं
पावनचरित्रं राघवमीडे ॥रा॥
सुमित्रानन्दनगृहीतछत्रं
सुग्रीवमित्रं राघवमीडे ॥रा॥
वामाङ्कस्थितजनककुमारी-
वीक्षितवदनं राघवमीडे ॥रा॥
पवनसुतार्चितपादसरोज-
पीठस्थितपादं राघवमीडे ॥रा॥
रत्नसिंहासनमध्यविराजित-
रमणीयमूर्तिं राघवमीडे ॥रा॥
प्रेमिककीर्तितपुण्यचरित्रं
भक्तानुग्रहं राघवमीडे ॥रा॥

---

आरभि - आदि

प्राणवल्लभ हरे पालय मां कृष्ण
राधावल्लभ रक्ष माम् ॥
कुटिलालकभर गोपाल
कुवलयनील गोपाल
कुन्दरदन श्रीगोपाल



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कुङ्कुमपङ्किल गोपाल ॥प्रा॥
गोपिकारमण गोपाल
गोवर्धनधर गोपाल
गोकुलनन्दन गोपाल
गोवत्सपोषण गोपाल ॥प्रा॥
रसिकाग्रेसर गोपाल
रञ्जितभुवन गोपाल
रासविलोल गोपाल
रमणीयचरित्र गोपाल ॥प्रा॥
मङ्गलविग्रह गोपाल
मणिमयभूषण गोपाल
मञ्जुलभाषण गोपाल
मन्दस्मिताधर गोपाल ॥प्रा॥
भक्तवत्सल गोपाल
भव्यगुणालय गोपाल
ब्रह्मादिवन्दित गोपाल
प्रेमिकपूजित गोपाल ॥प्रा॥

नामावलिः

गोपाल गोपाल गोकुलनन्दन गोपाल
गोपाल गोपाल गोपिकालोल गोपाल
नन्दकुमार गोपाल नवनीतचोर गोपाल
वेणुविलोल गोपाल विजयगोपाल गोपाल
कालीयनर्तन गोपाल कलिमलभञ्जन गोपाल
भक्तवत्सल गोपाल भागवतप्रिय गोपाल

---

केदारगौल - आदि

मेघश्यामल नन्दकुमार
मोहनरूप नन्दकुमार
मुनिजनसेवित नन्दकुमार
मुरलीधर श्रीनन्दकुमार ॥
पालय मां हरे नन्दकुमार
भक्तिरसं देहि नन्दकुमार ॥
राजीवलोचन नन्दकुमार
राधावल्लभ नन्दकुमार
रामसहोदर नन्दकुमार
रमणीयवदन नन्दकुमार ॥पा॥
कमनीयचेल नन्दकुमार
कालीयनर्तन नन्दकुमार
करुणावीक्षण नन्दकुमार
कमलविलोचन नन्दकुमार ॥पा॥
चन्दनचर्चित नन्दकुमार
चम्पकनासिक नन्दकुमार
चञ्चलकुण्डल नन्दकुमार
चन्द्रावलीप्रिय नन्दकुमार ॥पा॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भक्ताकर्षण नन्दकुमार
प्रणयनिबद्ध नन्दकुमार
बृन्दावनचर नन्दकुमार
प्रेमिकनायक नन्दकुमार ॥पा॥

नामावलिः

नन्दकुमारवर नवनीतचोर हरे
देव देव वासुदेव हरे कृष्ण
गोपीमनचोर गोपाल कृष्ण हरे
देव देव वासुदेव हरे कृष्ण

---

कुन्तलवरालि - आदि

गोविन्द गोविन्द गोपालकृष्ण
गोपाल गोपाल गोविन्दकृष्ण॥
गोकुलनन्दन गोपिकारमण
गोवर्धनधर गोपालकृष्ण ॥गो॥
राधावल्लभ रासविलोल
राजीवलोचन गोपालकृष्ण ॥गो॥
कंसविमर्दन कालीयनर्तन
कमलचरण गोपालकृष्ण ॥गो॥
त्रिभुवनकमन त्रिभङ्गिविग्रह
त्रिजगन्नायक गोपालकृष्ण ॥गो॥
यदुकुलबाल यमुनाविहार
यज्ञपत्नीप्रिय गोपालकृष्ण ॥गो॥
तरुणीजार ताण्डवलोल
दामोदर हरे गोपालकृष्ण ॥गो॥
मुरलीवादन मुनिजनमोहन
मुदिरश्यामल गोपालकृष्ण ॥गो॥
भक्तकुतूहल भव्यगुणालय
भावुकवत्सल गोपालकृष्ण ॥गो॥
प्रेमिकमित्र ब्रह्मादिवन्द्य
बृन्दावनप्रिय गोपालकृष्ण ॥गो॥

नामावलिः

कृष्ण कृष्ण मुकुन्द जनार्दन
कृष्ण गोविन्द नारायण हरे
अच्युतानन्त गोविन्द माधव
सच्चिदानन्द नारायण हरे

---

दर्भार् - त्रिपुट

प्रसीद प्रसीद गोविन्द हरे
परमानन्दं देहि गोविन्द
राधिकावल्लभ गोविन्द हरे
रासविलोल गोविन्द ॥प्र॥
व्रजराजनन्दन गोविन्द हरे
गजराजगमन गोविन्द ॥प्र॥
असमानलावण्य गोविन्द हरे
अम्बुजलोचन गोविन्द ॥प्र॥
मुरलीगानलोल गोविन्द हरे
मुनिजनमोहन गोविन्द ॥प्र॥
किङ्किणीभूषित गोविन्द हरे
कुङ्कुमपङ्किल गोविन्द ॥प्र॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गोपिकारमण गोविन्द हरे
कोमलवचन गोविन्द ॥प्र॥
व्यत्यस्तपादाब्ज गोविन्द हरे
व्याससुतार्चित गोविन्द ॥प्र॥
व्याघ्रनखभूष गोविन्द हरे
वैजयन्तीहार गोविन्द ॥प्र॥
प्रणयवशीकृत गोविन्द हरे
प्रेमिकबन्धो गोविन्द ॥प्र॥

नामावलिः

गोविन्द गोविन्द गोविन्द गिरिधारि
श्यामसुन्दर कमलवदन
बृन्दावनसञ्चारि

---

तोडि - आदि

नन्दकुमार गोपीरमण
नवनीतप्रिय गोपीरमण
बृन्दावनचर गोपीरमण
मन्दस्मितमुख गोपीरमण ॥
गोकुलनन्दन पालय मां कृष्ण
गोपिकारमण पालय माम् ॥
यशोदाबालक गोपीरमण
यदुकुलतिलक गोपीरमण
यज्ञसंरक्षक गोपीरमण
यज्ञपत्नीप्रिय गोपीरमण ॥गो॥
गोवर्धनधर गोपीरमण
गोकुलरक्षक गोपीरमण
कोमलाधर गोपीरमण
गोवत्सप्रिय गोपीरमण ॥गो॥
राधावल्लभ गोपीरमण
राकेशमुख गोपीरमण
रसपरिपूर्ण गोपीरमण
रासविलोल गोपीरमण ॥गो॥
प्रमदालोल गोपीरमण
प्रेमिकपाल गोपीरमण
ब्रह्मविमोहन गोपीरमण
प्रणयरसप्रिय गोपीरमण ॥गो॥

नामावलिः

गोविन्द गोविन्द गोपाल राधारमण

---

आनन्दभैरवि - आदि

मुरलीधर हरे राधारमण
मुकुन्द मुरारे राधारमण
मुनिजनपालन राधारमण
मुदं मम देहि राधारमण ॥
रासविलोल पालय मां कृष्ण
राधावल्लभ रक्ष माम् ॥
कुञ्जनिवास राधारमण
कुटिलकुन्तल राधारमण
कुण्डलचुम्बित राधारमण
कोमलाधर राधारमण ॥रा॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पीताम्बरधर राधारमण
पीनवक्षःस्थल राधारमण
पीतदधिक्षीर राधारमण
प्रियजनपालन राधारमण ॥रा॥
मन्दहासमुख राधारमण
नन्दकुमार राधारमण
चन्दनचर्चित राधरमण
बृन्दावनचर राधारमण ॥रा॥
प्रचुरघनाभ राधारमण
प्रेमिकसुलभ राधारमण
पङ्कजनाभ राधारमण
प्रेमस्वरूप राधारमण ॥रा॥

नामावलिः

राधारमण जय् राधारमण जय्
राधरमण जय् गोविन्द
राधारमण जय् राधारमण जय्
राधरमण जय् गोपाल

---

## शङ्कराभरणम् - त्रिपुट

श्यामलसुन्दर कोमलविग्रह
गोपालबाल हरे हरे कृष्ण ॥
गोवर्धनधर गोपिकावल्लभ
गोकुलनन्दन पालय माम् ॥
मुरलीवादन मोहितभुवन
गोपालबाल हरे हरे कृष्ण ॥गो॥
नन्दयशोदालालितमूर्ते
गोपालबाल हरे हरे कृष्ण ॥गो॥
राधारदनखण्डितगण्ड
गोपालबालहरे हरे कृष्ण ॥गो॥
गोपीकुचयुगकुङ्कुमपङ्किल
गोपालबाल हरे हरे कृष्ण ॥गो॥
चन्दनचर्चित शृङ्गारमूर्ते
गोपालबाल हरे हरे कृष्ण ॥गो॥
तकधिमितकधिमिताण्डवलोल
गोपालबाल हरे हरे कृष्ण ॥गो॥
वल्लववनितावस्त्रापहारक
गोपालबाल हरे हरे कृष्ण ॥गो॥
पल्लवपदयुगनाट्यविहार
गोपालबाल हरे हरे कृष्ण ॥गो॥
प्रेमिकपूजितपादारविन्द
गोपालबाल हरे हरे कृष्ण ॥गो॥

नामावलिः

श्रीकृष्ण गोविन्द हरे मुरारे
हे नाथ नारायण वासुदेव
जिह्वे पिबस्वामृतमेतदेव
गोविन्द दामोदर माधवेति

---

## कापि - आदि

गोपिकारमण गोकुलनन्दन
गोवत्सपोषण हरे कृष्ण ॥
राधारमण रसपरिपूर्ण



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रसिकाग्रगण्य हरे कृष्ण ॥गो॥
नन्दकिशोर नवनीतचोर
नवनटनागर हरे कृष्ण ॥गो॥
वेणुविलोल व्यत्यस्तपाद
वेदान्तवेद्य हरे कृष्ण ॥गो॥
कालीयनर्तन कंसविमर्दन
करुणायतन हरे कृष्ण ॥गो॥
श्यामसुन्दर रामसहोदर
कोमलाधर हरे कृष्ण ॥गो॥
श्रीमन्दहासकृतपरिहास
विरचितरास हरे कृष्ण ॥गो॥
गुञ्जाभरण कुञ्जनिकेतन
रञ्जितभुवन हरे कृष्ण ॥गो॥
श्रीवनमाल शोभितगल
श्रितजनपाल हरे कृष्ण ॥गो॥
प्रेमिकपाल प्रमदालोल
ब्रह्मादिमूल हरे कृष्ण ॥गो॥

नामावलिः

श्यामसुन्दर कमलवदन मोरमकुटधारि
माधव हरे माधव हरे माधव गिरिधारि

---

सहाना - त्रिपुट

आनन्दकन्द व्रजराजनन्दन
वृन्दावनचर हे भक्तचन्दन ॥आ॥
राधाधररसरसिकमधुव्रत
रासकेलिरत मदनगोपाल ॥आ॥
राधाकुचयुगकन्दुकलोल
रञ्जितगोकुल मदनगोपाल ॥आ॥
राधाकटाक्षवीक्षणविमुग्ध
रमणीरसिक मदनगोपाल ॥आ॥
राधाकरयुगपिहितपद्माक्ष
रसराजराजित मदनगोपाल ॥आ॥
राधापदयुगलाञ्छितहृदय
राकाचन्द्रमुख मदनगोपाल ॥आ॥
राधाचुम्बितमुकुरकपोल
रसिकाग्रेसर मदनगोपाल ॥आ॥
राधालिङ्गितमृदुतरगात्र
रम्यचरित्र मदनगोपाल ॥आ॥
राधाकज्जलनीलकलेबर
रसमयशरीर मदनगोपाल ॥आ॥
राधाताम्बूलारुणवदन
रञ्जितभुवन मदनगोपाल ॥आ॥
राधावक्षःस्थलमृदुशयन
राजीवनयन मदनगोपाल ॥आ॥
राधाङ्गरङ्गनटिक प्रेमिका-
राधितविग्रह मदनगोपाल ॥आ॥

नामावलिः

आनन्दनन्दन हे नन्दनन्दन
गोपीजनप्राणधन राधाङ्गचन्दन

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भाग्यानां
बहुजन्मपुण्यनिचयैरभ्यर्चितानामिमं
दातारं करुणार्णवं कलिमलप्रध्वंसनं
माधवम् ।
अव्याजस्मिततोषितश्रितजनं
नित्योत्सवानन्दितं
गोविन्दं निजभक्तबृन्दसहितं
पश्यामि वेणातटे॥

काम्भोजि - आदि

मदनकोटिसममधुराकारं
मन्मथमन्मथं माधवमीडे सखि
मोहनमुरलीवादनमीडे ॥
शिञ्जितनूपुरमञ्जुलचरणाब्ज-
रञ्जितगोकुलं माधवमीडे ॥म॥
कनकाम्बरधरं कटितटशोभित-
कनकमयसूत्रं माधवमीडे ॥म॥
ललितवलीयुतकमलदलोदर
विलसितनाभं माधवमीडे ॥म॥
मलयजचन्दनकुङ्कुमपङ्किल-
विपुलवक्षःस्थलं माधवमीडे ॥म॥
कण्ठलम्बितकौस्तुभं कलित-
श्रीवनमालं माधवमीडे ॥म॥
मणिमयकङ्कणकटकविभूषित-
करयगकमलं माधवमीडे ॥म॥
कुटिलतरासितकुन्तलं गण्ड-
लम्बितकुण्डलं माधवमीडे ॥म॥
नासिकाग्रपरिशोभितमौक्तिकं
नवनटनागरं माधवमीडे ॥म॥
निर्जितमणिमयमुकुरकपोल
सज्जितकुण्डलं माधवमीडे ॥म॥
मन्दस्मितरसमोहितमहिला -
चुम्बितवदनं माधवमीडे ॥म॥
बिम्बाधरपुटशोभितमुरली-
गानविलोलं माधवमीडे ॥म॥
ललितभ्रुकुटिवलयितचञ्चल-
कमलविलोचनं माधवमीडे ॥म॥
कुटिलालकयुतविपुलललाट
शोभिततिलकं माधवमीडे ॥म॥
कर्णान्तायतलोचनं कलित-
कज्जललेपनं माधवमीडे ॥म॥
नवनवमणिमयमकुटविराजित-
ललितशिखण्डकं माधवमीडे ॥म॥
ललितत्रिभङ्गिमोहनविग्रहं
भक्तानुग्रहं माधवमीडे ॥म॥
बृन्दावनचरं वन्दारुमन्दारं
प्रेमिकाधारं माधवमीडे ॥म॥

नामावलिः

जय जय गोविन्द जय जय गोपाल
गोविन्दराधे गोपालराधे
दीनदयालो प्रभो दीनदयालो



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## माण्डु - आदि

जय गोपाल जय गोपाल जय गोपाल हरे
जय गोपाल जय गोपाल जय गोपाल हरे

सरसगुणालय सरसिजनेत्र
सन्तानगोपाल हरे ॥ज॥
नारदसन्नुत नवनीतचोर
नन्दगोपाल हरे ॥ज॥
राधालोल रासविलोल
राजगोपाल हरे ॥ज॥
मधुरानायक मङ्गलविग्रह
मदनगोपाल हरे ॥ज॥
वेदवेद्य वासुदेव
वेणुगोपाल हरे ॥ज॥
भक्तवत्सल भागवतप्रिय
बालगोपाल हरे ॥ज॥
विधिरुद्रेश विजयसहाय
विजयगोपाल हरे ॥ज॥
गोकुलनन्दन गोवर्धनधर
गोपीगोपाल हरे ॥ज॥
प्रियजनपाल ब्रह्मादिमूल
प्रेमगोपाल हरे ॥ज॥

### नामावलिः

गोपीजननाथ गोपालबाल
गोविन्दयदुनन्दन – जनार्दन
गोपाल मधुसूदन
तापरहितशरच्चन्द्रसमवदन
गोपाङ्गनामोहन जनार्दन

---

## कल्याणि - आदि

अष्टसखीजनसेवितचरण
कृष्ण मुरारे राधिकारमण ॥
ललितारमण व्रजयुवराज
लावण्यशील व्रजयुवराज ।
ललन्तिकाभरण व्रजयुवराज
लीलारसिक व्रजयुवराज ॥अ॥
विशाखावल्लभ व्रजयुवराज
विरहितताप व्रजयुवराज ।
विनतजनप्रिय व्रजयुवराज
विदलितकल्मष व्रजयुवराज ॥अ॥
पद्मामनोहर व्रजयुवराज
पद्ममुखोल्लास व्रजयुवराज ।
पङ्कजनयन व्रजयुवराज
पङ्कजचरण व्रजयुवराज ॥अ॥
चन्द्रलेखाप्रिय व्रजयुवराज
चन्द्रवदन व्रजयुवराज ।
चन्द्रकमकुट व्रजयुवराज
चञ्चलकुण्डल व्रजयुवराज ॥अ॥
चम्पकवल्लीश व्रजयुवराज
चम्पकनासिक व्रजयुवराज ।
चन्दनचर्चित व्रजयुवराज
चारुमन्दस्मित व्रजयुवराज ॥अ॥
भद्राप्राणेश व्रजयुवराज
भक्तवत्सल व्रजयुवराज ।
भव्यगुणालय व्रजयुवराज
भजनरसिक व्रजयुवराज ॥अ॥
श्यामळाकामुक व्रजयुवराज
श्यामसुन्दर व्रजयुवराज ।
कामकोटिनिभ व्रजयुवराज
कोमळवचन व्रजयुवराज ॥अ॥
तुङ्गविद्यानाथ व्रजयुवराज
मङ्गलविग्रह व्रजयुवराज
सङ्गीतप्रिय व्रजयुवराज
शृङ्गाररसिक व्रजयुवराज ॥अ॥
प्रमदाचित्तचोर व्रजयुवराज



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रेमिकवत्सल व्रजयुवराज
ब्रह्मादिदुर्लभ व्रजयुवराज
बृन्दावनचर व्रजयुवराज ॥अ॥

नामावलिः

**गोवर्धनोद्धार गोकुलसञ्चार**
**गोपीमनोहर गोकुलेशनन्दन**

---

शङ्कराभरणम् - देशादि

बृन्दावनेश्वर गोविन्द
बृन्दावनेश्वरि राधे ।
बृन्दारकवरयुवतीबृन्दा-
नन्दनसुन्दरि राधे ॥
नन्दनन्दन गोविन्द
बृषभानुनन्दिनि राधे ।
मन्दस्मितपरिशोभित-
सुन्दरमुखारविन्दे राधे ॥
श्यामसुन्दर गोविन्द
गौरसुन्दरि राधे ।
कामकोटिदर्पहरभ्रू-
नर्तनचतुरे राधे ॥
पुण्डरीकाक्ष गोविन्द
पद्मदलाक्षि राधे ।
कण्ठशोभितमणिमयपदके
केशवकामिनि राधे ॥
व्रजयुवराज गोविन्द
व्रजयुवराज्ञि राधे ।
ध्वजवज्राङ्कुशरेखालङ्कृत-
चरणकमले राधे ॥
गजराजगमन गोविन्द
कलहंसगामिनि राधे ।
व्रजयुवतीजनकरसरसिज-
लालितचरणे राधे ॥

कुञ्जविहार गोविन्द
कुञ्जविहारिणि राधे ।
शिञ्जितमणिमञ्जीरनिनद-
रञ्जितरसिके राधे ॥
वेणुविलोल गोविन्द
वीणारसिके राधे ।
वेदवेदान्तदुरूहचरित्रा-
नन्दितभक्ते राधे ॥
गोपिकारमण गोविन्द
गोपिकारञ्जनि राधे ।
कोमळवचनमाधुर्यपूरित-
गोविन्दकर्णे राधे ॥
कुटिलकुन्तल गोविन्द
कुञ्जितवेणि राधे ।
कोकिलकेकिकलहंसशुक-
कीर्तितकीर्ते राधे ॥
भक्तवत्सल गोविन्द
भव्यगुणालय राधे ।
भावुकप्रेमिकमण्डलपूजित-
पादपद्मे राधे ॥

नामावलिः

**राधे राधे राधे राधे**
**राधेगोविन्द बृन्दावनचन्द्र**
**अनाथनाथ दीनबन्धो राधेगोविन्द**
**पुराणपुरुष पुण्यश्लोक राधेगोविन्द**
**नन्दमुकुन्द नवनीतचोर राधेगोविन्द**
**यशोदाबाल यदुकुलतिलक**
**राधेगोविन्द**
**गोपीमोहन गोवर्धनधर राधेगोविन्द**
**मञ्जुलभाषण कुञ्जविहारि**
**राधेगोविन्द**
**भक्तवत्सल परमदयालो राधेगोविन्द**



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## भागवतप्रिय परमदयालो राधेगोविन्द गोकुलनन्दन गोपिकालोल राधेगोविन्द

---

### कानडा - आदि

नन्दकुमार नन्दकुमार
जय गोविन्द हरे ।
नन्दकुमार नन्दकुमार
जय गोपाल हरे ॥
वसुदेवदेवकीपुत्र कृष्ण
विकसितवारिजनेत्र ॥न॥
गोपराजकुमार कृष्ण
गोकुलकृतसञ्चार ॥न॥
पूतनामुक्तिदायक कृष्ण

पुण्यचरित्र श्रीनायक ॥न॥
शकटासुरभञ्जन कृष्ण
सरसिजसुन्दरचरण ॥न॥
तृणावर्तसंहरण कृष्ण
त्रिविक्रम गोपीरमण ॥न॥
गर्गमहामुनिकीर्तित कृष्ण
गोकुलनारीनर्तित ॥न॥
दधिनवनीतचोर कृष्ण
तरुणीहृदयविहार ॥न॥
विश्वरूपप्रदर्शक कृष्ण
विश्वव्यापक पद्ममुख ॥न॥
बृन्दावनसञ्चार कृष्ण
नन्दात्मज सुकुमार ॥न॥
यमुनातीरविहार कृष्ण
यतिजनचित्तचोर ॥न॥
मुरळीगानविलोल कृष्ण
महिलामण्डललोल ॥न॥
दानकेळिचतुर कृष्ण
तरूणीहृदयविहार ॥न॥

कालिन्दीजलनाविक कृष्ण
कामिनीमण्डलरसिक ॥न॥
गोपीवस्त्रापहार कृष्ण
गोपसुन्दरीजार ॥न॥
राधाचित्तरञ्जन कृष्ण
रासक्रीडारमण ॥न॥
अघबकप्राणविमोचन कृष्ण आभीरार्भकरञ्जन ॥न॥
बृन्दावनकृतभोजन कृष्ण
ब्रह्ममानसमोहन ॥न॥
कालिन्दीकृतस्नान कृष्ण
कालीयफणनटन ॥न॥
ब्राह्मणपत्नीपूजित कृष्ण
ब्रह्मरुद्रादिसेवित ॥न॥
गोवर्धनगिरिधर कृष्ण
गोकुलपालनकर ॥न॥
आनन्दकन्दगोविन्द कृष्ण
आभीरपरमानन्द ॥न॥
अक्रूरसेवितचरण कृष्ण
अबलाक्रन्दनसान्त्वन ॥न॥
कुब्जाचन्दनलिप्ताङ्ग कृष्ण
कुवलयश्यामळसुन्दराङ्ग ॥न॥
मालाकारानुग्रह कृष्ण
मल्लचाणूरनिग्रह ॥न॥
भोजराजविमुक्तिद कृष्ण
भक्तमण्डलकीर्तित ॥न॥
सान्दीपनिमुनिभव्य कृष्ण
सकलश्रुतिप्रतिपाद्य ॥न॥
उद्धवहृदयानन्द कृष्ण
उत्तमसद्गुणबृन्द ॥न॥
असमानरूपलावण्य कृष्ण
आश्रितजनपालन ॥न॥
भीष्मकुमारीहरण कृष्ण
भामाचित्तरञ्जन ॥न॥
द्वारकापुरीनायक कृष्ण
दारुकादिसहायक ॥न॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अष्टमहिषीनायक कृष्ण
शिष्टजनपरिपालक ॥न॥
पालितपाण्डुकुमार कृष्ण
पाञ्चालीहृदयविहार ॥न॥
कुचेलपृथुकरसिक कृष्ण
किङ्करकुटुम्बरक्षक ॥न॥
अनन्तकल्याणगुण कृष्ण
अपरिमितलीलारमण ॥न॥
सुरगणपूजितचरित कृष्ण श्रुतदेवसेवितपाद ॥न॥
उत्तमभक्तमनोहर कृष्ण
उद्धवानुग्रहतत्पर ॥न॥
शङ्खचक्रधर गोविन्द कृष्ण
शङ्करब्रह्मादिसुरानन्द ॥न॥
प्रभासकलितान्तर्धान कृष्ण
पुनरपि लोके अवतीर्ण ॥न॥
प्रेमिकरचिताराधन कृष्ण
भक्तकोलाहलश्रीकृष्ण ॥न॥

### नामावलिः

नटवरलाल गिरिधरगोपाल
जय् जय् नन्दयशोदा के लाल
सार सार सब्से सार
राधारसिकवर रासविहार ॥
शरदपूर्णिमा निर्मलयमुना
अद्भुतरासमहोत्सव अनुपम ॥सा॥
गौरराधा और घनश्याम्
युगलशोभ अपार ललाम ॥सा॥
स्फटिक स्फटिकमय गोपिमण्डलधाम्
गोपी गोपीमध्य मरकतश्याम् ॥सा॥
धन्य धन्य व्रजनारीधन्य हो
धन्य बृन्दावनकुञ्ज धन्य हो
खगमृगतरुसब् धन्य धन्य हो
व्रजरजयमुनापुलिन धन्य हो

---

## रासलीला

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिका-
स्तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः॥
पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः।
समवेता जगुः कृष्णं तदागमनकाङ्क्षिताः॥

## गोपिकागीतम्

जयति तेऽधिकं जन्मना व्रजः
श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावका-
स्त्वयि धृतासवस्त्वां विचिन्वते॥
शरदुदाशये साधुजात-
सत्सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका
वरद निघ्नतो नेह किं वधः ॥
विषजलाप्ययाद् व्यालराक्षसाद्
वर्षमारुताद् वैद्युतानलात् ।
वृषमयात्मजाद् विश्वतोभया-
दृषभ ते वयं रक्षिता मुहुः ॥
न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विरचिताभयं वृष्णिधुर्य ते
चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदं
शिरसि धेहि नः श्रीकरग्रहम् ॥
व्रजजनार्तिहन् वीर योषितां
निजजनस्मयध्वंसनस्मित ।
भज सखे भवत्किङ्करीः स्म नो
जलरुहाननं चारु दर्शय ॥
प्रणतदेहिनां पापकर्शनं
तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदाम्बुजं
कृणु कुचेषु नः कृन्धि हृच्छयम्॥
मधुरया गिरा वल्गुवाक्यया
बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीर मुह्यती-
रधरसीधुनाऽऽप्याययस्व नः ॥
तव कथामृतं तप्तजीवनं
कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं
भुवि गृणन्ति ते भूरिदा जनाः ॥
प्रहसितं प्रिय प्रेमवीक्षणं
विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदि स्पृशः
कुहक नो मनः क्षोभयन्ति हि ॥
चलसि यद् व्रजाच्चारयन् पशून्
नलिनसुन्दरं नाथ ते पदम् ।
शिलतृणाङ्कुरैः सीदतीति नः
कलिलतां मनः कान्त गच्छति॥

दिनपरिक्षये नीलकुन्तलै-
र्वनरुहाननं बिभ्रदावृतम् ।
घनरजस्वलं दर्शयन् मुहु-
र्मनसि नः स्मरं वीर यच्छसि ॥
प्रणतकामदं पद्मजार्चितं
धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमं च ते
रमण नः स्तनेष्वर्पयाधिहन् ॥

सुरतवर्धनं शोकनाशनं
स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां
वितर वीर नस्तेऽधरामृतम् ॥
अटति यद् भवानह्नि काननं
त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते
जड उदीक्षतां पक्ष्मकृद् दृशाम् ॥
पतिसुतान्वयभ्रातृबान्धवा-
नतिविलङ्घ्य तेऽन्त्यच्युतागताः।
गतिविदस्तवोद्गीतमोहिताः
कितव योषितः कस्त्यजेन्निशि ॥
रहसि संविदं हृच्छयोदयं
प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरः श्रियो वीक्ष्य धाम ते
मुहुरतिस्पृहा मुह्यते मनः ॥
व्रजवनौकसां व्यक्तिरङ्ग ते
वृजिनहन्त्र्यलं विश्वमङ्गलम् ।
त्यज मनाक् च नस्त्वत्स्पृहात्मनां
स्वजनहृद्रुजां यन्निषूदनम् ॥

- - -

यत्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु।
तेनाटवीमटसि तद् व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः॥
इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः॥
तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः॥
तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः।
उत्तस्थुर्युगपत् सर्वास्तन्वःप्राणमिवागतम्॥

**कृष्णस्य मुखलावण्यसुधां**
**नयनभाजनैः।**
**आपीयापीय नातृप्यन्** सन्तस्तच्चरणं यथा॥

## रासलीला अभिनयम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## कापि - आदि

माधवीमालतीमल्लिकालङ्कृते
पारिजातादिभिर्भूरुहैरावृते ।
मत्तहंसस्वने यामुनेये वने
वल्लवीमण्डले माधवो नृत्यति ॥
दिव्यपीताम्बरो वैजयन्तीधरो
निक्वणन्नूपुरः पक्वबिम्बाधरः ।
श्यामळसुन्दरः स्वर्णवंशीधरो
वल्लवीमण्डले माधवो नृत्यति ॥
मुग्धगोपीजनानन्दसंवर्धनो
रासलीलारसोन्मत्तराधाप्रियः ।
प्रेमसंपूर्णसङ्कीतनाराधितो
वल्लवीमण्डले माधवो नृत्यति ॥

---

## मोहनम् - आदि

काककोककेकिहंसशारिकादिकूजिते
मल्लिकादिगन्धयुक्तमारुतेन वीजिते ।
कालिन्दीवनान्तरे कलाधरविराजिते
रासकेळिरसिकगोपीप्राणनाथो विजयते॥
गोपसुन्दरीमनोज्ञवेणुवाद्यपण्डितः
हीररत्नहारहेमकङ्कणादिमण्डितः।
राधिकामुखारविन्ददन्तपङ्क्तिखण्डितः
रासकेळिरसिकगोपीप्राणनाथो विजयते॥
दिव्यगन्धयुक्ततिलकलिप्तफालफलकः
गोपकन्यकाकुचाग्रस्पर्शजातपुलकः।
केकिबर्हखचितरत्नमकुटशोभितालकः
रासकेळिरसिकगोपीप्राणनाथो विजयते॥

---

## सोहिनि - आदि

तुहिनकिरणशीतले सुगन्धमन्दवातुले
कलिन्दनन्दिनीकूले ललितरासमण्डले॥
कलय राधिकाप्रियं कामिनीसमाश्रयम्॥
चलितसुन्दरस्तने मिलितपीनजघने
कनकमयमण्डने वलितवल्लवीगणे॥क॥
सरसगीतसंयुते विविधवाद्यमुखरिते
प्रेमभावसंभृते प्रियजनैः समावृते ॥क॥

---

## आनन्दभैरवि - आदि

घनश्यामळसुन्दराकृतिच्छविपूरितविपिनं
मणिनूपुरशिञ्जितारुणपदपङ्कजनटनम् ।
राधिकाकुचकुङ्कुमारुणवक्षसं वनमालिनं
रासमण्डलरसिकं मम प्राणवल्लभमाश्रये॥
कनकाम्बरपरिवेष्टितकटिशोभितशृङ्खलं
कमलायतनयनादृतव्रजसुन्दरीमण्डलम्।
मल्लिकादिकुसुमभूषितकुटिलासितकुन्तलं
रासमण्डलरसिकं मम प्राणवल्लभमाश्रये॥
मणिकुण्डलपरिमण्डितमृदुगण्डमुकुरं
मुरळीरवपुळकीकृतवनभूरुहनिकरम् ।
कनकमयकिरीटोज्ज्वलबर्हभूषितशिखरं
रासमण्डलरसिकं मम प्राणवल्लभमाश्रये॥

---

## कापि - आदि

मन्दसमीरे मधुराकारे
कूजति कोकिलनिकरे
अतिलावण्ये बृन्दारण्ये
क्रीडति रासविहारी
हरिः कूजति मुरळीधारी ॥
मनसिजमन्दे सरसिजगन्धे वल्लववनितानन्दे
प्रेमविहारे यमुनातीरे
क्रीडति रासविहारी
हरिः कूजति मुरळीधारी ॥
पीतदुकूली श्रीवनमाली परमकल्याणगुणशाली
रतिरसमत्ते गोपीमध्ये
क्रीडति रासविहारी
हरिः कूजति मुरळीधारी ॥
गायति नारदे ध्यायति शङ्करे
वर्षति कुसुमं सुरनिकरे



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गोपकिशोरी हृदयसञ्चारी
क्रीडति रासविहारी
हरिः कूजति मुरळीधारी ॥
प्रेमिकगीते रसिकैःपीते
त्रिगुणातीते बहुललिते
यमुनापुळिने त्रिभुवनकमने
क्रीडतिरासविहारी
हरिः कूजति मुरळीधारी ॥

---

हिन्दुस्तान्कापि - आदि

कालिन्दीतटकुञ्जभवने
क्रीडति सखि वनमाली
कामिनिकुचतटकुङ्कुमपङ्किल-
वक्षःस्थल स्मितशाली ॥क॥
शारदचन्द्रचन्द्रिकारञ्जित
रासमहोत्सवकारी
नारदप्रमुखमुनिजनमण्डल
निर्मलहृदयविहारी ॥का॥
वल्लववनितामण्डलचित्त-
मोहन मुरळीधारी
पल्लवकोमळपदयुगशोभित-
मणिमयनूपुरधारी ॥का॥
गोकुलनारीमण्डलवदन-
चुम्बनरसिकः कामी
कोटिमन्मथसुन्दरो भुवन-
मङ्गलचरितः स्वामी ॥का॥
बृन्दारण्यकभूरुहबृन्द-
निबिडमार्गसञ्चारी
प्रेमिकभावुकभक्तमण्डल-
रञ्जनकुञ्जविहारी ॥का॥

---

सेञ्चुरुट्टि - आदि

पश्यत राधाचित्तरमणम् ॥प॥
चन्दनचर्चितचारुशरीरम्
झञ्झलझलझलरवमञ्जीरम् ॥प॥
राधाकरमवलम्ब्य भ्रमन्तम्
रसिकं रक्षितभुवनमनन्तम् ॥प॥
चञ्चलकिसलयतुलसीहारम्
चन्द्रकलासमशीतलसारम् ॥प॥
चञ्चलकुण्डलचारुकपोलम्
सरसप्रेमिकसुन्दरबालम् ॥प॥

---

बीम्प्लास् - आदि

तव चरणाम्बुजमेव गतिर्मे
मुरळीधर गोपाल हरे ॥तव॥
श्यामळसुन्दर पीताम्बरधर
कोमलबिम्बाधर गोपाल ॥तव॥
करुणासिन्धो कलय कटाक्षं
शरणागतप्रिय गोपाल ॥तव॥
साधनरहितं शरणागतं परि-



CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पालय मां दीनं गोपाल ॥तव॥
बृन्दावनसञ्चार मुकुन्द
प्रेमिकपालक गोपाल ॥तव॥

हिन्दोलम् - आदि

पूजां स्वीकुरु पुण्यश्लोक
पुराणपुरुष गोपीनायक ॥पू॥
आलये सुन्दरे मम गात्रे
आसीनो भव परमपवित्रे ॥पू॥
नवभक्तिरत्नखचितं मामकं
हृदयमणिपीठं सङ्गृहाण ।
नयनगलितेन बाष्पोदकेन
पाद्यं स्वीकुरु पद्मारमण ॥पू॥
प्रेमानुभवपरिमलयुक्तां
पुलकावलिमेव पुष्पमालाम् ।
भावरसमेव भक्ष्यविशेषं
स्वीकुरु देव भैष्मीरमण ॥पू॥
निर्मलदिव्यज्ञानप्रकाशं
नीराजनमिदं स्वीकुरु देव ।
निरवधिसुखदं प्रेमप्रलापं
निर्दोषं स्तवं शृणु माधव ॥पू॥

सारङ्गा - आदि

जय जय कृष्ण जय जय कृष्ण
जय विजयी भव जय जय कृष्ण
गोपीवल्लभ गोकुलबन्धो
गोवर्धनधर करुणासिन्धो ॥ज॥
देवकीनन्दन दिव्यचरित्र
दीनदयालो श्यामलगात्र ॥ज॥
सुजनप्रियकर नटवरवेष
सुन्दरकनककिङ्किणिभूष ॥ज॥
प्रेमिकभावुकभावितकीर्ते
भक्ताकर्षणतत्परमूर्ते ॥ज॥

प्रार्थना

निरपेक्षं मुनिं शान्तं निर्वैरं
समदर्शिनम् ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः॥
ये नृत्यन्ति हरेः पुरः प्रतिदिनं प्रेम्णा
रुदन्तो मुहु-
र्गायन्तो जनितानुरागहृदयाः रामेति
कृष्णेति च।
तेषां पादसरोजधूलिममलां धृत्वा
महेशो गणैः
प्रीत्या नृत्यति नारदादिसहितः
कैलासभूमौ स्वयम्॥
पतितः कितवः किरातको वा
श्वपचो वा
हरिनाम यस्यवापि।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सकृदपश्याद्विनिर्गतं कुलदैवं मम
तस्य पादधूलिः॥

### अभङ्गः - रूपकम्

पाण्डुरङ्ग जय पाण्डुरङ्ग
पाण्डुरङ्ग जय पाण्डुरङ्ग ॥
पुण्डलीकप्रिय पुण्डरीकाक्ष
पण्डरिनाथ पाण्डुरङ्ग ॥
कटिकृतकर कनकाम्बर
कौस्तुभधर पाण्डुरङ्ग ॥
मकरकुण्डलधर मन्दहासमुख
मङ्गलविग्रह पाण्डुरङ्ग ॥
शङ्खचक्रधर पङ्कजनेत्र
किङ्कररक्षक पाण्डुरङ्ग ॥
त्वमेव मात च त्वमेव पिता
त्वमेव भ्राता पाण्डुरङ्ग ॥
त्वमेव भर्ता च त्वमेव पुत्रः
त्वमेव बन्धुः पाण्डुरङ्ग ॥
न हि मम ज्ञानं न हि मम ध्यानं
न हि मम मौनं पाण्डुरङ्ग ॥
न हि मम योगो न हि मम यागो
न हि मम तपः पाण्डुरङ्ग ॥
भागवतपादधूलिषु विलुठन्
भक्तिमेव याचे पाण्डुरङ्ग ॥
भावुकप्रेमिक भक्तमण्डले
भावय मामपि पाण्डुरङ्ग ॥

---

नमोस्तु ते महायोगिन्
प्रपन्नमनुशाधि माम्।
यथा त्वच्चरणाम्भोजे रतिः
स्यादनपायिनी॥

नमः परमकल्याण नमस्ते
विश्वमङ्गल।
वासुदेवाय शान्ताय यदूनां पतये
नमः॥

स्नेहो मे परमो राजन् त्वयि तिष्ठति
नित्यदा
भक्तिश्च परमा वीर भावो नान्यत्र
गच्छतु॥

सस्यश्यामळसुन्दरं तव वपुश्चित्ते सदा
राजतां
त्वन्नामावळिकीर्तनं रघुपते
जिह्वाञ्चले वर्तताम्।
स्वामिन् मे सुखजीवनं भवतु ते
पादाब्जयोः सन्ततं
छायायां वसतस्तृणीकृतसुरावासस्य
दासस्य च॥

### सहाना - आदि

जन्मनि जन्मनि तव भक्तिं
देहि मे कृपया राघव ॥ज॥
जानकीरमण जलजविलोचन



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

जगदेकरक्षक सुजनजीवन ॥ज॥
स्वर्गमपवर्गं कामये नाहं
सुन्दरचरण तव दासोहम् ।
सीतावल्लभ विनाशय मोहं
श्रीराघव कुरु कृपाप्रवाहम् ॥ज॥
तव कथामृतमत्तस्य मे
तव गुणचिन्तनं सदा भवतु ।
तव नामकीर्तनसिद्धस्य मे
तव रूपदर्शनं सुलभं भवतु ॥ज॥

आञ्जनेयमिव मामवधारय
अथवा विभीषणमिव मां पालय ।
भरतमिव मामाकलय
प्रेमिकभक्तं मामानन्दय ॥ज॥

---

मङ्गळम्

नित्योत्सवो भवेत्तेषां
नित्यश्रीर्नित्यमङ्गलम्।
येषां हृदिस्थो भगवान् मङ्गलायतनं
हरिः॥
लाभस्तेषां जयस्तेषां कुतस्तेषां
पराभवः।
येषामिन्दीवरश्यामो हृदये
सुप्रतिष्ठितः॥

मङ्गलं पुण्डरीकाक्ष मङ्गळं
भक्तवत्सल।
भक्तकोलाहल स्वामिन्
सर्वमङ्गलमस्तु ते॥
मङ्गळं सद्गुरुभ्योस्तु वैष्णवेभ्योस्तु
मङ्गळम्।
मङ्गळं माधवायास्तु प्रेमिकायास्तु
मङ्गळम्॥

---

मध्यमावती - आदि

मङ्गळं भवतु ते माधव ॥म्॥
मङ्गळं कुरु ते भक्तजनानाम्
शङ्खगदाधर शरणागतानाम् ॥म॥
पङ्कजलोचन भक्तजनप्रिय
शङ्करब्रह्मादिसेवित सदय ॥म॥
मङ्गळविग्रह रङ्गराजप्रभो
किङ्करप्रेमिकशङ्कर सदा विभो॥म॥

---

पुन्नागवराळि - चापु

भूताब्जकासारमुनिभक्तिसार-
परकालशठकोपसन्नुताय ।
भागवतपदरेणुकुलशेखरबाण-
श्रीविष्णुचित्तार्यवन्दिताय ॥
जय मङ्गळं नित्यशुभमङ्गळम् ॥
मधुरकविनाथमुनियामुनायार्य-



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

महापूर्णयतिराजसेविताय ।
महनीयकूरेशपराशरभट्टार्य-
माधवमुनिकृष्णसूरिभाविताय॥ज॥
निगमान्तगुरुदेववरवरमौन्यादि-
निर्दोषनिजदासपूजिताय ।
निगमान्तवेद्याय श्रीरङ्गनाथाय
निरवद्यप्रेमिककीर्तिताय ॥ज॥

---

पुन्नागवरालि - चापु

सरसिजनेत्राय दशरथपुत्राय
शरणागदोद्धारगोत्राय
सुग्रीवमित्राय श्वेतातपत्राय
सनकादिमुनिस्तुतिपात्राय ॥
जय मङ्गळं नित्यशुभमङ्गळम् ॥
राजाधिराजाय राजेन्द्रविनुताय
रावणप्रमुखारिमर्दनाय
राकेशवदनाय रक्षितभुवनाय
रघुवंशवारिधिवर्धनाय ॥ज॥
जानकीरमणाय जगदेकवीराय
जगन्मङ्गळप्रेमविग्रहाय
कोसलकुमाराय कोमळचरणाय
कोदण्डमण्डितकरतलाय ॥ज॥

---

पुन्नागवराळि - आदि

गोपिकारमणाय कोमळचरणाय
गोगोपगोवत्सपोषणाय
गोकुलवासाय गोवर्धनेशाय
श्रीमते भक्तकोलाहलाय ॥
जय मङ्गलं नित्यशुभमङ्गलम् ॥
राजीवनेत्राय रमणीयगात्राय
राधिकाप्रेमरसपात्राय
रोहिणीनन्दयशोदादिपुत्राय
श्रीमते भक्तकोलाहलाय ॥ज॥
ब्रह्मादिविनुताय प्रेमैकनिलयाय
प्रणतार्तिहरदिव्यवीक्षणाय
भक्ताब्धिचन्द्राय बृन्दावनेशाय
श्रीमते भक्तकोलाहलाय ॥ज॥

---

जय् श्रीराधेकृष्ण
श्रीश्री अभङ्गाः

1. कल्याणवसन्तम् - आदि

उदार गुणवंता सद्गुरु
उदार गुणवंता ॥उ॥
माझे शिरि हाथ राखिला
मजला अमूल्य रत्न दिला ॥उ॥
रामकृष्णहरि उच्चारिला
माझी अपार करुणा केला ॥उ॥
घेवुनि हाथ पंढरीनेला
दाखविला विठ्ठल हरिलीला ॥उ॥
प्रेमाम्हणे संसार चिन्ता नाही
तुकाराम सारिखा सद्गुरु नाही॥उ॥

- - -

*नामदेव सद्गुरु तुकाराम सद्गुरु*
*नामदेव सद्गुरु तुकाराम सद्गुरु*

---



CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

### 2. सिन्धुभैरवि - आदि

सत्सङ्ग मजला देईं देईं
दूसरा वर नाहीं नाहीं ॥
सदा तुमचे नाम गाऊं
साधु संत सेवा करूं ॥स॥
इहपर साधन दूसरा नाहीं
माउलि विठ्ठल रखुमाई ॥स॥
योगक्षेमं वहाम्यहम्
बोलिला पंढरीमहाराज ॥स॥
दुःख दरिद्र चिन्ता नाहीं
प्रेमाम्हणे नाम मिठाई ॥स॥

- - -

*निवृत्ति ज्ञानदेव सोपान मुक्ताबाई*
*एकनाथ नामदेव तुकाराम्*
*मीरा जनाबाई शक्कुबाई रामदास्*
*तुलसिदास् कबीदास् पुरन्दरदास्*

---

### 3. बेहाक् - आदि

रामकृष्णहरि नामाचि महिमा ।
अगाध अपार नाहीं उपमा ॥रा॥
हरि हरि बोलिला भोलानाथ ।
हांसुनि प्याला हालाहल ॥रा॥
नारायण हरि प्रह्लाद बोलिला ।
घोर महानल नाहींसि झाला ॥रा॥
कृष्ण कृष्ण बोलिली पाञ्चाली ।
पीताम्बर देईं वनमाली ॥रा॥
राम राम गर्जत हनुमन्ता ।
उठोनि सारा लङ्का जालिला ॥रा॥
प्रेमाम्हणे वैष्णवमेला ।
भक्तमण्डलीं नाचे विठ्ठला ॥रा॥

- - -

*रामकृष्णहरि वासुदेवहरि*

---

### 4. आभोगि - आदि

बोला बोला रामकृष्णहरि ।
आला आला पाण्डुरङ्गहरि ॥बो॥
बोला जावूनि रामकृष्णहरि ।
बोला धावूनि रामकृष्णहरि ॥बो॥
बोला लोलुनि रामकृष्णहरि ।
बोला बैसोनि रामकृष्णहरि ॥बो॥
बोला गावूनि रामकृष्णहरि ।
बोला नाचूनि रामकृष्णहरि ॥बो॥
बोला देवूनि रामकृष्णहरि ।
बोला घेवूनि रामकृष्णहरि ॥बो॥
बोला जेवूनि रामकृष्णहरि ।
बोला झोपूनि रामकृष्णहरि ॥बो॥
प्रेमाम्हणति रामकृष्णहरि ।
देखिला विठ्ठल रामकृष्णहरि ॥बो॥

---

### 5. कानडा - आदि

माझा पिता राजविठोबा ।
माझी माता रखुमाई ॥मा॥
माझा भ्राता ज्ञानेश्वर ।
नामदेव हरि गोराकुम्भार ॥मा॥
माझी बहिण मुक्ताबाई ।
कान्होपात्री जनाबाई ॥मा॥
माझा मामा एकनाथ ।
माझा बावा तुकाराम ॥मा॥
विश्वकुटुम्बी विठुराया ।
भक्तकुटुम्बी ठेविला ॥मा॥
प्रेमाम्हणे पंढरिराया ।
भक्तवत्सल हरि देखिला ॥मा॥

---

### 6. कानडा - आदि

जय जय विठ्ठल पाण्डुरङ्ग ।
जय हरि विठ्ठल पाण्डुरङ्ग ॥ज॥
चन्द्रभागे स्नान करावेम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चन्दनटिले धरावेम् ॥ज॥
वालवण्टी लोलावेम् ।
विठ्ठल विठ्ठल बोलावेम् ॥ज॥
गरुडस्थम्ब वन्दावेम् ।
कीर्तनकुरूनि नृत्यावेम् ॥ज॥
विठ्ठल दर्शन करावेम् ।
विठ्ठल हृदयीं स्मरावेम् ॥ज॥
प्रेमाम्हणे पण्डरी जावेम् ।
प्रेमालिङ्गन करावेम् ॥ज॥

---

**7.**

तूम्ही माझी माता तूम्ही माझा पिता
तूम्ही माझा भ्रात पाण्डुरङ्ग ॥तू॥
तूम्ही माझा पुत्र तूम्ही माझा मित्र ।
तूम्ही माझा बन्धु पाण्डुरङ्ग ॥तू॥

तूम्ही माझा गुरु तूम्ही माझा स्वामी।
तूम्ही माझा सर्व पाण्डुरङ्ग ॥तू॥
तूम्ही माझा ध्यान तूम्ही माझे साधन।
तूम्ही माझा ज्ञान पाण्डुरङ्ग ॥तू॥
प्रेमाम्हणे तुजवीण गति नाही ।
तुझे पायो शरण पाण्डुरङ्ग ॥तू॥

- - -

*विठ्ठल विठ्ठल विठ्ठल विठ्ठल*
*विठ्ठल विठ्ठल पाण्डुरङ्ग*

---

8.*पाण्डुरङ्ग जय पाण्डुरङ्ग* *mettu*

हृदयीं विटेवरी उभा ।
समचरणाञ्चि दिव्य शोभा ॥हृ॥
नाहीं काष्ठ मृण्मयरूप ।
आम्हां विठ्ठल चिन्मयरूप ॥हृ॥
गळें पदक वैजन्तीमाला ।
पुढें रखुमाई दयाशीला ॥हृ॥
कटिवरी रखोनी करकमल ।
नयनीं उभा मेघसाम्बला ॥हृ॥
प्रेमाम्हणे पण्ढरिराया ।
भक्तवत्सल निरामय ॥हृ॥

---

9. जोन्पुरी - आदि

पाण्डुरङ्ग येरे पाण्डुरङ्ग येरे ।
पाण्डुरङ्ग येरे विठोबा रे ॥पा॥
मुखीं मन्दहास माथे मुगुट शोभे।
मङ्गलाङ्ग येरे विठोबा रे ॥पा॥
कर्णीं मकरकुण्डल कण्ठी कौस्तुभमणि।
कांसे पीताम्बर विठोबा रे ॥पा॥
राधा आणि भामा रखुमाई ते राणी।
राजा पण्ढरीचा विठोबा रे ॥पा॥
प्रेमाम्हणे चन्द्रभागा तटी वसे ।
पुण्ढलीक भक्त विठोबा रे ॥पा॥

---

10. बृन्दावनसारङ्गा - आदि

हेंचि वर देई विठोबाई ॥हेंचि॥
जन्मोजन्मावरीं होऊनि वारकरी।
यात्रा करूं वरक्षेत्र पण्ढरी ॥हेंचि॥
करू प्रणाम सन्ताचे चरण ।
रामकृष्णहरि नामसङ्कीर्तन॥हेंचि॥
सांवळे सुन्दरा तुझा रूप ।
धरू हृदयीं प्रेमस्वरूप ॥हेंचि॥

*विठ्ठल विठ्ठल रखुमाई विठ्ठल*

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy.

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीजयदेवविरचितं
गीतगोविन्दम्
प्रथमस्सर्गः
( सामोददामोदरः )
श्लोकाः

यद्गोपीवदनेन्दुमण्डनमभूत् कस्तूरिका पत्रकम्
यल्लक्ष्मीकुचशातकुम्भकलशे व्याकोशमिन्दीवरम् ।
यन्निर्वाणविधान साधनविधौ सिद्धाञ्जनं योगिनां
तन्नः श्यामलमाविरस्तु हृदये कृष्णाभिधानं महः॥
राधामनोरम रमावर रासलीलागानामृतैक भणितिं कविराजराजम् ।
श्रीमाधवार्चनविधौ अनुरागसद्मपद्मावती प्रियतमं प्रणतोऽस्मि नित्यम्॥
श्रीगोपालविलासिनी वलयसद्रत्नाति मुग्धाकृति
श्रीराधापति पादपद्म भजनानन्दाब्धि मग्नः अनिशम् ।
लोके सत्कविराजराज इति यः ख्यातो दयाम्भोनिधिः
तं वन्दे जयदेवसद्गुरुमहं पद्मावतीवल्लभम् ॥

नानाभावविलासज्ञं राधिकारसिकेन्द्रयोः।
गोविन्दगानरसिकं जयदेवं भजाम्यहम् ॥
उवाह कृपया देवीमात्मानं शरणं गताम् ।
पद्मावतीं भजामस्तं जयदेवं कवीश्वरम् ॥

मेघैर्मेदुरमम्बरं वनभुवश्श्यामास्तमालद्रुमैः
नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः॥
वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबन्धम्॥
यदि हरिस्मरणे सरसं मनः यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् ॥
वाचः पल्लवयत्युमापतिधरस्संदर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः।
शृङ्गारोत्तर सत्प्रमेयरचनैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतश्श्रुतिधरो धोयी कविक्ष्मापतिः॥

प्रथमा अष्टपदी
( दशावतार वैभवम् )

CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सौराष्ट्रम् ( मालवम् ) - आदि
गीतम्

प्रलयपयोधिजले धृतवानसि वेदं विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर जय जगदीश हरे ॥
क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे धरणि धरण किणचक्रकरिष्ठे ।
केशव धृत कच्छपरूप जय जगदीश हरे ॥
वसति दशनशिखरे धरणी तव लग्ना शशिनि कलङ्गकलेव निमग्ना ।
केशव धृत सूकररूप जय जगदीश हरे ॥
तवकरकमलवरे नखमद्भुतशृङ्गं दलित हिरण्यकशिपु तनुभृङ्गम् ।
केशव धृत नरहरिरूप जय जगदीश हरे ॥
छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनित जनपावन ।
केशव धृत वामनरूप जय जगदीश हरे ॥
क्षत्रियरुधिरमये जगत् अपगतपापं स्नपयसि पयसि शमितभवतापम् ।
केशव धृत भृगुपतिरूप जय जगदीश हरे ॥
वितरसि दिक्षुरणे दिक्पतिकमनीयं दशमुखमौलिबलिं रमणीयम् ।
केशव धृत रघुपतिरूप जय जगदीश हरे ॥
वहसि वपुषि विशदे वसनं जलदाभं हलहति भीति मिलित यमुनाभम् ।
केशव धृत हलधररूप जय जगदीश हरे ॥
निन्दसि यज्ञविधेः अहह श्रुतिजातं सदयहृदय दर्शितपशुघातम् ।
केशव धृत बुद्धशरीर जय जगदीस हरे ॥
म्लेच्छ निवह निधने कलयसि करवालं धूमकेतुमिव किमपि करालम् ।
केशव धृत कल्किशरीर जय जगदीश हरे ॥
श्रीजयदेवकवेरिदमुदितमुदारं शृणु सुखदं शुभदं भवसारम् ।
केशव धृतदशविधरूप जय जगदीश हरे ॥

---

द्वितीया अष्टपदी
( भगवद्विभूति वर्णनम् )
भैरवी - त्रिपुट
श्लोकः

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं चलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥

गीतम्



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रित कमला कुचमण्डल धृतकुण्डल । कलित ललित वनमाल ॥
जय जय देव हरे । हरि गोविन्द गोपाल ॥जय॥
दिनमणि मण्डल मण्डन भवखण्डन । मुनिजन मानस हंस ॥जय॥
कालिय विषधर भञ्जन जनरञ्जन । यदुकुल नलिन दिनेश ॥जय॥
मधुमुर नरक विनाशन गरुडासन । सुरकुलकेलि निदान ॥जय॥
अमल कमलदल लोचन भवमोचन त्रिभुवन भवन् निधान ॥जय॥
जनकसुता कुचभूषण जितदूषण । समरशमित दशकण्ठ ॥जय॥
अभिनव जलधर सुन्दर धृतमन्दर । श्रीमुखचन्द्र चकोर ॥जय॥
श्रीजयदेव कवेरिदं कुरुते मुदम् । मङ्गलमुज्ज्वलगीतम् ॥जय॥

श्लोकः

पद्मापयोधरतटीपरिरम्भलग्नकाश्मीर मुद्रितमुरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं वः॥

---

## तृतीया अष्टपदी
## ( वसन्त वर्णनम् )
### वसन्ता - आदि

श्लोकः

वसन्ते वासन्तीकुसुमसुकुमारैरवयवैः
भ्रमन्तीं कान्तारे बहुविहित कृष्णानुसरणाम् ।
अमन्दं कन्दर्पज्वर जनित चिन्ताकुलतया
वलद्बाधां राधां सरसमिदमूचे सहचरी ॥

गीतम्

ललित लवङ्गलता परिशीलन कोमलमलयसमीरे ।
मधुकरनिकर करम्बित कोकिलकूजित कुञ्जकुटीरे ॥
विहरति हरिरिह सरसवसन्ते
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ॥वि॥
उन्मद मदन मनोरथ पथिक वधूजन जनित विलापे ।
अलिकुल सङ्कुल कुसुम समूह निराकुल वकुलकलापे॥वि॥
मृगमद सौरभ रभस वशंवद नवदलमाल तमाले ।
युवजन हृदय विदारण मनसिज नखरुचि किंशुकजाले॥वि॥
मदनमहीपति कनकदण्डरुचि केसरकुसुम विकासे ।
मिलितशिलीमुख पाटलपटल कृतस्मर तूणविलासे ॥वि॥
विगलितलज्जित जगदवलोकन तरुण करुण कृतहासे ।
विरहि निकृन्तन कुन्तमुखाकृति केतकि दन्तुरिताशे ॥वि॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

माधविका परिमलमिलिते नवमालिकयाति सुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥वि॥
स्फुरदतिमुक्तलतापरिरम्भण मुकुलितपुलकितचूते ।
बृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥वि॥
श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम् ।
सरस वसन्तसमय वनवर्णनं अनुगतमदनविकारम् ॥वि॥

श्लोकाः

दरविदलित मल्लीवल्लि चञ्चत्परागप्रकटित पटवासैर्वासयन् काननानि ।
इह हि दहति चेतः केतकी गन्धबन्धुः प्रसरदसमबाण प्राणवद्गन्धवाहः॥

उन्मीलन् मधुगन्धलुब्ध मधुप व्याधूत चूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण
प्राप्त प्राणसमा समागम रासोल्लासैः अमीवासराः॥

---

## चतुर्थी अष्टपदी
## ( रासलीला )

पन्तुवरालि - आदि

श्लोकः

अनेकनारी परिरम्भ संभ्रम स्फुरन् मनोहारि विलास लालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम् ॥

गीतम्

चन्दनचर्चित नीलकलेबर पीतवसन वनमाली ।
केलिचलन् मणिकुण्डल मण्डित गण्डयुग स्मितशाली ॥
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे ॥हरि॥
पीनपयोधरभारभरेण हरिं परिरम्य सरागम् ।
गोपवधूरनुगायति काचिदुदञ्चित पञ्चमरागम् ॥हरि॥
काऽपि विलास विलोल विलोचन खेलन जनित मनोजम् ।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥हरि॥
काऽपि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले ।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥हरि॥
केलिकलाकुतुकेन च काचिदमुं यमुनावनकूले ।
मञ्जुल वञ्जुल कुञ्जगतं विचकर्ष करेण दुकूले ॥हरि॥
करतलतालतरल वलयावलि कलितकलस्वनवंशे ।
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे ॥हरि॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम् ।
पश्यति सस्मित चारुतरामपरामनुगच्छति वामाम् ॥हरि॥
श्रीजयदेव भणितमिदमद्भुत केशवकेलिरहस्यम् ।
बृन्दावनविपिने चरितं वितनोतु शुभानि यशस्यम् ॥हरि॥

श्लोकाः

विश्वेषामनुरञ्जनेन जनयन् आनन्दमिन्दीवर-
श्रेणी श्यामलकोमलैः उपनयन् अङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ॥
अद्योत्सङ्गवसद्भुजङ्ग कबलक्लेशादिव ईशाचलं
प्रालेय प्लवनेच्छयानुसरति श्रीकण्डशैलानिलः।
किञ्चित् स्निग्ध रसालमौलि मुकुलान्यालोक्य हर्षोदया-
दुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः॥
रालोल्लासभरेण विभ्रमभृतां आभीरवामभ्रुवा-
मभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया ।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः पातु वः॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास
जयदेवकृतौ सामोद दामोदरो नाम प्रथमस्सर्गः।

---

## द्वितीयस्सर्गः
### ( अक्लेशकेशवः )
### पञ्चमी अष्टपदी
### ( रासलीला )
तोडि - आदि

श्लोकः

विहरति वने राधा साधारणप्रणये हरौ
विगलित निजोत्कर्षादीर्ष्यावशेन गताऽन्यतः।
क्वचिदपि लताकुञ्जे गुञ्जन् मधुव्रतमण्डली
मुकरशिखरे लीना दीनाऽप्युवाच रहः सखीम् ॥

गीतम्

सञ्चरदधरसुधा मधुरध्वनि मुखरित मोहन वंशम् ।
चलितदृगञ्चल चञ्चल मौलि कपोलविलोलवतंसम् ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासम् ॥रासे॥
चन्द्रकचारु मयूरशिखण्डक मण्डल वलयित केशम् ।
प्रचुर पुरन्दरधनुरनुरञ्चित मेदुरमुदिर सुवेषम् ॥रासे॥
गोपकदम्ब नितम्बवती मुखचुम्बन लम्बित लोभम् ।
बन्धूजीव मधुराधरपल्लव कलितदरस्मित शोभम् ॥रासे॥
विपुलपुलक भुजपल्लव वलयित वल्लवयुवति सहस्रम् ।
करचरणोरसि मणिगण किरणविभिन्न तमिस्रम् ॥रासे॥
जलदपटल चलदिन्दु विनिन्दक चन्दनबिन्दु ललाटम् ।
पीनपयोधर परिसरमर्दन निर्दयहृदयकवाटम् ॥रासे॥
मणिमयमकर मनोहर कुण्डल मण्डित गण्डमुदारम् ।
पीतवसनमनुगत मुनिमनुज सुरासुरवर परिवारम् ॥रासे॥
विशद कदम्बतले मिलितं कलिकुलुषभयं शमयन्तम् ।
मामपि किमपि तरङ्गदनङ्गदृशा वपुषा रमयन्तम् ॥रासे॥
श्रीजयदेव भणितमतिसुन्दर मोहन मधुरिपु रूपम् ।
हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपम् ॥रासे॥

---

### षष्टी अष्टपदी
### ( राधा पूर्वानुभवस्मरणम् )
काम्भोदि - त्रिपुट

श्लोकः

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते
वहति च परीतोषं दोषं विमुञ्चति दूरतः।
युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥

गीतम्

निभृत निकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम् ।
चकित विलोकित सकलदिशा रतिरभसवशेन हसन्तम् ॥
सखि हे केशिमथनमुदारम्
रमय मया सह मदनमनोरथ भावितया सविकारम् ॥सखि॥
प्रथमसमागम लज्जितया पटुचाटुशतैरनुकूलम् ।
मृदुमधुरस्मित भाषितया शिथिलीकृत जघन दुकूलम् ॥सखि॥
किसलयशयन निवेशितया चिरमुरसि ममैव शयानम् ।
कृतपरिरम्भण चुम्बनया परिरभ्य कृताधरपानम् ॥सखि॥
अलसनिमीलित लोचनया पुलकावलि ललित कपोलम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रमजल सकलकलेबरया वरमदनमदादतिलोलम् ॥सखि॥
कोकिलकलरव कूजितया जित मनसिज तन्त्रविचारम् ।
श्लथकुसुमाकुलकुन्तलया नखलिखित घनस्तनभारम् ॥सखि॥
चरणरणित मणिनूपुरया परिपूरित सुरतवितानम् ।
मुकर विशृङ्खल मेकलया सकचग्रह चुम्बनदानम् ॥सखि॥
रतिसुखसमय रसालसया दरमुकुलित नयनसरोजम् ।
निःसह निपतित तनुलतया मधुसूदनमुदितमनोजम् ॥सखि ॥
श्रीजयदेवभणितमिदमतिशय मधुरिपु निधुवन शीलम् ।
सुखमुत्कण्ठित राधिकया कथितं वितनोतु सलीलम् ॥सखि॥

श्लोकाः

हस्तस्रस्त विलासवंशं अनृजुभ्रूवल्लि मद्बल्लवी
बृन्दोत्साहदृगन्तवीक्षीतं अतिस्वेदार्द्र गण्डस्थलम् ।
मामुद्वीक्ष्य विलक्षित स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ॥

दुरालोक स्तोक स्तबक नवकाशोकलतिका-
विकासः कासारोपवन पवनोऽयं व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-
भ्रूवल्लीकमलीकदर्शितभुजामूलार्धदृष्टस्तनम् ।
गोपीनां निभृतं नीरीक्ष्य गमिताकाङ्क्षाश्चिरं चिन्तय-
न्नन्तर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः ॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास
जयदेवकृतौ अक्लेशकेशवो नाम द्वितीयस्सर्गः।

---

## तृतीयस्सर्गः

( मुग्धमधुसूदनः )

सप्तमी अष्टपदी

( भगवद्वात्सल्यम् )

भूपालम् - चापु

श्लोकाः

कंसारिरपि संसारवासनाबद्धशृङ्खलाम् ।
राधामादाय हृदये तत्याज व्रजसुन्दरीः॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इतस्ततस्तामनुसृत्य राधिकामनङ्गबाणव्रणखिन्नमानसः।
कृतानुतापस्स कलिन्दनन्दिनीतटान्तकुञ्जे विषसाद माधवः॥

गीतम्

मामियं चलिता विलोक्य वृतं वधूनिचयेन ।
सापराधतया मयाऽपि न वारिताऽतिभयेन ॥
हरिहरि हतादरतया सा गता कुपितेव ॥हरि॥
किं करिष्यति किं वदिष्यति सा चिरं विरहेण ।
किं जनेन धनेन किं मम जीवितेन गृहेण ॥हरि॥
चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण ।
शोणपद्ममिवोपरिभ्रमताऽऽकुलं भ्रमरेण ॥हरि॥
तामहं हृदि सङ्गतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि ॥हरि॥
तन्वि खिन्नमसूयया हृदयं तवाकलयामि ।
तन्नवेद्मि कुतो गतऽसि नतेन तेऽनुनयामि ॥हरि॥
दृश्यसे पुरतो गतागतमेव मे विदधासि ।
किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि ॥हरि॥
क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ॥हरि॥
वर्णितं जयदेवकेन हरेरिदं प्रवणेन ।
किन्दुबिल्व-समुद्र-सम्भव-रोहिणीरमणेन ॥हरि॥

श्लोकाः

हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणि कण्ठे न सा गरलद्युतिः।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्याऽनङ्ग क्रुधा किमु धावसि ॥
पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्च्छितजनाघातेन किं पौरुषम् ।
तस्या एव मृगीदृशो मनसिज प्रेङ्खत्कटाक्षाशुग-
श्रेणिजर्झरितं मनागपि मनो नाद्यापि सन्धुक्षते ॥
भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि बाणाः गुणश्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवतायामस्त्राणि निर्जितजगन्ति किमर्पितानि ॥
भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम् ।
मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तः स्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तानि स्पर्शसुखानि ते च सरलाः स्निग्धा दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते॥

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्-
गीतस्तान-कृतावधान-ललनालक्षैर्न संलक्षिताः।
संमुग्धे मधुसूदनस्य मधुरे राधामुखेन्दौ मृदु-
स्यन्दं कन्दलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास
जयदेवकृतौ मुग्धमधुसूदनो नाम तृतीयस्सर्गः।

---

## चतुर्थस्सर्गः

### ( स्निग्धमधुसूदनः )

### अष्टमी अष्टपदी

( राधायाः उपासनाक्रमम् )

सौराष्ट्रम् - आदि

श्लोकः

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम्।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी॥

गीतम्

निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम्।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम् ॥
सा विरहे तव दीना
माधव मनसिजविशिखभयादिव भावनया त्वयि लीना ॥सा॥
अविरलनिपतित मदनशरादिव भवदवनाय विशालम्।
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम् ॥सा॥
कुसुमविशिख-शरतल्पमनल्प-विलासकलाकमनीयम्।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ॥सा॥
वहति च गलितविलोचन-जलभरमानन-कमलमुदारम्।
विधुमिव विकटविधुन्तुद-दन्त-दलन-गलितामृतधारम् ॥सा॥
विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम्।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ॥सा॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ध्यानलयेन पुरःपरिकल्प्य भवन्तमतीव दुरापम् ।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम् ॥सा॥
प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहम् ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ॥सा॥
श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम् ।
हरिविरहाकुल-वल्लवयुवति-सखीवचनं पठनीयम् ॥सा॥

---

## नवमी अष्टपदी

### ( राधा वैराग्यम् )

देशाक्षि / बिलहरि - त्रिपुट

श्लोकः

आवासो विपिनायते प्रियसखीमालाऽपि जालायते
तापो निश्वसितेन दावदहनज्वालाकलापायते ।
साऽपि त्वद्विरहेण हन्द हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥

गीतम्

स्तनविनिहितमपि हारमुदारम् । सा मनुते कृशतनुरतिभारम् ॥
राधिका कृष्ण । राधिका विरहे तव केशव ॥रा॥
सरसमसृणमपि मलयजपङ्कम् ।पश्यति विषमिव वपुषि सशङ्कम् ॥रा॥
श्वसितपवनमनुपमपरिणाहम् । मदनदहनमिव वहति सदाहम् ॥रा॥
दिशिदिशि किरति सजलकणजालम् । नयननलिनमिव विगलितनालम् ॥रा॥
नयनविषयमपि किसलयतल्पम् ।कलयति हितहुताशनकल्पम् ॥रा॥
त्यजति न पाणितलेन कपोलम् । बालशशिनमिव सायमलोलम्
॥रा॥
हरीरिति हरीरिति जपति सकामम् ।विरहविहितमरणेव निकामम्॥रा॥
श्रीजयदेव भणितमिति गीतम् । सुखयतु केशवपदमुपनीतम् ॥रा॥

श्लोकाः

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्
स्ववैद्यप्रतिम प्रसीदति यदि त्यक्तोऽन्यथा हस्तकः॥
स्मरातुरां दैवतवैद्यहृद्य त्वदङ्गसङ्गामृतमात्रसाध्याम् ।
विमुक्तबाधां कुरुषे न राधां उपेन्द्र वज्राधिक दारुणोऽसि ॥
कन्दर्पज्वरसंज्वराकुलतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दनचन्द्रमः कमलिनीचिन्तासु सन्ताम्यति ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

किन्तु क्लान्तिवशेन शीतलतरं त्वामेकमेव क्षणं
ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ॥
क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया अनया ते ।
श्वसिति कथमसौ रसालशाखां चिरविरहेण विलोक्य पुष्पिताग्राम् ॥
वृष्टिव्याकुलगोकुलावनवशादुद्धृत्य गोवर्धनं
बिभ्रद्वल्लववल्लभाभिरधिकानन्दाच्चिरं चुम्बितः।
दर्पेणैव तदर्पिताधरतटी सिन्दूरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास
जयदेवकृतौ स्निग्धमुधुसूदनो नाम चतुर्थस्सर्गः।

---

पञ्चमस्सर्गः

( साकाङ्क्षपुण्डरीकाक्षः )

दशमी अष्टपदी

आनन्दभैरवि - आदि

श्लोकः

अहमिह निवसामि याहि राधामनुनय मद्वचनेन चानयेथाः।
इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधाम् ॥

गीतम्

वहति मलयसमीरे मदनमुपनिधाय ।
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥
तव विरहे वनमाली सखि सीदति ॥तव॥
दहति शिशिरमयूखे मरणमनुकरोति ।
पतति मदनविशिखे विलपति विकलतरोऽति ॥तव॥
ध्वनति मधुपसमूहे श्रवणमपिदधाति ।
मनसि चलितविरहे निशि निशि रुजमुपयाति ॥तव॥
वसति विपिनविताने त्यजति ललितधाम ।
लुठति धरणिशयने बहु विलपति तव नाम ॥तव॥
भणति कविजयदेवे विरहविलसितेन ।
मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥तव॥

---

एकादशी अष्टपदी

केदारगौलम् - आदि



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्लोकः

पूर्वं यत्र समं त्वया रतिपतेरासादितास्सिद्धयः
तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरिरम्भामृतं वाञ्छति ॥

गीतम्

रतिसुखसारे गतमभिसारे मदनमनोहरवेषम् ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम् ॥
धीरसमीरे यमुनातीरे वसति वने वनमाली ।
गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली ॥धीर॥
नामसमेतं कृतसङ्केतं वादयते मृदुवेणुम् ।
बहु मनुतेऽतनु ते तनुसङ्गतपवनचलितमपि रेणुम् ॥धीर॥
पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम् ।
रचयति शयनं सचकितनयनं पश्यति तव पन्थानम् ॥धीर॥
मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिषु लोलम् ।
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम् ॥धीर॥
उरसि मुरारेरुपहितहारे घन इव तरलपलाके ।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ॥धीर॥
विगलितवसनं परिहृतरसनं घटय जघनमपिधानम् ।
किसलयशयने पङ्कजनयने निधिमिव हर्षनिदानम् ॥धीर॥
हरिरभिमानी रजनिरिदानीं इयमुपयाति विरामम् ।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥धीर॥
श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् ।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ॥धीर॥

श्लोकाः

विकिरति मुहुःश्वासान् आशाःपुरो मुहुरीक्षते
प्रविशति मुहुः कुञ्जं गुञ्जन् मुहुर्बहु ताम्यति ।
रचयति मुहुश्शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥
त्वद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तंगतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमस्सान्द्रताम् ।
कोकानां करुणस्वरेण सदृशी दीर्घा मदभ्यर्थना



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः॥

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः।
अन्यार्थं गतयोर्भ्रमान्मिलितयोस्सम्भाषणैर्जानतोः
दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः॥
सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम् ।
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गितैः
सुमुखि सुभगः पश्यन् स त्वामुपैतु कृतार्थताम् ॥
राधामुग्धमुखारविन्दमधुपः त्रैलोक्यमौलिस्थली
नेपथ्योचितनीलरत्नमवनीभारावतारान्तकः।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास जयदेवकृतौ
अभिसारिकावर्णने साकाङ्क्षपुण्डरीकाक्षो नाम पञ्चमस्सर्गः।

---

## षष्ठस्सर्गः

### ( सोत्कण्ठवैकुण्ठः )

### द्वादशी अष्टपदी

शङ्कराभरणम् - त्रिपुट

श्लोकः

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ।
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥

गीतम्

पश्यति दिशिदिशि रहसि भवन्तम् । त्वदधरमधुरमधूनि पिबन्दम् ॥
नाथ हरे जगन्नाथ हरे । सीदति राधाऽऽवासगृहे ॥नाथ॥
त्वदभिसरणरभसेन वलन्ती । पतति पदानि कियन्ति चलन्ती
॥नाथ॥
विहितविशदबिसकिसलयवलया ।जीवति परमिह तव रतिकलया
॥नाथ॥
मुहुरवलोकितमण्डनलिला । मधुरिपुरहमिति भावनशीला ॥नाथ॥
त्वरितमुपैति न कथमभिसारम् । हरिरिति वदति सखीमनुवारम्
॥नाथ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्लिष्यति चुम्बति जलधरकल्पम् ।हरिरुपगत इति तिमिरमनल्पम्
॥नाथ॥
भवति विलम्बिनि विगलितलज्जा ।विलपति रोदिति वासकसज्जा
॥नाथ॥
श्रीजयदेवकवेरिदमुदितम् । रसिकजनं तनुतामतिमुदितम् ॥नाथ॥

श्लोकाः

विपुलपुलकपालिः स्फीतसीत्कारमन्त-
र्जनितजडिमकाकुव्याकुलं व्याहरन्ती ।
तव कितव विधत्तेऽमन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥
अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कतो वितनुते शय्यां चिरं ध्यायति ।
इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥
किं विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमीरुहि
भ्रातर्याहि न दृष्टिगोचरमितस्सानन्दनन्दास्पदम् ।

राधाया वचनं तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भागिरः॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास
जयदेवकृतौ सोत्कण्ठवैकुण्ठो नाम षष्ठस्सर्गः।

---

## सप्तमस्सर्गः

### ( नागरिकनारायणः )

### त्रयोदशी अष्टपदी

### ( विश्लेषानुतापम् )

आहिरि / नीलाम्बरि - जम्प

श्लोकः

अत्रान्तरे च कुलटाकुलवर्त्मघातसञ्जातपातक इव स्फुटलाञ्छनश्रीः।
बृन्दावनान्तरमदीपयदंशुजालैर्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः॥
प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा ।
विरचितविविधविलापं सा परितापं चकारोच्चैः॥

गीतम्

कथितसमयेऽपि हरिरहह न ययौ वनम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मम विफलमिदममलरूपमपि यौवनम् ॥
यामि हे कमिह शरणं । सखीजनवचन वञ्चिताऽहम् ॥यामि॥
यदनुगमनाय निशि गहनमपि शीलितम् ।
तेन मम हृदयमिदमसमशरकीलितम् ॥यामि॥
मम मरणमेव वरमतिवितथाकेतना ।
किमिति विषहासि विरहानलमचेतना ॥यामि॥
मामिहहि विधुरयति मधुरमधुयामिनी ।
काऽपि हरिमनुभवति कृतसुकृतकामिनी ॥यामि॥
अहह कलयामि वलयादिमणिभूषणम् ।
हरिविरहदहनवहनेन बहुदूषणम् ॥यामि॥
कुसुमसुकुमारतनुमतनुशरलीलया ।
स्रगपि हृदि हन्ति मामतिविषमशीलया ॥यामि॥
अहमिह हि निवसामि न विगणितवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा ॥यामि॥
हरिचरणशरण जयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती ॥यामि॥

श्लोकः

तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभि-
र्बद्धो बन्धुभिरन्धकारिणि वनाभ्यर्णे किमुद्भ्राम्यति ।
कान्तः क्लान्तमना मनागपि पति प्रस्थातुमेवाक्षमः
सङ्केतीकृत मञ्जुवञ्जुल लताकुञ्जेऽपि यन्नागतः॥

---

## चतुर्दशी अष्टपदी

### ( अनुमान प्रकारणम् )

सारङ्गा - त्रिपुट

श्लोकः

अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम् ।
विशङ्कमाना रमितं कयाऽपि जनार्दनं दृष्टवदेतदाह ॥

गीतम्

स्मर समरोचित विरचितवेषा । गलितकुसुमभर विलुलितकेशा ॥
कापि मधुरिपुणा विलसति युवतिरत्यधिकगुणा ॥कापि॥
हरिपरिरम्भण फलितविकारा ॥कुचकलशोपरि तरलितहारा ॥कापि॥
विचलदलक ललिताननचन्द्रा । तदधरपानरभसकृततन्द्रा ॥कापि॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चञ्चलकुण्डलदलितकपोला । मुखरितरसन जघनगतिलोला॥कापि॥
दयितविलोकित लज्जितहसिता ।बहुविधकूजित रतिरसरसिता कापि॥
विपुलपुलक पृथु वेपथु भङ्गा । श्वसितनिमीलित विकसदनङ्गा ॥कापि॥
श्रमजलकणभर सुभगशरीरा ।परिपतितोरसि रतिरणधीरा ॥कापि॥
श्रीजयदेवभणित हरिरमितम् ।कलिकलुषं जनयतु परिशमितम्॥कापि॥

---

## पञ्चदशी अष्टपदी

### ( अलङ्कार वर्णनम् )

सावेरि - चापु

श्लोकः

विरहपाण्डुमुरारिमुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम् ।
विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्याथाम् ॥

गीतम्

समुदितमदने रमणीवदने चुम्बनचलिताधरे ।
मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे ॥
रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥रमते॥
घनचयरुचिरे रचयतिचिकुरे तरलिततरुणानने ।
कुरवककुसुमं चपलासुषमं रतिपतिमृगगानने ॥रमते॥
घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ।
मणिसरममलं तारकपटलं नखपदशशिभूषिते ॥रमते॥
जितबिसशकले मृदुभुजयुगले करतलनलिनीदले ।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ॥रमते॥
रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिमयरशनं तोरणहसनं विकिरति कृतवासने ॥रमते॥
चरणकिसलये कमलानिलये नखमणिगणभूजिते ।
बहिरपवरणं यावकभरणं जनयति हृदि योजिते ॥रमते॥
ध्यायति सदृशं कामपि सुदृशं खलहलधरसोदरे ।
किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे ॥रमते॥
इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके ।
कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके ॥रमते॥

---

## षोडशी अष्टपदी

### ( अनुभोगमहिमाचिन्तनम् )



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पुन्नागवरालि - आदि

श्लोकः

नायातस्सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छन्दं बहुवल्लभस्स रमते किं तत्र ते दूषणम् ।
पश्याद्य प्रियसङ्गमाय दयितस्याकृष्यमाणं गुणैः
उत्कण्ठार्तिभरादिव स्फुटमिदं चेतस्स्वयं यास्यति ॥

गीतम्

अनिलतरलकुवलयनयनेन । तपति न सा किसलयशयनेन ॥
या रमिता वनमालिना सखि

॥या॥

विकसितसरसिजललितमुखेन । स्फुटति न सा नसिजविशिखेन॥या॥
अमृतमधुरमृदुतरवचनेन । ज्वलति न सा मलयजपवनेन ॥या॥
स्थलजलरुहरुचिकरचरणेन । लुठति न सा हिमकरकिरणेन ॥या॥
सजलजलदसमुदयरुचिरेण । दलति न सा हृदि विरहभरेण ॥या॥
कनकनिचयरुचिशुचिवसनेन । श्वसिति न सा परिजनहसनेन ॥या॥
सकलभुवनजनवरतरुणेन । वहति न सा रुजमतिकरुणेन ॥या॥
श्रीजयदेवभणितवचनेन । प्रविशतु हरिरपि हृदयमनेन ॥या॥

श्लोकाः

मनोभवानन्दन चन्दनानिल प्रसीद रे दक्षिण मुञ्च वामताम् ।
क्षणं जगत्प्राण निधाय माधवं पुरो मम प्राणहरो भविष्यसि ॥
रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन् दुनोति मनोगते ।
हृदयमदये तस्मिन्नेवं पुनर्वलते बलात्
कुवलयदृशां वामः कामो निकामनिरङ्कुशः॥
बाधां विधेहि मलयानिल पञ्चबाण प्राणान् गृहाण न गृहं पुनराश्रयिष्ये ।
किं ते कृतान्तभगिनि क्षमया तरङ्गैः अङ्गानि सिञ्च मम शाम्यतु देहदाहः॥
सान्द्रानन्द पुरन्दरादि दिविषद्वृन्दैरमन्दादरात्
आनम्रैः मकुटेन्द्रनीलमणिभिः संदर्शितेन्दीवरम् ।
स्वच्छन्दं मकरन्दसुन्दरगलन् मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास
जयदेवकृतौ नागरिकनारायणो नाम सप्तमस्सर्गः।

---

अष्टमस्सर्गः



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

( विलक्ष्यलक्ष्मीपतिः )

सप्तदशी अष्टपदी

( भगवदागमनम् — प्रणयरोषः )

आरभि - आदि

श्लोकः

अथ कथमपि यामिनीं विनीय स्मरशरजर्झरितापि सा प्रभाते ।
अनुनयवचनं वदन्तमग्रे प्रणतमपि प्रियमाह साभ्यसूयम् ॥

गीतम्

रजनिजनितगुरुजागरराग-कषायितमलसनिमेषम् ।
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ॥
याहि माधव याहि केशव मा वद कैतववादम् ।
तामनुसर सरसीरुहलोचन या तव हरति विषादम् ॥याहि॥
कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम् ।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम् ॥याहि॥
वपुरनुसरति तव स्मरसङ्गरकरनखरक्षतरेखम् ।
मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखम् ॥याहि॥
चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम् ।
दर्शयतीव बहिर्मदनद्रुम नवकिसलयपरिवारम् ॥याहि॥
दशनपदं भवदधरगतं मम जनयति चेतसि खेदम् ।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदम् ॥याहि॥
बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनम् ।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम् ॥याहि॥
भ्रमति भवानबलाकबलाय वनेषु किमत्र विचित्रम् ।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ॥याहि॥
श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम् ।
शृणुत सुधामधुरं विबुधा वदताऽपि सुखं सुदुरापम् ॥याहि॥

श्लोकाः

तवेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव
प्रियापादालक्तच्छुरितमरुणच्छायहृदयम् ।
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोकश्शोकादपि किमपि लज्जां जनयति ॥
प्रातर्नीलनिचोलमच्युतमुरस्संवीत पीतांशुकं
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले ।
व्रीडाचञ्चलमञ्चलं नयनयोराधाय राधानने
स्मेर स्मेर मुखोऽयमस्तु जगदानन्दाय नन्दात्मजः॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास जयदेवकृतौ
कण्डितावर्णने विलक्ष्यलक्ष्मीपतिर्नाम अष्टमस्सर्गः।

---

नवमस्सर्गः

( मुग्धमुकुन्दः )

अष्टादशी अष्टपदी

यदुकुलकाम्भोदि - आदि

श्लोकः

तामथ मन्मथखिन्नां रतिरसभिन्नां विषादसंपन्नाम् ।
अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहसि सखी ॥

गीतम्

हरिरभिसरति वहति मधुपवने । किमपरमधिकसुखं सखि भवने ॥
माधवे मा कुरु मानिनि मानमये सखि ॥मा॥
तालफलादपि गुरुमतिसरसम् । किमु विफलीकुरुषे कुचकलशम् ॥मा॥
कति न कथितमिदमनुपदमचिरम् । मा परिहर हरिमतिशयरुचिरम् ॥मा॥
किमिति विषीदसि रोदिषि विकला । विहसति युवतिसभा तव सकला ॥मा॥
मृदुनलिनीदलशीतलशयने । हरिमवलोकय सफलय नयने ॥मा॥
जनयसि मनसि किमिति गुरुखेदम् । शृणु मम सुवचनमनिहितभेदम् ॥मा॥
हरिरुपयातु वदतु बहुमधुरम् । किमिति करोषि हृदयमतिविधुरम्॥मा॥
श्रीजयदेवभणितमतिललितम् । सुखयतु रसिकजनं हरिचरितम् मा॥

श्लोकाः

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषं यासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये ।
तद्युक्तं विपरीतकारिणि तव श्रीकण्डचर्चाविषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः॥
अन्तर्मोहन मौलि घूर्णनमिलन् मन्दार विस्रंसन
स्तब्धाकर्षण दृष्टिहर्षण महामन्त्रः कुरङ्गीदृशाम् ।
दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां
भ्रंशः कंसरिपोस्समर्पयतु वः श्रेयांसि वंशीरवः॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

जयदेवकृतौ मुग्धमुकुन्दो नाम नवमस्सर्गः।

---

## दशमस्सर्गः

## ( मुग्धमाधवः )

### ऊनविंशतिः अष्टपदी

### मुखारि - जम्पा

श्लोकः

अत्रान्तरे मसृणरोषवसादसीमनिश्वास निःसहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षितसखीवदनां दिनान्ते सानन्दगद्गदपदं हरिरित्युवाच ॥

गीतम्

वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी हरतु दरतिमिरमतिघोरम् ।
स्फुरदधरसीधवे तव वदनचन्द्रमा रोचयतु लोचनचकोरम् ॥
प्रिये चारुशीले मुञ्च मयि मानमनिदानम् ।
सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानम्॥प्रिये॥
सत्यमेवासि यदि सुदति मयि गोपिनी देहि खरनखरशरघातम् ।
घटय भुजबन्धनं जनय रदखण्डनं येन वा भवति सुखजातम् ॥प्रिये॥
त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नम् ।
भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नम् ॥प्रिये॥
नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपम् ।
कुसुमशरबाणभावेन यदि रञ्जयसि कृष्णमिदमेतदनुरूपम् ॥प्रिये॥
स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी रञ्जयतु तव हृदयदेशम् ।
रसतु रसनापि तव घनजघनमण्डले घोषयतु मन्मथनिदेशम् ॥प्रिये॥
स्थलकमलभञ्जनं मम हृदयरञ्जनं जनितरतिरङ्गपरभागम् ।
भण मसृणवाणि करवाणि चरणद्वयं सरससदलक्तक सरागम् ॥प्रिये॥
स्मरगरलखण्डनं मम शिरसि मण्डनं देहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपाहितविकारम्॥प्रिये॥
इति चटुलचाटुपटुचारु मुरवैरिणो राधिकामधिवचनजातम् ।
जयतु पद्मावतीरमणजयदेवकविभारती भणितमितिगीतम् ॥प्रिये॥

श्लोकाः

परिहर कृतातङ्के शङ्कां त्वया सततं घन-
स्तन जघनयाऽऽक्रान्ते स्वान्ते परानवकाशिनि ।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं
स्तनभरपरिरम्भारम्भे विधेहि विधेयताम् ॥
मुग्धे विधेहि मयि निर्दयदन्तदंशं दोर्वल्लिबन्धनिविडस्तनपीडनानि ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चण्डि त्वमेव मुदमञ्च न पञ्चबाण चण्डालकाण्डदलनादसवः प्रयान्तु॥
शशिमुखि तव भाति भङ्गुरभ्रूः युवजनमोहकरालकालसर्पी ।
तदुदितभयभञ्जनाय यूनां त्वदधरशीधुसुधैव सिद्धमन्त्रः॥
व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं
तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः।
सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां
स्वयमतिशयस्निग्धो मुग्धे प्रियोऽयमुपस्थितः॥
बन्धूकद्युति बान्धवोऽयमधरः स्निग्धो मधूकच्छविः
गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनम् ।
नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः॥
दृसौ तव मदालसे वदनमिन्दुमत्युन्नतं
गतिर्जनमनोरमा विधुतरम्भमूरुद्वयम् ।
रतिस्तव कलावती रुचिर चित्रलेखे भ्रुवा-
वहो विबुधयौवतं वहसि तन्वि पृथ्वीं गता ॥
प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्धं रणे
राधापीनपयोधरस्मरणकृत्कुम्भेन सम्भेदवान् ।
यत्र स्विद्यति मीलति क्षणमथ क्षिप्ते द्विपे तत्क्षणात्
कंसस्यालमभूत् जितं जितमिति व्यामोह कोलाहलः॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास
जयदेवकृतौ राधावर्णने मुग्धमाधवो नाम दशमस्सर्गः।

---

## एकादशस्सर्गः
### ( सानन्ददामोदरः )
### विंशतिः अष्टपदी

कल्याणि - चापु

श्लोकः

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेषे केशवे कुञ्जसय्याम् ।
रचितरुचिरभूषां दृष्टिमोषो प्रदोषे स्फुरति निरवसादां काऽपि राधां जगाद॥

गीतम्

विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम् ।
संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमुपयातम् ॥
मुग्धे मधुमथनमनुगतमनुसर राधे ॥मुग्धे॥
घनजघनस्तनभारभरे दरमन्थरचरणविहारम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारम् ॥मुग्धे॥
शृणु रमणीयतरं तरुणीजन मोहनमधुप विरावम् ।
कुसुमशरासन शासनवन्दिनि पिकनिकरे भज भावम् ॥मुग्धे॥
अनिलतरल किसलय निकरेण करेण लतानिकुरुम्बम् ।
प्रेरणमिव करभोरु करोति गतिं प्रतिमुञ्च विलम्बम् ॥मुग्धे॥
स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम् ।
पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम् ॥मुग्धे॥
अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जम् ।
चण्डि रसितरशनारवडिण्डिममभिसर सरसमलज्जम् ॥मुग्धे॥
स्मरशरसुभगनखेन सखीमवलम्ब्य करेण सलीलम् ।
चल वलयक्वणितैरवबोधय हरिमपि निजगतिशीलम् ॥मुग्धे॥
श्रीजयदेवभणितमधरीकृतहारमुदासितवामम् ।
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम् ॥मुग्धे॥

श्लोकाः

सा मां द्रक्ष्यति वक्ष्यति स्मरकथाः प्रत्यङ्गमालिङ्गनैः
प्रीतिं यास्यति रंस्यते सखि समागत्येति चिन्ताकुलः।
स त्वां पश्यति वेपते पुलकयत्यानन्दति स्विद्यति
प्रत्युद्गच्छति मूर्च्छति स्थिरतमः पुञ्जे निकुञ्जे प्रियः॥
अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलिं
मूर्ध्नि स्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम् ।
धूर्तानामभिसार साहसकृतां विष्वङ्निकुञ्जे सखि
ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ॥
काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो रुचिमञ्जरीभिः।
एतत्तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥

---

## एकविंशतिः अष्टपदी
### ( भगवद्सामीप्यम् )
घण्टा - जम्पा

श्लोकः

हारावलीतरलकाञ्चनकाञ्चिदाममञ्जीरकङ्कणमणिद्युतिदीपितस्य ।
द्वारे निकुञ्जनिलयस्य हरिं नीरीक्ष्य व्रीडावतीमथ सखीं निजगाद राधाम्॥

गीतम्

मञ्जुतरकुञ्जतलकेलिशदने । इहविलस रतिरभस हसितवदने ॥
प्रविश राधे माधवसमीपं कुरु मुरारे मङ्गलशतानि ॥प्रविश॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नवभवदशोकदलशयनसारे । इहविलस कुचकलस तरलहारे
॥प्रविश॥
चलमलयवनपवन सुरभिशीते । इहविलस रसवलित ललितगीते
॥प्रविश॥
कुसुमचयरचितशुचिवासगेहे । इहविलस कुसुमसुकुमारदेहे
॥प्रविश॥
मधुतरलपिकनिकरनिनदमुखरे ।इहविलस दशनरुचिरुचिरशिखरे
॥प्रविश॥
विततबहुवल्लिनवपल्लवघने । इहविलस पीनकुचकुम्भजघने॥प्रविश॥
मधुमुदितमधुपकुलकलितरावे । इहविलस मदनशररभसभावे
॥प्रविश॥
विहितपद्मावतीसुखसमाजे । भणति जयदेवकविराजराजे ॥प्रविश॥

श्लोकाः

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः
कन्दर्पेण च पातुमिच्छति सुधासम्बाधबिम्बाधरम् ।
अस्याङ्कं तदलङ्कुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-
क्रीते दास इवोपसेवितपदाम्भोजे कुतः सम्भ्रमः॥

---

## द्वाविंशतिः अष्टपदी

### ( भगवद्दर्शनम् )

मध्यमावति - आदि

श्लोकः

सा ससाध्वस सानन्दं गोविन्दे लोललोचना ।
शिञ्जानमञ्जुमञ्जीरं प्रविवेश निवेशनम् ॥

गीतम्

राधावदनविलोकनविकसितविविधविकारविभङ्गम् ।
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम् ॥
हरिमेकरसं चिरमभिलषितविलासम् ।
सा ददर्श गुरुहर्षवशंवदवदनमनङ्गविकासम् ॥हरिम्॥
हारममलतरतारमुरसि दधतं परिरभ्य विदूरम् ।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम् ॥हरिम्॥
श्यामलमृदुलकलेबरमण्डलमधिगतगौरदुकूलम् ।
नीलनलिनमिव पीतपरागपटलभरवलयितमूलम् ॥हरिम्॥
तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तटाकम्  ॥हरिम्॥
वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभम् ।
स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम्  ॥हरिम्॥
शशिकिरणच्छुरितोदरजलधरसुन्दरकुसुमसुकेशम् ।
तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशम्  ॥हरिम्॥
विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम् ।
मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम्  ॥हरिम्॥
श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम् ।
प्रणमत हृदि विनिधाय हरिं रुचिरं सुकृतोदयसारम्  ॥हरिम्॥

श्लोकाः

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-
प्रयासेनैवाक्ष्णोस्तरलतरभावं गमितयोः।
इदानीं राधायाः प्रियतमसमालोकसमये
पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकरः॥

भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिविहित-
स्मिते याते गेहाद्बहिरपिहितालीपरिजने ।
प्रियास्यं पश्यन्त्याः स्मरशरसमाकूतसुभगं
सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः॥

जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव ।
भुजापीडक्रीडाहतकुवलयापीड करिणः
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास
जयदेवकृतौ सानन्ददामोदरो नाम एकादशस्सर्गः।

---

## द्वादशस्सर्गः

### ( सुप्रीतपीताम्बरः )

### त्रयोविंशतिः अष्टपदी

नादनामक्रिया - आदि

श्लोकः

गतवति सखीबृन्देऽमन्दत्रपाभरनिर्भर-
स्मरपरवशाकूतस्फीतस्मितस्नपिताधराम् ।
सरसमलसं दृष्ट्वा हृष्टां मुहुर्नवपल्लव-
प्रसवशयने निक्षिप्ताक्षीमुवाच हरिः प्रियाम् ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गीतम्

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम् ।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम् ॥
क्षणमधुना नारायणमनुगतमनुभज राधे ॥क्षणम्॥
करकमलेन करोमि चरणमहमागमितासि विदूरम् ।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम् ॥क्षणम्॥
वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम् ।
विरहमिवापनयामि पयोधररोधकमुरसि दकूलम् ॥क्षणम्॥
प्रियपरिरम्भणरभसवलितमिव पुलकितमतिदुरवापम् ।
मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम् ॥क्षणम्॥
अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासम् ।
त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम् ॥क्षणम्॥
शशिमुखि मुखरय मणिरशनागुणमनुगुणकण्ठनिनादम् ।
श्रुतियुगले पिकरुतविकले मम शमय चिरादवसादम् ॥क्षणम्॥
मामपिविफलरुषा विकलीकृतमवलोकितुमधुनेदम् ।
मीलति लज्जितमिव नयनं तव विरमविसृजरतिखेदम् ॥क्षणम्॥
श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदम् ।
जनयतु रसिकजनेषु मनोरमरतिरसभाववविनोदम् ॥क्षणम्॥

श्लोकाः

प्रत्यूहः पुलकाङ्कुरेण निबिडाश्लेषे निमेषेण च
क्रीडाकूत विलोकनेऽधरसुधापाने कथानर्मभिः।
आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूद्-
उद्भूतः स तयोर्बभूव सुरतारम्भः प्रियंभावुकः॥

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजै-
राविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः।
हस्तेनानमितः कचेऽधरसुधास्वादेन सम्मोहितः
कान्तः कामपि तृप्तिमवाप तदहो कामस्य वामागतिः॥

वामाङ्के रतिकेलिसङ्कुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात् ।
निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति ॥
व्यालोलः केशपाशः तरलितमलकैः स्वेदलोलौ कपोलौ
दष्टा बिम्बाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः।
काञ्ची काञ्चिद्गतासां स्तनजघनपदं पाणिनाऽऽच्छाद्य सद्यः
पस्यन्ती सत्रपं मां तदपि विलुलितस्रग्धरेयं धिनोति ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ईषन्मीलितदृष्टि मुग्धहसितं सीत्कारधारावशा-
दव्यक्ताकुल केलिकाकुविलसद्दन्तांशुधौताधरम् ।
श्वासोत्तप्तपयोधरोपरि परिष्वङ्गी कुरङ्गीदृशो
हर्षोत्कर्षविमुक्ति निःसहतनोः धन्यो धयत्याननम् ॥
तस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
निर्धूतोऽधरशोणिमा विलुलित स्रस्तस्रजो मूर्धजाः।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशोः
एभिः कामशरैः तदद्भुतमभूत् पत्युर्मनः कीलितम् ॥

---

## चतुर्विंशतिः अष्टपदी

मङ्गलकौशिक / सुरुट्टि - आदि

श्लोकः

अथ कान्तं रतिश्रान्तमभिमण्डनवाञ्छया ।
जगाद माधवं राधा मुग्धा स्वाधीनभर्तृका ॥

गीतम्

कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे ।
मृगमदपत्रकमत्र मनोभवमङ्गलकलशसहोदरे ॥
निजगाद सा यदुनन्दने
क्रीडति हृदयानन्दने नन्दनन्दने भक्तचन्दने ॥निज॥
अलिकुलभञ्जनमञ्जनकं रतिनायकसायकमोचने ।
त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने ॥निज॥
नयनकुरङ्गतरङ्गविकासनिरासकरे श्रुतिमण्डले ।
मनसिजपाशविलासधरे सुभगे विनिवेशय कुण्डले ॥निज॥
भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम संमुखे ।
जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ॥निज॥
मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे ।
विहितकलङ्ककलं कमलानन विश्रमितश्रमशीकरे ॥निज॥
घनरुचिरे चिकुरे कुरु मानद मानसजध्वजचामरे ।
रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे ॥निज॥
सरसघने जघने मम शम्बरदारण वारणकन्दरे ।
मणिरशनावसनाभरणानि शुभाशय वासय सुन्दरे ॥निज॥
श्रीजयदेवरुचिरवचने हृदयं सदयं कुरु मण्डने ।
हरिचरणस्मरणामृतनिर्मित कलिकलुषज्वरखण्डने ॥निज॥

श्लोकाः



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोः
घटय जघने काञ्चीमञ्जस्रजं कबरीभरे ।
कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरौ
इति निगदितः प्रीतः पीताम्बरोऽपि तथाऽकरोत्॥
पर्यङ्कीकृत नागनायक फणाश्रेणीमणीनां गणे
सङ्क्रान्तप्रतिबिम्बसंवलनया बिभ्रद्विभुः प्रक्रियाम् ।
पादाम्भोरुहधारि वारिधिसुधामक्ष्णां दिदृक्षुः शतैः
कायव्यूहमिवाचरन् उपचितीभूतो हरिः पातु नः॥
त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे
शङ्के सुन्दरि कालकूटमपिबद्मन्दो मृडानीपतिः।
इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्यवक्षोञ्चलं
राधायाः स्तनकोरकोपरिमिलन्नेत्रो हरिः पातु नः॥
यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेकतत्त्वमपि यत्काव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः।
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः॥
यन्नित्यैर्वचनैर्विरिञ्चि गिरिजाप्राणेशमुख्यैर्मुहुः
नानाकार विचार सारचतुरैः नाद्यापि निश्चीयते ।
तद्भव्यैर्जयदेवकाव्यघटितैः सत्सूक्ति संशोधितैः
आद्यं वस्तु चकास्तु चेतसि परं सारस्य सीमाजुषाम् ॥
साध्वी माध्वीक चिन्ता न भवति भवतः शर्करे कर्कशाऽसि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमसि क्षीर नीरं रसस्ते ।
माकन्द क्रन्द कान्ताधर धरणितलं गच्छ यच्छन्ति भावं
यावच्छृ ङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि ॥

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदास जयदेवकृतौ
स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशस्सर्गः।
इति श्रीगितगोविन्दमहाकाव्यं सम्पूर्णम्
॥ जयश्रीराधाकृष्ण ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

### रामध्यानम्

वामाङ्कस्थितजानकीं परिलसत्कोदण्डदण्डं करे
चक्रं चोर्ध्वकरेण बाहुयुगले शङ्कं शरं दक्षिणे ।
बिभ्राणं जलजातपत्रनयनं भद्राद्रिमूर्ध्नि स्थितं
केयूरादिविभूषितं रघुपतिं सौमित्रियुक्तं भजे ॥

---

कालाम्भोधरनीलकान्तिवपुषं कोदण्डहस्तं तथा
सीतामन्यकरेण पार्श्वनिलयां प्रेम्णा गृहीत्वा मुदा।
आकाशादवतीर्य पुष्पकवरात्तिष्ठन्तमत्यादरा-
द्भूमौ लक्ष्मणसंयुतं रघुवरं वन्दे जगन्नायकम्॥

---

### कृष्णध्यानम्

*प्राणवल्लभ हरे पालयमाम्*

राधासमालिङ्गित वामभागं रामाभिरामं रसिकं किशोरम् ।
नानाविभूषं नलिनायताक्षम् श्रीभक्तकोलाहलमाश्रयेहम् ॥

---

*गोविन्द गोविन्द*

गोवर्धनाद्रेः शिखरे वसन्तं गोगोपगोपीजनसेवितञ्च।
गोपालकं गोकुलसार्वभौमं गोविन्ददेवं प्रणमामि कृष्णम्॥

---

*राधिका वल्लभ गोविन्द*

1. मयिप्रसादं मधुरैःकटाक्षैः वंशीनिनादानुचरैर्विधेहि ।
त्वयि प्रसन्ने किमिहा परै र्नः त्वय्यप्रसन्ने किमिहा परै र्नः॥

2. राधाप्रियं रासविलासलोलं राजीवनेत्रं रमणीयगात्रम् ।
रामानुजं रक्षितगोकुलं तं राजन्तमीडे ललिते निकुञ्जे॥

---

*नन्दकुमार गोपीरमण*

मयूरपिञ्चाङ्कितनीलकेशं माधुर्यसंपूरितमन्दहासम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मनोज्ञनानाविधचारुवेषं मायाविनं माधवमाश्रयेहम्॥

---

*मुरलीधर हरे*

बर्हालङ्कृत शेखरो मृगमदालिप्तोल्लसत्फालको
लोलाक्षो मृदुहास कुञ्जित सुधाबिम्बाधरः सुन्दरः।
मञ्जीराञ्जित कञ्जमञ्जुचरणः पीताम्बरालङ्कृतः
गोविन्दो मुरलीधरो विजयते बृन्दावनेऽत्यद्भुतम्॥

---

*श्यामलसुन्दर*

नानाभूषण भूषितं नटवरं नन्दात्मजं सुन्दरं
बर्हालङ्कृत मौलिरद्भुत रसाविष्टं किशोराकृतिम्।
कालिन्दीतट कुञ्जकेलिभवने शृङ्गार लीलारतं
सानन्दं व्रजसुन्दरी गणवृतं संभावये नागरम्॥

---

*गोपिकारमण*

बर्हालङ्कृत मौलिरद्भुत रसानन्दो जगन्मोहनो
वंशी चुम्बित विद्रुमाधरपुटः श्रीवत्सवक्षःस्थलः।
कर्णान्तायत लोचनः कटिलसत्पीताम्बरालङ्कृतः
गोपीचित्तहरो हरि र्विजयते राधासमालिङ्गितः॥

---

*आनन्दकन्द*

कन्दर्पाधिक सुन्दरः कटिलसत्पीताम्बरालङ्कृतः
कर्णान्तायतलोचनः स्मितमुखो वंशीनिनादोत्सवः।
नानारत्न विभूषणो नवनव प्रेमास्पदःस्रग्धरो
नारी चित्तहरो हरिर्विजयते मातङ्गगामी स्वयम्॥

---

*मदनकोटि*



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

व्यत्यस्तारुण पादपङ्कजदलं व्यासात्मजाराधितम्
मञ्जीरध्वनि तोषितश्रितजनं वेदान्तवेद्यं प्रभुम् ।
ब्रह्मेन्द्रादि समस्त देव निकरैः अभ्यर्चितं माधवम्
गोविन्दं निजभक्तबृन्दसहितं पश्यामि वेणातटे॥

---

*अष्टसखीजन सेवित चरण*

ताम्बूले ललिता देवी विशाखा गन्धलेपने
चामरे चम्पकलता चित्रा वसन कर्मणि ।
नाना वाद्ये तुङ्कविद्या च नर्तने
सुदेवी जलसेवायां रागे श्रीरङ्गदेविका॥

---

*बृन्दावनेश्वर गोविन्द*

नन्दात्मजं नन्दितसर्वलोकमानन्दकन्दं वरदं मुकुन्दम् ।
बृन्दावनान्ते विहरन्तमेनं गोविन्ददेवं प्रणमाम्यनन्तम् ॥

---



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,